In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 10

सन्निधानं सूर्यनारायणशास्त्रिलघुकाव्यसङ्ग्रहः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

सहायकः
श्री के वी सूर्यप्रकाशः, शोधसहायकः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2022

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत-अकाडमी-षष्ठ्यब्दग्रन्थमाला - 10

सन्निधानं
सूर्यनारायणशास्त्रिलघुकाव्यसङ्ग्रहः

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः
आचार्य के नीलकण्ठम्
निदेशकः

सम्पादकौ परियोजना-अनुसन्धातारौ च
डा वि सुब्रह्मण्यम्, उपनिदेशकः
डा जोशी सन्तोषकुमारः, शोधसहायकः

सहायकः
श्री के वी सूर्यप्रकाशः, शोधसहायकः

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2022

In Public domain: Digitization Muthulakshmi Research Academy

Sannidhānaṃ
Sūryanārāyaṇaśāstrilaghukāvyasaṅgrahaḥ
(Re-printing of rare book project)

This Publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Contact of Sales In charge:
+919866498906

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Data Entry by
Shri K V Surya Prakash

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Sannidhānaṃ Sūryanārāyaṇaśāstrilaghukāvyasaṅgrahaḥ

ISBN – 978-93-80171-65-4

© Sanskrit Academy

Year	:	2022
Copies	:	300
Pages	:	xvi+275
Price	:	Rs 400
		$ 40

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Shashtyabda Granthamala - 10

Sannidhānaṃ Sūryanārāyaṇaśāstrilaghukāvya saṅgrahaḥ

(Published under 'Re-printing rare books project' of Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Chief Editor
Prof K Neelakantham
Director

Editors and Project Investigators
Dr. V. Subrahmanyam, Deputy Director
Dr. Joshi Santosh Kumar, Research Assistant

Assisted by
Shri K V Surya Prakash, Research Assistant

Sanskrit Academy
Adarsha Shodha Sansthan
(Recognised by Central Sanskrit University, New Delhi)
Osmania University Campus, Hyderabad – 500 007
2022

In Public domain. Digitization Muthulakshmi Research Academy

Sannidhānaṃ Sūryanārāyaṇaśāstrilaghukāvyasaṅg rahaḥ
(Re-printing of rare book project)

This Publication is published with the financial support under Ashtadashi Scheme of Central Sanskrit University, New Delhi)

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sansthan
Osmania University Campus,
Hyderabad – 500 007

Contact of Sales In charge:
+919866498906
Email:
sanskritacademyhyd@gmail.com
Web:
https://sanskritacademy.net/

Data Entry by
Shri Surya Prakash

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Sannidhānaṃ Sūryanārāyaṇaśāstrilagh ukāvyasaṅgrahaḥ
ISBN – 978-93-80171-65-4

© Sanskrit Academy

Year	:	2022
Copies	:	300
Pages	:	xvi+275
Price	:	Rs 400
		$ 40

In Public domain. Digitization Muthulakshmi Research Academy

Preface

ओम् श्री गुरुभ्यो नमः

।।श्रीशङ्करभगवत्पादाः विजयन्ते।।

Siromani Sannidhanam Suryanarayana Shastri a versatile scholar and great poet composed **forty two** Kavyas in Sanskrit and Telugu and four books on Sahitya and Vyakarana shastra in Telugu. He was born on 10-12-1897. The contribution to Sanskrit and Telugu that Sri Suryanarayana Shastry made is prolific and incredible variety. Among forty six books Sri Suryanarayana Shastry had published many books on his own and distributed most of them to scholars, students and libraries freely. His main intention was propagation of Sanskrit. He worked as teacher for thirty five years in Secunderabad and then served as lecturer in Sanskrit for five more years in the famous Reddy Women's college in Hyderabad. He was honoured by the rulers of Gadwal, Vanaparti and Addanki for his contribution to Sanskrit and Telugu literatures.

Scholars well versed in their respective Shastras will interpret the Kavyasahitya in a very scholastic way. And scholars who have command over poetry by nature would explain the Kavyas in blissful and beautiful manner in order to make people understand the beauty of Kavyasahitya. And there are also scholars acquainted with good knowledge in many languages and able to compose poetry in all the languages they know with same ease and fervour. They continuously make the readers of all languages delighted by bringing the theme of one language in to another language by their skill of creativity. There are many such excellent personalities in India and Shiromani Sri Sannidhanam

In Public domain. Digitization Muthulakshmi Research Academy

Suryanarayana Shastri is one of such amazingly talented personality. He has a variety of literary works to his credit in both Sanskrit and Telugu literatures.

He brought beautiful and vary famous Telugu kavyas and stories from Telugu Prabadhas in to Sanskrit. ***Aandhrakaavyakathah, Aandhradesha Hasya kathaah, Khadga Tikkanah, Kalaapoornodayam*** are some of the kavyas. And ***Vaasavadattaa, Jaatakakathah, Kaavyaalankaara-sangrahah*** and some other Sanskrit works he brought in to Telugu. He has also composed many works of his own in both languages Sanskrit and Telugu.

Coming to the present edition, Sanskrit Academy has already published ***Panditaraja Kavyasangraha, Kshemedrakrita Laghukavyasangraha, Minar works of Neelakantha dikshita*** is now bringing out ***Sannidhanam Suryanarayana Shastrinah laghukavyasangraha*** with eleven short poems. The word power of Sri Sannidhanam Suryanarayana Shastry is unique and he is capable of bringing out entire intended meaning in a few simple words. He shows extraordinary skill of portrayal of human emotions and thoughts. His language is beautiful and gorgeous and he makes us remind all great ancient poets like Bhasa, Kalidasa, Bharavi, Bana. He is greatly skilled in handling the ***riti, rasa, guna, alankaara*** and other merits defined by aestheticians.

I appreciate the efforts of Sri K. V. Suryaprakash research assistant in Academy. He has good knowledge on manuscripts and also on all the ancient publications and well acquainted with knowledge of typography. He took every care and made directly a D. T. P. copy ready for publication. I also appreciate the sincere efforts of Dr. V. Subrahmanyam Dy Director and Dr. Joshi Santhosh kumar who are looking after the reprinting project under Ashtadashi scheme sponsored by

In Public domain. Digitization Muthulakshmi Research Academy

Central Sanskrit University. I thank Dr. Varalakshmi deputy director for her continuous help in publications of academy.

I greatly think of the encouragement of honorable Vice-chancellor Prof. Srinivasa Varkhedi sir and Registrar I/c Prof. Ranjit kumar Barman, Central Sanskrit University, New Delhi (formerly Rashtriya Sanskrit Sansthan) I thank honorable Vice-chancellor Prof. D. Ravinder and Registrar Prof. P. Lakshminarayana Osmania University for their motivation in the research and publications of Sanskrit Academy.

I thank Karshak Art Printers, Vidyanagar Hyderabad for printing it on time.

Prof. K. Neelakantham
Director

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

साहित्यव्याकरणशास्त्रयोः पारदृश्वा, संस्कृततेलुगुभाषयोरुभयोरपि असमानपण्डितः, वेदवेदाङ्गविद्यासु कृताभ्यासः, मन्त्रानुष्ठाननिष्ठः, महाकविः श्रीमान् सन्निधानं सूर्यनारायणशास्त्रिवर्यः श्रीमतोः सन्निधानं सुब्बय्य-बुच्चिनरसम्म दम्पत्योः पुत्रः। आन्ध्रदेशस्य गोदावरीमण्डलान्तर्गतः कण्ड्रिक इत्यग्रहारः एतेषां निवास आसीत्। सूर्यनारायणकवेः जन्मतिथिः 10-12-1897 आसीत्। आन्ध्रदेशे तदानीन्तनकाले विविधशास्त्रेषु पारङ्गताः अनेके पण्डिता अवर्तन्त। तेष्वग्रगण्याः शतावधानिनः वेलूरि शिवरामशास्त्रिवर्याः। बाल्य एतेषां सकाशे सूर्यनारायणशास्त्रिवर्यो विद्यामभ्यास्थत्। तेषां सकाशात्सः काव्यनाटकादिभिस्सह साहित्यव्याकरणवेदान्तादिशास्त्राण्यध्यगीष्ट। ततः तिरुपतौ चेन्नै नगरस्थितासु प्राच्यकलाशालासु विद्यामभ्यस्य 'शिरोमणि' परीक्षायां प्रथमश्रेण्यामुत्तीर्णतामधिगम्य सिकिन्दराबाद् समीपस्थायां महबूब कालेज् पाठशालायामध्यापकपदवीम् अधिजगाम। तत्र 1921 तमवर्षादारभ्य 1954 तमवर्षपर्यन्तं प्रायः पञ्चत्रिंशद्वर्षाणि यावत् तेलुगुभाषां संस्कृतञ्च छात्रेभ्य अशिक्षिष्ट। तदनन्तरं सामाजिकसेवानिरतस्य बहुभाषाकोविदस्य नगरद्वये प्रसिध्दस्य माडपाटि हनुमन्तरायस्यान्येषाञ्च ज्येष्ठानामनुरोधमङ्गीकृत्य भाग्यनगरे विख्यातायां रेड्डि महिलाकलाशालायां 1962 तमवर्षपर्यन्तं संस्कृतमध्यापयमास। *'गद्वाल, वनपर्ति, अद्दंकि'* इत्यादि संस्थानाधीशानां सम्माननमलभतायं विद्वद्वरः। प्रख्यातपण्डितः तत्त्वशास्त्रवेत्ता माननीयः भारतदेशस्य तदानीन्तना राष्ट्रपतिः डा. सर्वेपल्लि राधाकृष्णन् वर्यः हैदराबाद् नगरे सङ्गोष्ठ्यामेकस्यां कवेरस्य रचनासौष्ठवं श्लाघयित्वा सम्मानयामास। सहधर्मचारिण्याः निधनेन तप्तहृदयोऽयम् उभयभाषाकोविदः नैकानि लघुकाव्यानि भाषाद्वयेऽपि विनिर्ममे। "विद्यारत्न" इत्युपाधिना सत्कृतः धीमानयं 1982 तमे वर्षे अक्टोबरमासस्य 14 दिनाङ्के दिवमगमत्।

In Public domain. Digitization Muthulakshmi Research Academy

अनवरताध्ययनाध्यापनयोः पठनपाठनयोश्चासक्तोऽयं पण्डितः संस्कृते पुराणेतिहासकाव्यनाटकादीनि यावन्त्यधीतवान् ततोऽप्यधिकमेव तेलुगुवाङ्मयस्य अध्ययनमकार्षीदिति पण्डिता वदन्ति अपि च तस्य काव्यानामध्ययनेन परिशीलनेनचेदमवगम्यत एव। निरन्तराध्ययनतत्पराः तपस्सम्पन्नाः आजन्मतः प्रत्युत्पन्नमतयः उभयभाषाप्रवीणाः तत्रापि कवितल्लजाः एकस्याः भाषायाः वाङ्मयस्य माधुर्यमवगत्य स्वयं महान्तमानन्दम् अनुभवन्ति। ततः अन्यस्यां भाषायां सुरुचिरया शैल्या पद्यरूपेण गद्यरूपेण वा तदनूद्य लोके सहृदयहृदयान् आवर्जयन्ति। एतादृशाः विद्वत्कवयः यद्यपि शतशः विद्यन्ते लोके तथापि अत्रैतस्योदाहरणन्तु श्रीमान् सन्निधानं सूर्यनारायणशास्त्री एव। कविवरोऽयं संस्कृते तेलुगुभाषायाञ्च आहत्य अशीत्यधिकान् ग्रन्थान् व्यरचयदिति केचन ब्रुवन्ति। किन्त्वेतावत्पर्यन्तम् अस्माभिः कृतान्वेषणेन परिशोधनेन प्रायः षट्चत्वारिंशत् ग्रन्थानेवालभामहि। इदानीं भाषाद्वयेऽपि तेन रचितां ग्रन्थसूचीमत्र प्रस्तुतीकुर्मः – संस्कृतग्रन्थाः तेलुगुग्रन्थाः

संस्कृतग्रन्थाः	तेलुगुग्रन्थाः
1. आन्ध्रभागवतम्	1. जातककथागुच्छमुलु
2. तेनालि रामकृष्णः	2. पुव्वुलतोट 1929
3. आन्ध्रकाव्यकथाः 1972	3. आन्ध्रप्रबन्धकथलु 1935,1949
4. नन्दचरितम् 1964	4. वासवदत्ता
5. कादम्बरीसारः 1974	5. अमृतकणमुलु
6. कलापूर्णोदयम् 1967	6. कीरसन्देशमु 1959
7. संयुक्तास्वयंवरम् 1962	7. प्रवरवरूथिनीयम् 1970
8. विवेकानन्दम् 1949	8. खड्गतिक्कन 1941
9. आन्ध्रदेशहास्यकथाः 1967	9. आन्ध्रव्यासावलिः 1937
10. आन्ध्रभागवतानुवादः	10. कुमारी 1920,1935

In Public domain. Digitization Muthulakshmi Research Academy

11. श्रीवेङ्कटेश्वरवचनशतकम्
12. कचदेवयानीयम् 1961
13. पूर्णपात्रम्
14. भर्तृदानम् 1964
15. कादम्बरीपरिणयः (रूपकम्)
16. कीरसन्देशः 1959
17. विप्रवीरम् 1959
18. मधुकोशः 1959
19. प्रवरवरूथिनीयम् 1968
20. भर्तृहरिचरितम् 1968
21. कबीरचरितम् 1968
22. रामदासम्

11. परमहंसकथावलि
12. स्मरगीता
13. शतपत्रमु 1962
14. गाथासप्तशती (तेलुगु अनुवादः)
15. द्वन्द्वयुध्दम्
16. काव्यालङ्कारसङ्ग्रहं 1969
17. तत्समचन्द्रिक 1942,1954
18. बालव्याकरणमु
19. विवेकानन्दम् 1949
20. जानकीपरिणयमु
21. नडमन्त्रपुसिरि
22. काव्यमाला 1935
23. साहित्यपदकोशमु 1978
24. रेणुका विजयमु
25. जातककथागुच्छमु

काव्यवाङ्मये भाषासु सर्वास्वपि प्रायः अनुकरणपध्दतिः दृश्यते। राजशेखरः काव्यमीमांसायां द्वादशाध्याये कविप्रभेदेषु अनुकरणरीतिमप्यबोधयत्। तत्र सः प्रतिबिम्बाकार, आलेख्याकार, देहान्तरतुल्य संवादरूपेण अनुकरण/अनुवाद काव्यानि च दृश्यन्ते इति तेषां लक्षणानि, उदाहरणानि च कानिचनादर्शयत्। एवञ्च आनन्दवर्धनः ध्वन्यालोके, हेमचन्द्रः काव्यानुशासने अन्ये च लाक्षणिकाः केचन अनुकरणकवितामुद्दिश्य सङ्क्षेपेण प्रणिजगदुः। आधुनिकः लाक्षणिकः रेवाप्रसादद्विवेदी स्वकाव्यालङ्कारकारिकायाम् अनुकरण-अनुवादकवीनां लक्षणानि प्रास्तौत्।

In Public domain. Digitization Muthulakshmi Research Academy

भगवान् पाणिनिः अनुकरणं चानिति परम् (1-4-62), अनुवादे चरणानाम् (2-4-3) इत्यादि सूत्रेषु अनुकरण-अनुवादशब्दावुदाजहार। तत्र "खाट्कृत्य" इत्युदाहरणेन पाणिनिः अनुकरणशब्दः ध्वन्यनुकरणार्थमेवोपायुनगिव दृश्यते। किन्तु "अनुकरणम् = सदृशीकरणम्, व्याकरणमते तद्द्विविधम्, यत्र अर्थरहितस्य केवलशब्दस्य सदृशकरणं तत् शब्दानुकरणम्, यत्र अर्थविशिष्टस्य सदृशकरणम् तदर्थानुकरणम्" इति शब्दकल्पद्रुमो विवृणोति। "अनुकरणम् = सदृशक्रियादिकरणम्, तच्च गुणक्रियावयवादिभिः सदृशीकरणम्, अनुक्रियते अनेनेत्यर्थे करणे ल्युट् प्रत्ययः" इति वाचस्पत्यं भणति। अनेन प्रायः इत्थं वक्तुं शक्यते यत् पूर्वान् कवितल्लजान् अनुकृत्य अनुसृत्य वा तैरेव शब्दैः भाषान्तरेण कवयितुं कृतयत्नः, अथवा पूर्वैर्वर्णितान् अंशान् यथातथं स्वीकृत्य ततोऽपि किञ्चिद्विशेषेण तद्भावम् अन्यया भाषया प्रकटीकर्तुं कृतो यत्न एव "अनुकरणम्" इति।

अनुवादस्तु शब्दानुवादः अर्थानुवादः इति द्विविध इति कथयन्ति पण्डिताः। अनुवादे चरणानाम् (2-4-3) इति पाणिनेः सूत्रस्य काशिकाकारः "प्रमाणान्तरावगतस्यार्थस्य शब्देन सङ्कीर्तनम् अनुवादः" इति व्याचख्यौ। सिध्दान्तकौमुद्यां बालमनोरमाकारोऽपि "अवगतार्थस्य प्रतिपादने" इत्येवावोचत्। आङ्ग्लव्याख्याकारः यस् सि वसु पण्डित एवमवादीत् - "The word 'anuvAda' means repetition by way of explanation, illustration or corroboration; that is to say, when a speaker demonstrates for some special purposes, a preposition which had already been demonstrated before, that is called *'AnuvAda'*. Another meaning of the word is 'the recitation of the *charanas* as already learnt as distinguished from learning them the first time" इति। पूर्वकविभिः प्रोक्तम् अनुसृत्य तादृशैरेव पदैः तत्समानमेव भावं प्रकटीकर्तुं कृतो यत्न एव अनुवाद इति विबुधानामभिप्रायः।

In Public domain. Digitization Muthulakshmi Research Academy

श्रीमतः सन्निधानं सूर्यनारायणशास्त्रिणः ग्रन्थानां परिशीलनेनेदमवगम्यते यदयं सुधीः संस्कृतस्य इतिवृत्तादिकम् अनुकृत्य तेलुगुभाषया तेलुगुभाषायाश्च संस्कृतेन नैकानि काव्यानि निबबन्ध। अपि च काव्यानि सर्वाण्यपि प्रायः पद्यरूपेण गद्यरूपेण च लिलेख। कदाचित् प्राचीनतेलुगुपद्यकाव्यनाम् इतिवृत्तमेवानुसृत्य पुनः तयैव भाषया सरलगद्यरूपेण परिवर्त्यारचयत्। "वासवदत्ता, गाथासप्तशती, तत्समचन्द्रिका" इत्यादयः संस्कृतात् स्वीकृत्य तेलुगुभाषायां व्यरचयत्। यद्यपि संस्कृतपदभूयिष्ठया तेलुगुभाषया नैकानि पुराणानि, काव्यानि, नाटकानि रचितानि आन्ध्रकविभिः तथापि तत्र बहवः ग्रन्थाः वर्तन्ते यत्र केवलम् आन्ध्रदेशस्येतिहासमुद्दिश्य, आन्ध्रदेशसंस्कृतिम् आधारीकृत्य, तेलुगुकविभिः रचितानि सुमधुराणि काव्यनाटकादीनि सहृदयमनोरञ्जकानि सहस्रशः विद्यन्ते यान्यधिगन्तुं न पारयन्ति आन्ध्रेतराः विद्वांसः, साधारणपाठकाश्च। अपि च यथा प्राचीनकालात् नैके कविपण्डिताः संस्कृतवाङ्मयस्य कालिदासादिकवीनां काव्यान्यनूद्य आन्ध्रजनानानन्दयामासुः तथैव केचन विद्वन्मूर्धन्याः तेलुगुकाव्यानि कानिचित् संस्कृतेन पुना रचयितुं प्रायतन्त। तेष्वग्रगण्यः सन्निधानं सूर्यनारायणशास्त्री। अयं कलापूर्णोदयम्, भर्तृदानम्, कीरसन्देशः, संयुक्तास्वयंवरम्, कचदेवयानीयम्, प्रवरवरूथिनीयम्, आन्ध्रकाव्यकथाः, आन्ध्रभागवतानुवादः इत्याद्यनेकानि सहृदयाह्लादकानि तेलुगुकाव्यानि एवञ्च तेलुगुकाव्येषु वर्णिताः सुमधुराः कथाश्च संस्कृतजगति परिव्यापयितुं निरन्तरं प्रायतत।

तेलुगुसाहित्यशास्त्रप्रपञ्चे रामराजभूषणः विख्यातः। अधिगतसंस्कृतशास्त्रविद्यः स महानुभावः तेलुगुभाषया "काव्यालङ्कारसङ्ग्रहम्" नाम साहित्यशास्त्रग्रन्थं व्यरचयत्। साहित्यशिरोमणिः सूर्यनारायणशास्त्री अस्य ग्रन्थस्य व्याख्यानं व्यदधात्। संस्कृतव्याख्यानप्रपञ्चे मल्लिनाथ इव काव्यालङ्कारसङ्ग्रहस्य

In Public domain. Digitization Muthulakshmi Research Academy

व्याख्यानरचनया विद्वानयं ख्यातिं लेभे। एवमेव भट्टोजीदीक्षितस्य सिध्दान्तकौमुदीमनुसृत्य "तत्समचन्द्रिका"ख्यं ग्रन्थं विलिख्य संस्कृत-तेलुगुव्याकरणेषु स्वाधिपत्यं प्राचीकटत्। एवमेकैकस्य ग्रन्थस्य वैशिष्ट्यं विचारयामश्चेत् उपोद्घात एव प्राच्योदधितुल्यो भवतीति भिया शास्त्रिवर्यस्य साहित्यसौरभं सहृदयाः स्वयं पठित्वा मोदन्तामिति चिन्तयामः।

इदानीं "पूर्णपात्रम्, भर्तृदानम्, कचदेवयानीयम्, कादम्बरीसारः, श्रीवेङ्टेश्वरवचनशतकम्, प्रवरवरूथिनीयम्, भर्तृहरिचरितम्, कबीरचरितम्, कीरसन्देशम्, विप्रवीरम्, मधुकोशः" इत्यादि काव्यान्येकत्रीकृत्य "सन्निधानं सूर्यनारायण शास्त्रिलघुकाव्यसङ्ग्रहः" इति नाम्ना पठनपाठनयोग्यरीत्या परिशील्य पुनर्मुद्रापयामश्चेत् संस्कृतलोकाय महदुपकारी भवतीति अपि च सुप्रसिध्दैः पण्डितैः एकैकस्य लघुकाव्यस्यारम्भे आरचिताः प्रस्तावनादयः यथातथं मुद्रापयामश्चेत् अध्येतॄणां कृते महते उपयोगाय भवतीत्यपि अस्मत् कार्यवर्गेण निश्चितः।

तदनुसृत्य अस्मन्निदेशकवर्यस्य पर्यवेक्षणे लघुकाव्यसङ्ग्रहग्रन्थममुं निर्दुष्टम् आनेतुं प्रायते। एतादृशम् अवकाशं मह्यं कल्पितवते निदेशकाय आचार्याय के नीलकण्ठवर्याय अपि च पुनर्मुद्रणपरियोजनायाः प्रबन्धकोपप्रबन्धकाभ्यां डा. वि सुब्रह्मण्यम् डा जोशी सन्तोष् कुमार् महोदयाभ्यां धन्यवादान् प्रकटयामि। मह्यं पदे पदे सहकृतवत्यै डा वरलक्ष्मीवर्यायै, उट्टङ्कणदोषनिवारणे उपकृतवते जोशी भरद्वाजाय, अकाडम्याः कार्यालयप्रमुखाभ्यां श्रीमती मञ्जीरा श्री वीरभद्र शर्म महोदयाभ्यां च कार्तज्ञं वितरामि।

इत्थम्

के वि सूर्यप्रकाशः

शोधसहायकः

In Public domain. Digitization Muthulakshmi Research Academy

पुरोवाक्

आन्ध्रगीर्वाणभाषयोः गद्यपद्यकाव्यकवनकुशलः साहित्यव्याकरण-वेदान्तादिशास्त्रविशारदः शिरोमणिरिति उपाधिधरः श्रीमान् सन्निधानं सूर्यनारायणशास्त्रिवर्यः बुच्चिनरसम्मा-सुब्बय्यदम्पत्योः शुक्तिमुक्ताफलत्वेन 1819 शकसँव्वत्सरस्य हेविलम्बिमार्गशिरकृष्णप्रतिपदि आन्ध्रप्रदेशस्य गोदावरीजनपदस्य कण्ड्रिकाग्रहारे वैदिकब्राह्मणपरिवारे जन्मालभत। तिरुपति-मद्रासुप्राच्यकलाशालासु अधिगतविद्यः तेलङ्गाणाराज्यस्य सिकन्दराबादु महबूबकलाशालायाः सर्वकारीयोन्नतविद्यालये 1921 तः 1954 पर्यन्तं शिक्षको भूत्वा रावुबहादुर् वेङ्कटरामरेड्डिकलाशालायां 1962 पर्यन्तं संस्कृतोपन्यासक आसीत्।

तेलुगुभाषया प्रणीतैः जातककथागुच्छ-विवेकानन्द-वासवदत्तादिभिः पद्यरचनाभिः तत्समचन्द्रिकादिलाक्षणिककृतिभिश्च तेलुगुराज्ययोः सुविख्यातोऽयं विद्वत्प्रवीरः तत्समचन्द्रिकया वैय्याकरण इति 700 पृष्ठेषु मुद्रितस्य काव्यालङ्कारसङ्ग्रहव्याख्यया आलङ्कारिक इति आत्मानं परिचाययति। वेलूरशिमरामशास्त्रिवर्यस्य अन्तेवासित्वेन सहजकाव्यपाटवं वर्धयित्वा बह्वीः कृतीः रचयामास।

कवेरस्य पञ्चाशदधिकाः ग्रन्थाः उभयभाषयोः दरीदृश्यन्ते। एतस्य संस्कृतकृतयः पुल्लेलश्रीरामचन्द्रुडु-गुण्डेरावहर्करे-लाल्ये प्रभृतीनां बहूनां विद्वद्वराणां प्रशंसापात्रङ्गताः विराजन्ते।

तत्रभवतां श्रीमतां संस्कृतभाषया ग्रथितानाम् एकादशानां लघुकृतीनां सङ्ग्रहरूपो ग्रन्थोऽयं श्रीसन्निधानं सूर्यनारायणशास्त्रिलघुकाव्यसङ्ग्रहनाम्ना दुर्लभग्रन्थपुनर्मुद्रणयोजनान्तर्गतत्वेन संस्कृतपरिषदियं मुद्राप्यते। अस्मिन् लघुकाव्यसङ्ग्रहे पूर्णपात्रम्, भर्तृदानम्, कचदेवयानीयम्, कादम्बरीसारः,

In Public domain. Digitization Muthulakshmi Research Academy

श्रीवेङ्कटेश्वरवचनशतकम्, प्रवरवरूथिनीयम्, भर्तृहरिचरितम्, कबीरचरितम्, कीरसन्देशम्, विप्रवीरम्, मधुकोशः इत्येते एकादशकृतयः सङ्गृहीताः।

एतादृशान् कवीन् परिचाययितुं संस्कृतपरिषदा अष्टादशीति परियोजनामाध्यमेन प्रकाशनानि विदधाति। इयं परियोजना देहलीस्थस्य केन्द्रियसंस्कृतविश्वविद्यालयस्य अनुदानेन प्रवर्तते। परियोजनायाः अस्याः आवाम् अनुसन्धाताराविति आत्मानं धन्यौ मन्यावहे। ईदृगवसरं दत्तवते परिषन्निदेशकाय आचार्याय नीलकण्ठवर्याय आदौ कार्तज्ञं विन्दावहे।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतये, कुलसचिवाय, परियोजनायाः अधिकारिभ्यश्च नमोवाकान् वितरावः। उस्मानियाविश्वविद्यालयस्य कुलपतये, कुलसचिवाय च आधमर्ण्यं प्रकटयावः। सम्पादने कर्मणि अत्मानं व्यापृतवद्भ्यां सूर्यप्रकाश-भरद्वाजाभ्यां कृतज्ञतां आविष्कुर्वः। संस्कृतपरिषदः इतरसहकारिसदस्येभ्यः धन्यवादान् विदद्वः।

इत्थं बुधजनविधेयौ परियोजना अनुसन्धातारौ

सन्तोषसुब्रह्मण्यौ

षष्ट्यब्दग्रन्थमालापराख्या दुर्लभग्रन्थपुनर्मुद्रणपरियोजना

In Public domain. Digitization Muthulakshmi Research Academy

विषयानुक्रमणिका

क्रमसङ्ख्या	विषयः	पृष्ठसङ्ख्या
1.	Preface	I
2.	आमुखम्	Iv
3.	पुरोवाक्	X
4.	पूर्णपात्रम्	1
5.	भर्तृदानम्	59
6.	कचदेवयानीयम्	85
7.	कादम्बरीसारः	109
8.	श्रीवेङ्टेश्वरवचनशतकम्	151
9.	प्रवरवरूथिनीयम्	181
10.	भर्तृहरिचरितम्	197
11.	कबीरचरितम्	211
12.	कीरसन्देशम्	223
13.	विप्रवीरम्	243
14.	मधुकोशः	259

In Public domain. Digitization Muthulakshmi Research Academy

पूर्णपात्रम्

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

FOREWARD

I have great pleasure in writing this foreward to the present work entitled "Purnapatram" written by Siromani Shri Sannidhanam Suryanarayana sastri of Secunderabad. I have known him for a number of years and have great regard and admiration for his scholarship in Alankara and vyakarana Sastras. He is the author of a number of Telugu books which are considered as very useful to students of Telugu literature. His favourite subject is the exposition of various theories of literary criticism according to Sanskrit tradition.

This small work is a collection of Sanskrit translations made by the author from Telugu. The title of the book means a "vessel filled with precious things". It is indeed so when we look into the various subjects with which this book deals. The titles of the subjects indicate that the author has collected in this "precious vessel" valuable ideas on ethical principles well-known to every reader of Sanskrit books. The lanugage and style of the author are very simple, and yet fluent and racy. The parables of Sri Ramakrishna Paramahamsa have been narrated in an attractive manner. The author has avoided too many and unnecessary shabda Alankaras and has followed the suggestive method of Dhvani as propounded by Anandavardhana. Some poems deal with natural phenomena which are very common to English literature, and which also indicate the author's own tendency towards nature. The book contains three parts truths the first dealing with religious and the second dealing with natural phenomena philosophical, and the third contains mystic poems. Thus this small book is enough to give a synthetic view of India cultural values.

My happiness in writing this foreword is further enhanced by the fact that the author has dedicated this valuable book to

In Public domain. Digitization Muthulakshmi Research Academy

Andhra Pithamaha Madapati Hanumantha Rao Garu (Padma Bhushan), Chairman of the Andhra Pradesh Legislative Council. The regard and esteem which is associated with this great leader of old Hyderabad State is something which can only be appreciated by those who have had the privilege of working with him as his followers and juniors in social and political life. I happen to be one of those lucky persons, and therefore I have no hesitation in saying that the author has expressed the genuine admiration of the people of Hyderabad for Andhra Pithamaha by dedicating his book to him. I pray that the author may be enabled by the Almighty to add more laurels to his literary achievements and serve Sanskrit and Telugu literature, as he has been doing throughout his life.

B. Ramakrishna Rao

Governor of Kerala.

In Public domain. Digitization Muthulakshmi Research Academy

INTRODUTION

अपूर्वं यद्वस्तु प्रथयति विना कारणकलां
जगद्ग्रावप्रख्यं निजरसभरात्सारयति च ।
क्रमात्प्रख्योपाख्यप्रसरसुभगं भासयति तत्
सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते ॥ - अभिनवगुप्तः

It is my privilege to introduce to the world of Sanskrit scholars the present work entitled Purnapatram written by Vidyaratna, Siromani Sri Sannidhanam Suryanarayana Sastry. Sri Sastry garu is one of the great scholars of the Andra Desa, his special subjects being Alankara Sastra and Vyakarana Sastra. He has written a number of works in Telugu which are highly useful to the teachers and students of the Telugu Literature. His Kavyalankarasangrahavivaranam is a lucid and scholarly exposition of the various theories of the Sanskrit Literary Criticism. Tatsama chandrika is an elaborate and a unique work which deals with the Sanskrit grammar as applied to the Telugu Language. He is also the author of a good number of Khandakavyas, Sandesakavyas, Lyrics, Stories, Long poems etc, both in prose and verse.

Purnapatram is a collection of the Sanskrit translations made by the author from the original Telugu. Purnapatram means of vessal filled with precious things presented to friends, relatives or servants on festive occasions.

हर्षादुत्सवकाले यदलंकारांशुकादिकम् ।
आकृत्य गृह्यते पूर्णपात्रं पूर्णानकं च तत् ॥ - Haravali

कदा नु मे तनयजन्ममहोत्सवानंदनिर्भरो हरिष्यति पूर्णपात्रं परिजनः
- Kadambari.

तत् कामं प्रभवति पूर्णपात्रवृत्त्या स्वीकर्तुं मम हृदयं च जीवितं च ।
- Malatimadhava 4-1.

शांभवं चाप मारोप्य योऽस्मा नानंदयिष्यति ।
पूर्णपात्रमियं तस्मै जानकी कल्पयिष्यते ॥ - Anargha Raghava 3.45.

In Public domain. Digitization Muthulakshmi Research Academy

It may also mean that each poem in this work is a patra filled with the kavya rasa to be relished and enjoyed by the sahrdaya. वाक्यं रसात्मकं काव्यं ।

The author's style is simple, plain and forceful. It is characterised by grammatical purity, clarity of thought, richness of ideas, precision and brevity combined with case. In short, it is marked by prasada guna which vamana defines as :

अर्थवैमल्यं प्रसादः । अर्थवैमल्यं प्रयोजकमात्रपदपरिग्रहे प्रसादः ।

(Kavyalankara sutravrtti 3-2-3)

The parable of the prekshaka (page 2) is graphically narrated in three Aryas, in about forty words. The critical reader notices in these poems the free flow of spontaneous feelings clothed in appropriate language.

Poetic feelings are expressed in two ways, viz, svabhavokti and vakrokti. The former is the description of life as it is, and the latter the description of life as the poet understands and interprets it with his penetrative and emotional approach. This vakrokti is to be identified with the alankara in general. Each one has its own charm and appeal in literature, both leading to the realisation of rasa. The following sahokti is quite charming :

निशाता एकलव्यस्य बाणा लक्ष्यं न केवलम् ।
किंत्वलक्ष्यं फल्गुनस्याप्यच्छिन्दन् हृदयं बत ॥ (Ekalavyam)

The following simile is highly suggestive :

प्राप्तमृत्यु र्लब्धजीवा बभासे सा रुरोर्दृशोः ।
प्रतप्तस्वर्णवल्लीव पूर्वतोऽपि समुज्ज्वला ॥ (Rurupramadvaram)

It is fortunate that the present author has not shown any tendency to make abuse of the Sabdalankaras and Arthalankaras like yamaka, anuprasa, slesha etc., which found great favour with many of the latter day sanskrit poets. दोषाभावोपि गुण एव ।

In the first part of this work twenty parables of Sri Ramakrishna Paramahansa are narrated in flowing and racy

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit. The function of poetry is explained by Rudrata as :-

ननु काव्येन क्रियते सरसानामवगम श्चतुर्वर्गे ।
लघु मृदु च नीरसेभ्य स्ते हि त्रस्यंति शास्त्रेभ्यः।।(Kavyalankara 10-1)

These parables are intended to teach profound truths of religion and philosophy. They are predominated by the sentiment of Humour. The conclusion of the Manivikraya is very appropriate:

स्वशेमुषीविशेषेण विजानाति महात्मनः ।
वैदुष्यं विदुषो मूल्यं रत्नस्येव जनो भुवि ।।

The ekalavya of the second part is of particular interest. In the original story as narrated in the Mahabharata, Drona cruelly demanded Gurudakshina from Ekalavya of whom he was not a practical Guru, which is in the form of the latter's right thumb to be cut off and presented to the former. The author made the character of Drona blemishless by making Arjuna demand such Gurudakshina. This happy remodelling of the original story is justifiable by taking into account the maxim laid down by Anandavardhana in his Dhvanyaloka : -

इतिवृत्तवशायातां त्यक्त्वाननुगुणं स्थितिम् ।
उत्प्रेक्ष्योप्यंतराभीष्टरसोचितकथोन्नयः ।।

The story of squirrel contributing its humble service to Rama's cause is a very familiar one in the Andhra Desa. This story, Rurupramadvaram and Ganapariksha are quite interesting.

The remaining poems deal with the phenomena of nature. Lyric poetry is subjective in nature and is the expression of the personality of the poet. They are a common feature in English Literature, the contributions to this branch being Wordsworth, Shelly, Keats and a host of other poets. These lyrics are charactersied by the author's deep sympathy for nature. Our author's sympathy for the creeper is beautifully expressed : -

पश्यतो नाम नेत्राभ्यां प्रस्रुता बाष्पवाहिनी ।
अयत्नमवदं जाल्म किं काष्ठे ते करौ न किम्?

In Public domain. Digitization Muthulakshmi Research Academy

अनपचितकुसुमभारा नेत्रानंदिन्युदीक्षमाणानाम् ।
सुभगा सुवासिनी वल्ली ते दृष्टि मप्रहंति ? (pushpapachaya)

Wordsworth's lines are very well known.

Thanks to the human heart by which we live,
Thanks to its tenderness, its joys and tears
To me the meanest flower that blows can give
Thoughts that do often lie too deep for fears.

The third part contains mystic poems. The author is inspired by the Gitanjali of Rabindranath Tagore in writing these poems. Though Sanskrit literature abounds with religious lyrics and Anyapadesa-kavyas, this type of mystic poetry is not developed into an independent branch. Indian life stands for the harmonious synthesis of the four human values, Dharma, artha, Kama and Moksha. Poetry emanates from the innermost depths of the national life. Moksha is also considered as one of the aims of Sanskrit poetry.

These mystic poems are characterised by depth of devotion, keen introspection, sincerity of feeling and impatient yearning for the Reality. Sometimes the poet catches a glimpse of the Eternal from beyond the surface of the existence.

उपविशता सिकतासु मया नदीशीतलोर्मिकारूपान् ।
स्वकटाक्षान् करुणार्द्रान् प्रसारयन् वीक्षितो देवः ।।

The author deserves to be congratulated on his effort in bringing out the purnapatram which in these days of renaissance in Sanskrit is highly welcome. Andhrapitamaha, Padmabhushana Dr. Madapati Hanumantha Rao Pantulu Garu has laid the author and the lovers of Sanskrit under deep obligation by accepting to be the krtipati of this work.

B.R.Sastry

In Public domain. Digitization Muthulakshmi Research Academy

कृतिपतिप्रशस्तिः

1. श्रीमाडपाट्यन्वयवार्धिचन्द्रश्चकास्ति डाक्टर् हनुमन्तरायः ।
यः प्राप्तवानान्ध्रपितामहेत्युपाधिं त्यलङ्गाणजनैर्युनैव ॥

2. यस्याभिधेयं त्यलगाणराष्ट्र आस्ते जनानां रसनासु नृत्यत् ।
चित्राणि यस्य प्रतिगेहमर्चां गृह्णन्ति देवप्रतिमासमानि ॥

3. यः पद्मभूषणोपाध्याभ्यर्हितः परिपालकैः ।
हनुमानिव चान्वर्थ नामा सेवापरायणः ॥३

4. तेलङ्गाणजनान् गाढं निद्राणानुदितेऽपि यः ।
रवौ जागरयामास गायन् प्राभातगीतिकाः ॥४

5. उत्तानहृदयः शान्तो देशभाषाभिमानवान् ।
अजातशत्रुर्योभाति आन्ध्रदेशनभोमणिः ॥५

6. वृद्धोऽपि च युवेवाद्य कार्यभारान् सुदुर्वहान् ।
वहत्येव महासारः प्रोच्यते हि जरत्तरुः ॥६

7. बालिकानां पाठशाला कलाशाला च योषिताम् ।
संस्थे द्वे विदुषो यस्य अभूतां प्रियपुत्रिके ॥७

8. बीजमुप्तं पुरा येन देशभाषाभिमानिना ।
आन्ध्रप्रदेशावतारस्याद्य प्रासूत तत्फलम् ॥८

9. माणिक्याम्बा यस्य साध्वी रवेश्छायेव राजते ।
महिलामण्डलस्यैषा माणिक्यमिति शस्यते ॥

10. मम बन्धुर्ममाप्तोऽयं मम मित्रं हितो मम ।
इत्याख्यान्ति हनूमन्तरायं स्वीयतया जनाः ॥

11. स्पृहयन्ती काव्यकन्या ममैषा गुणसम्पदे ।
चतुःसप्ततिवर्षीयमप्येनं वृणुते पतिम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

12. सुरभाषासुधामूर्तिकृतिकन्यात्मनः पतिम् ।
कर्तुमीष्टेऽमरं तेन नितान्तं भद्रमश्नुते ॥

13. हनुमन्तराय! जीवेर्हनुमानिव भो! श्चिरञ्जीवी ।
आरोग्यभाग्यमाप्नुहि विजयन्तामुद्यमास्त्वयारब्धाः !

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

पूर्णपात्रम्

प्रथमो भागः

परमहंसकथाः

1. साक्षात्कारः

1. भगवत्साक्षात्कारः कथं भवेत्कथ्यतां कृपया ।
भगवन्नित्याचार्य प्रवचनकालेऽब्रवीच्छिष्यः ॥

2. अनुसर! मामित्युक्त्वा गुरुस्सशिष्यो गतस्तदा दूरम् ।
किञ्चित्प्रविश्य सरसीं तमादिदेशात्र मज्ञेति ॥

3. आत्मज्ञया निमग्नस्य मूर्ध्न्याधाय गुरुः करम् ।
यथा नोद्गच्छति जला तथा बाढं न्यपीपिडत् ॥

4. गुरुणा मुक्तः शिष्यः शिर उन्नम्योद्गतः सरः सलिलात् ।
पृष्टो निर्भग्नस्य स्वस्यावस्थां न्यवेदयत्तस्मै ॥

5. प्रतिरुद्धश्वासेन हा धिक् कालासहेन निर्गन्तुम् ।
क्षुभ्यच्चितेन मया क्षपितं युगवत् क्षणं सलिले ॥

6. आकर्ण्य गुरुरवोचत् भगवान् साक्षाद्भवेदित्थम् ।
संक्षुब्धमानसानामनुक्षणं दर्शनाय निष्टपताम् ॥

2. वनपालिका - धीवरी च

7. उद्यानपालिकायास्सख्याः स्वस्या गृहं गता काचित् ।
मत्स्याजीवा रात्रौ कृतातिथेया तयाऽवस तत्र ॥

8. कृतभोजने उभे ते कान्ते सल्लापगोष्ठिनिर्विष्टे ।
अविदितयामेऽर्थनिशि सुषुप्सयास्तरणयोरशयिषाताम् ॥

9. पाश्वस्थपुष्पपुटिका सुरभिलगन्धोऽतरे कुटीरस्य ।
विसरत्यलब्धनिद्रा जाग्रत्येवास्ति दाशवधूः ॥

In Public domain. Digitization Muthulakshmi Research Academy

10. शयनीयोभय तटयोर्विलुठति बहुशः समुपविशति ।
खिन्ते पुनरपि शेते सा किङ्कर्तव्यतामूढा ॥

11. विलुठस्य सुप्तभावा शय्यायां क्लिश्यसेऽत्र को हेतुः?
इति पृष्टा सख्या सा हुं हुं कुर्वत्युवाच भुग्नमुखी ॥

12. मह्यं न रोचतेऽयं सुमगन्धः सखि स एव निद्रां मे ।
दूरयति कुवेणीं मे यच्छाजिघ्रामि किञ्चिदिति ॥

13. मत्स्याधानीं दत्तां गृह्लात्याघ्राय तद्गन्धम् ।
प्रापत्सा सुखनिद्रां यावदुषां न प्रबुद्धैव ॥

14. कुत्सयन्नीश्वरस्यांसि पद्मगन्धं जडो बत ।
संसारस्यास्य दुर्गन्धमाघ्रातुं धिगपेक्षते ॥

3. प्रेक्षकः

15. कक्षाकटो जगाम सन्द्रष्टुं वीथिनाटकं किमपि ।
प्रारप्स्यते विलम्बे नेत्यज्ञासीज्जनैः स तत्रत्यैः ॥

16. नाट्यारम्भं यावत् स्वप्स्याम्यत्रेति चिन्तयित्वाऽयम् ।
सुप्तश्च प्रतिबुद्धः श्रुतवांस्तन्नाटकं समाप्तमिति ॥

17. विवृतकटं संवृत्य कक्षे धृत्वा पुनर्गृहं यातः ।
एवं यातायातैः श्राम्यति जन्तुरिह वेद्यमविदित्वा ॥

4. धनमदः

18. मन्दभाग्येन केनापि हारितं रूप्यकं क्वचित् ।
लब्ध्वा कश्चन मण्डूको जुगोपात्मबिलान्तरे ॥

19. योऽपक्रान्तो भयभ्रान्तः पुरा दृष्ट्वा गतागतान् ।
अधुना स मदोन्मत्तस्तान् रटन्नभिधावति ॥

20. उपगच्छन्तं वीक्ष्य निकषात्मबिलं प्रमत्तगजमस्थात् ।

In Public domain. Digitization Muthulakshmi Research Academy

उद्धृतचरणः सञ्जस्तं निर्हन्तुं कृतभ्रुकुटिः ॥

5. द्विर्हसतीश्वरः

21. माभैषीर्भो अम्ब पुत्रमहं जीवयामि ते रुग्णम् ।
वैद्यं वदन्तमित्थं विलोकयन्नीश्वरो हसति ॥

22. विभज्य भ्रातरौ तुल्यं पित्र्यं क्षेत्रं ममास्त्विदम् ।
तत्तवास्त्विति चान्योऽन्यं विगृह्णन्तौ हसत्यसौ ॥

23. न जानीतेऽगदङ्कार ईशः प्राणान् हरेदिति ।
भ्रातरौ च न जानाते सर्वक्षेत्रं विभोरिति ॥

६. शम्भुर्वा ब्रह्मा वा

24. कतरोऽभ्यधिकः शम्भुर्ब्रह्मा वेत्येकदा विनिर्णेतुम् ।
गालोडिते प्रवृत्ता महामहापण्डिताः सदसि ॥

25. तर्कप्रतितर्कशतैर्मीमांसित्वापि बहुदिवसान् ।
अन्यतरनिर्णये ते नासन् प्रभवः प्रतीपसिद्धान्ताः ॥

26. उपगम्य पद्मलोचनमपाक्षिकं पण्डितं प्रष्टुम् ।
स्वीयं विवादवस्तु प्रास्ताविष्टामुभौ पक्षौ ॥

27. श्रुत्वा विवेकी सोऽब्रूत दृष्टपूर्वो मयापि वा
मत्पूर्वैर्वा नवा शम्भुर्न ब्रह्मावेति सस्मितम् ॥

7. श्रद्धा

28. कश्चिद्विप्रोऽनुदिनं सहस्रनामार्चनं कृत्वा ।
नीराजनं समर्प्य च निवेदयति देवमूर्तये भोज्यम् ॥

29. ग्रामान्तरं गमिष्यन् कार्यवशादाह पुत्रकं जनकः ।
गृहदेवतामहरहस्समर्च्य नैवेद्यमर्पयत्वमिति ॥

30. वचनं पितुरादृत्य श्रुतेरिव श्रद्धया पुत्रः ।

In Public domain. Digitization Muthulakshmi Research Academy

विरचय्य देवपूजां समार्पिषद्भोज्यनैवेद्यम् ॥

31. साक्षात् तत्पात्रान्नं मूर्तिर्भुक्त इति कृतश्रद्धः ।
पश्यन् स मुग्धबालः सुचिरं तस्थौ परन्तु नाभुङ्क्त ॥

32. किं भो मयापराद्धं भगवान्नाश्नाति भोज्यमिदम् ।
इति तेन विषण्णेन पूजाः स्तुतयश्च विरचिताः शतशः ॥

33. पूजा भस्माहुतयः स्तोत्राणि च बधिरगीतानि ।
भूतानीति विषण्ण उच्चैर्बाष्पायमाणदृगरोदीत् ॥

34. साक्षात्कृत्य स देवः पुरोऽन्नपात्रस्य समुपविश्य तदा ।
आश किल कणेहत्य श्रद्धालोरीश्वरो भवेत्साक्षात् ॥

35. शून्यान्नपात्रहस्तं तं वीक्ष्यात्मीयास्समागतम् ।
तस्यान्नस्य कथां पृष्ट्वा श्रुत्वा विस्मितचेतसः ॥

36. नास्माभिर्दृष्टचरं नापि श्रुतचरमये ! भगवान् ।
यत्साक्षाद्भुङ्क्तेऽन्नं पुण्योऽसीत्यस्तुवन् बालम् ॥

8. कूपमण्डूकः

37. निवसन्नास्ते कश्चन कूपे मण्डूक एकाकी ।
जातोऽयमत्र वाप्यां वृद्धश्चात्रैव कालेन ॥

38. बाह्यं लोकं कूपान्नायं जानाति धिक् धिक् तम् ।
आयात एकदान्यस्तं कूपं दर्दुरः कश्चित् ॥

39. प्रथमोऽप्राक्षीद्भेको भद्र! कुतस्त्वं समायातः ।
आगन्तुकोऽवदद्भो आयातोऽहं महोदधेर्दूरात् ॥

40. किं किं त्वमुदधिवासी? अतिथिरसि स्वागतं भवते ।
स कियानुदधिर्ब्रूहीत्यपृच्छदादरपुरः सरं प्रथमः ॥

41. सुमहान् खलूदधिरिति श्रुत्वा प्रथमः प्रसार्य पदयुगलम् ।

In Public domain. Digitization Muthulakshmi Research Academy

उदधेस्तवान्तरालं किमियद्वेत्यन्वयुङ्क्त वैलक्ष्यात् ॥

42. द्वैतीयीकोऽवोचन्महत्तरः सागरोऽतिविस्तीर्णः ।
आकर्ण्याह प्रथमो वाप्या उत्प्लुत्य तीरस्तीरम् ॥

43. किमियानास्ते वा भोस्तवोदधिरिति द्वितीयमण्डूकः ।
स्मित्वाह तयोर्मूख! हस्तिनमशकयोरिवान्तरं ज्ञेयम् ॥

44. श्रुत्वा कुपितः प्रथमो रराट नान्यन्महत्तरं लोके ।
मम कूपान्माजल्पीः पिधेहि तव मुखमपेहि दूरमिति ॥

9.मणिविक्र यः

45. प्रापय्येदं रत्नं विक्रेतुं पण्यवीथिकामस्य ।
मूल्यं कियत्कियत्ते वणिग्जना ददति विद्धि गच्छेति ॥

46. प्रभुणाऽऽज्ञप्तः प्रेष्यो गतोऽददर्शद्वणिग्भ्यस्तत् ।
वार्ताकद्वयमस्य मूल्ये निरणायि शाकविक्रयिणा ॥

47. अभ्यर्थितोऽपि बहुशो भटेन नैच्छत् स वाणिजो दातुम् ।
वार्ताकस्यार्धमपि ततोऽधिकं प्राह चैतदतिमूल्यम् ॥

48. परिवृत्यालोक्य मणिं सहस्रश उवाच वस्त्रविक्रेता ।
निष्कसहस्रकमेतन्मूल्यं क्रीणामि यच्छ मह्यमिति ॥

49. आकर्ण्य भटो वणिजं प्रार्थयत ततोधिकाय मूल्याय ।
अवदद्वणिक् तदधिकः काणवराटोऽपि दीयते नेति ॥

50. किङ्करेण ततो गत्वा सन्दधे रत्नविक्रयी ।
दृष्टमात्रे मणौ दत्वा यो मूल्यं लक्षमग्रहीत् ॥

51. स्वशेमुषीविशेषेण विजानाति महात्मनः ।
वैदुष्यं विदुषो मूल्यं रत्नस्येव जनो भुवि ॥

In Public domain. Digitization Muthulakshmi Research Academy

10.पार्थगर्वभङ्गः

52. स्वस्माद्भक्ततरोऽन्यः स्वस्मादन्यस्सुहृत्तरश्च हरेः ।
नास्तीति धनीभूतो गर्वः पार्थस्य हृत्कुहरे ॥

53. भगवान् सर्वज्ञस्स रहस्य मेतत्कथं न जानीयात्?
स कदाचिद्वाह्याल्या अनुसृतपार्थोऽगमद्बहिर्नगरात् ॥

54. दृष्टः कश्चन विप्रः पथि भोज्यं यस्य शुष्कतृणमेव ।
किन्त्वास्ते सन्निहिता सङ्गलता सुप्तभुजगीव ॥

55. शष्पाशनात्प्राणिहिंसा पापमाशङ्क्य भुज्यते ।
शुष्कमेव तृणं तेन त्वसिना किं प्रयोजनम् ॥

56. शरणार्थी शस्त्रधरो जन इव शान्तः स परमभागवतः ।
असिधेनुकथा भीतिं जनयत्युपसर्पतां मनुष्याणाम् ॥

57. चरितेन विरुद्धेन तस्य पार्थः सविस्मयः ।
हरिं पप्रच्छ तेनोक्तं स विप्रः पृच्छ्यतामिति ॥

58. सप्रश्रयमुपस्थाय प्रणम्यैनं धनञ्जयः ।
अन्वयुङ्क्ताऽङ्ग! शान्तस्त्वं किं कार्यमसिना तव? ॥

59. सोऽब्रवीद्भृकुटिं कृत्वा खड्गं मुद्धृत्य चालयन् ।
यदि लब्धोऽवकाशो मे चतुरो हन्मि दुर्जनान् ॥

60. नारदः प्रथमस्तेषु दोषः कोऽस्येति शङ्कसे ?
अविश्रान्तं स गानाब्धौ निर्मज्जयति मे हरिम् ॥

61. निर्घृणः स महापापः कालाकालौ च नेक्षते ।
स्थाप्यतेऽस्य पुरो बद्धः प्रभुर्मे स्तोत्ररज्जुभिः ॥

62. केन भाव्यं द्वितीयेनत्याशङ्का क्रियते त्वया ।
सा द्रौपद्यविवेकस्य जन्मभूर्भक्तमानिनी ॥

In Public domain. Digitization Muthulakshmi Research Academy

63. अनया शठयाहूतः पुरस्थपात्रान्नमपहाय ।
गत्वा दुर्वास ऋषेः शापाग्नेः पाण्डवानावीत् ।।

64. उपोषिताय सा दुष्टा तस्मा उच्छिष्टमप्यदात् ।
तेन स्वीक्रियते सर्व स्वदत्तमिति दुर्धिया ।।

65. कस्तृतीय इति ब्रूहि प्रह्लादः पापवर्तनः ।
येन पित्रा कृतो दण्डः क्षिप्तो मूर्ध्नि मम प्रभोः ।।

66. चूर्णितः करिपादाग्रैस्तप्ततैले निपातितः ।
निगूहितः शिलास्तम्भे तेन स्वामी हरिर्मम ।।

67. कस्तुरीय इति श्रोतु कामोऽसि खलु सोऽर्जुनः ।
रथयन्ता कृतो येन दुर्मदेन मम प्रभुः ।।

68. इति प्रत्युत्तरं श्रुत्वा स्वात्ममानित्व मत्यजत् ।
पार्थोऽमंस्त च तं विप्रं स्वस्माद्भक्ततरं हरेः ।।

11. तरणोपायः

69. तरन्ति यात्रिका नाव्यां तालदघ्नीं क्वचिन्नदीम् ।
कश्चिदास्ते ब्राह्मणोऽपि येषु षट्छास्त्रपारगः ।।

70. आमूलाग्रं तस्य श्रुतिस्मृतिपुराणशास्त्रसङ्घातः ।
कण्ठस्थो येन दिवा निशमुत्स्वप्रायते स तद्गाथाः ।।

71. श्रुतिस्मृतीः शास्त्रङ्क्तीश्चेद्धृत्योदाहरत्यसौ ।
महद्भिरपि विद्वद्भिः पुंवाणीति प्रशस्यते ।।

72. यात्रासहचरैस्तैस्तैस्संलपन् स विकत्थते ।
पाण्डितीं जयपत्राणि बिरुदांश्च मुहुर्मुहुः ।।

73. किमधता आम्नायास्तर्को वेदान्तशास्त्रं वा ।
योगो वा? साङ्ख्यं वा त्वयेति पृच्छत्स नेति तैरुक्तः ।।

In Public domain. Digitization Muthulakshmi Research Academy

74. यावत्प्रविष्टमुडुपम् नदीगर्भं प्रभञ्जनः ।
ताव द्दवौ महाभीलम् मज्जय न्निव तं प्लवम् ।।

75. डोलयिते तडुपे क्रमशो नद्यां निमग्नभूयिष्ठे ।
विप्रं यात्रिक आह प्ववविद्या शिक्षिता न भवतेति ।।

76. नाधीती वेदेषु नच वेदान्तेष्वहं पठिती ।
प्लवविद्याया मेव कृतीति स वदन् क्षणान्नदीमतरत् ।।

77. तरणोपायोऽज्ञातः शुकवद्विद्यास्त्वया परमधीताः ।
तरसि कथं भवसिंधुम् मग्नोन्मग्नो भवे मूढ! ।।

12. गोविन्ददर्शनम्

78. अज्ञातभर्तृवदना हन्तैका बालिका विधवा ।
सख्यस्तस्या स्सर्वाः श्रृण्वन्ती भर्तृमत्य इति ।।

79. उपसृत्य पितरमवदत् तात क्वास्ते पतिर्मदीयः इति ।
जातव्यथस्स कथमपि कबलितशोकोऽब्रवीत्पुत्रीम् ।।

80. जाते शृणु ते भर्ता गोविन्दोऽदृश्यमूर्तिरयम् ।
विसृजन्नदृश्यभावम् साक्षाद्भवति त्वयाहूतः ।।

81. हृष्टमनाः पितृवाक्ये विश्वस्यासौ गता स्वशयनगृहम् ।
द्वारं पिधाय साञ्जलि बन्धा पतिदर्शनाय सोत्कण्ठा ।।

82. प्रिय भतः ! गोंविन्द गोविन्द ! भवान् समायातु ।
इत्येकमनास्तं सा समाह्वयन्ती तथा तस्थौ ।।

83. यावन्नायातोऽसौ तावद्गोविन्द ! गोविन्द! ।
गोविन्देति पुनः पुनराह्वयदुच्चैरुदश्रुनयना सा ।।

84. आविर्भूतः पुरस्तस्या स्तदा गोविन्द आदरात् ।
साक्षाद्भवति भगवान् दर्शनातुरचेतसाम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

13.स्नेहपरीक्षा

85. ब्रह्मसत्यं जगन्मिथ्या । नश्यं दृश्य मिदं जगत् ।
अन्वेहि मा मिदं ध्यात्वा । संसारा त्त्वं विमोक्ष्यसे ॥

86. इत्युपादिष्टः शिष्यो गुरुणाऽभ्यदधात्प्रणम्य भो भगवन् ।
मम सन्ति दारपुत्राः पितरौ चासूंस्त्यजन्ति मह्यं ते ॥

87. दृढैस्तेषां स्नेहपाशै र्बद्धो निर्मोक्तुमक्षमः ।
इति प्रतिवदन्तं तमाचार्यः पुनरब्रवीत् ॥

88. ननु यावन्ममत्वं ते तावदेवमपेहसि ।
महत्तरं ममत्वं ते तत्स्नेहादपि च त्वयि ॥

89. यत्स्निह्यन्ति त्वयि ते यच्च प्राणांस्त्यजन्ति तुभ्यमिति ।
सा भ्रान्तिर्मिथ्या वा जानीषे स्वानुभूत्यैव ॥

90. स्नेहस्वरूपयाथार्थ्य मद्य प्रत्यक्षयामि ते ।
इत्युक्त्वा घुटिकामेकाम् प्रदायाचकथद्यथा ॥

91. धुटीयं भुज्यतां गत्वा गृहं येन मृतो यथा ।
दृश्यसे नमृतस्सर्वम् द्रक्ष्यस्याकर्णयिष्यसि ॥

92. उपगम्य तदा तत्र पुनरुज्जीव्यसे मया ।
इति श्रुत्वा गतः शिष्यो घुटीं प्राश्य किलामृत ॥

93. पितरौ दारपुत्राश्च सखायो बान्धवाः परे ।
विलपन्तो मुक्तकण्ठम् पर्यवर्तन्त तं जनम् ॥

94. शिरस्तटं दारयद्भि स्ताडयद्भिरुरोमुखम् ।
विसृजद्भिर्बाष्पधाराः सर्वै र्हा हेत्यरुद्यत ॥

95. एक एव सुतः पित्रो र्विद्यावाञ्शीलवान् युवा ।
वर्धिष्यमाण एतादृङ् न भूतो न भविष्यति ॥

In Public domain. Digitization Muthulakshmi Research Academy

96. इत्यश्रुवदनैस्तैस्तैः शोच्यते प्रतिवेशिभिः ।
दारपुत्रपितृणां तु दुःखं किमिति कथ्यते ? ॥

97. पितुरुच्चैर्मात्रा चात्युच्चैर्मातुरपि तस्य च कलत्रेण ।
अनुमरणमेव शरणं ममेति रुदितं कृतं बताविरतम् ॥

98. इत्थम्भूते वस्तुनि तत्रायातो जनः कश्चित् ।
श्रुततच्छोकोदन्तः शनैः शनैस्तं मृतं नरं प्राप्तः ॥

99. तस्य नाडीं परीक्ष्यासौ मृतस्याप्तानभाषत ।
प्रमीतो दृश्यमानोऽपि पुनरुज्जीवितो भवेत् ॥

100. अस्ति दिव्यौषधं येन मुहूर्ताद्धारयत्यसून् ।
श्रुत्वेदं शान्तदुःशास्ते साक्षाद्देवं तमास्तुवन् ॥

101. अथ तूष्णीमवस्थाय क्षणं विप्रोऽवदत्पुनः ।
भुज्यतां येन केनापि घुटीयं तेन जीव्यते ॥

102. इति तद्वचनं श्रुत्वा सर्वेऽहंप्रथमिकाभाजः ।
परिवव्रुरौषधार्थं यदा तदाऽवाद्यनेन पुनरित्थम् ॥

103. नूनं स्निह्यन्त्यस्मिन् विजीवितेऽतीव सर्वेऽपि ।
दातुं स्वप्राणानपि तस्मै यूयं हि सन्नद्धाः ॥

104. अवधत्त ! संशृणुध्वं येन घुटी भुज्यते प्रमीतकृते ।
म्रियते सद्यः स परन्त्वेष मृतो जीवति क्षणादेव ॥

105. यावच्छ्रुतं वचस्तत्तावद्ये सन्ति सन्निहिताः ।
भैषज्यभक्षणार्थं तैः पश्चात्कृतपदैः स्थितं दूरे ॥

106. अथ तस्य मृतस्य पिताऽहूतो भैषज्यभक्षणाय तदा ।
अवदद्वृद्धः सन्नद्धो हातुं प्राणान् सुतस्यार्थे ॥

107. किन्त्वस्ति प्रतिबन्धो नहि चलतीषत्कुटुम्बचक्रं मे ।

In Public domain. Digitization Muthulakshmi Research Academy

यदि नस्यां नैकोऽपि किं किं कुत्रास्ति वस्तु जानाति ॥

108. माता तस्य तदावोचत् सज्ञामर्तुं सुताय मे ।
किन्त्वस्ति कोऽप्यन्तरायो गर्भिणी मम पुत्रिका ॥

109. तस्याः प्रसूतिकातन्त्रं मदन्या काऽत्र निर्वहेत् ।
मम मृत्युं समाकर्ण्य सा म्रियेत तपस्विनी ॥

110. तत्कलत्रं ततः प्राह स्त्रीणां सर्वाधिकः पतिः ।
पतिशून्यं जीवितं मे निर्गन्धकुसुमायते ॥

111. मृता स्यां यदि मे भर्ता जीवन्नन्यां ग्रहीष्यति ।
को नु रक्षदस्फुटाक्षान् क्षीरकण्ठान् शिशूनिमान् ॥

112. इति सर्वाः कथाः श्रुत्वा मृतोऽयमिति चिन्तितः ।
उत्थाय प्राञ्जलिः शिष्यो गतभ्रान्तिर्गुरुं नतः ॥

14.अर्धज्ञानमनर्थाय

113. इदं जगद्ब्रह्ममयं सर्वे ब्रह्मस्वरूपिणः ।
अयमद्वैतसिद्धान्तो राजन्! चित्तेऽवधीयताम् ॥

114. इत्युपदिष्टो गुरुणा वेद्यं सर्वं विदितमिति ध्यायन् ।
सन्निहितां निजमहिषीं राजा वीक्ष्यैकदा जगादैवम् ॥

115. इदं जगद्ब्रह्ममयं सर्वे ब्रह्मस्वरूपिणः ।
मिथ्या खलु ततो भेदो राज्ञीदास्योऽस्तु तत्त्वतः ॥

116. इत्युक्त्वा क्षणमास्थाय स निश्शकमभाषत ।
अद्यप्रभृति दासी ते राज्ञीभवितुमर्हति ॥

117. इत्यशनिघातसदृशं वचनं श्रुत्वा विमुह्य सा देवी ।
प्रतिवचनमप्यदत्वा मूकेवावस्थिता चिरं तत्र ॥

118. ततो दूत्या समाहूतमाचार्यं प्रणिपत्य सा ।

In Public domain. Digitization Muthulakshmi Research Academy

प्राप्ततत्त्वोपदेशस्य कथां पत्युर्न्यवेदयत् ॥

119. उपदिष्टः सदर्थोऽपि कदर्थोऽनधिकारिणि ।
विपरीतगुणं सूते भैषज्यमशितं क्वचित् ॥

120. गुरुराश्वासयन् राज्ञीमब्रूताद्याम्ब! भुज्यते ।
मया त्वन्मन्दिरे भर्तुः पङ्क्तौ किन्त्विदमाचर ॥

121. इति कर्णेऽस्याः कञ्चिन्मन्त्रमुपादिक्षदाचार्यः ।
यस्य पुरश्चरणार्यं स्वगृहस्याभ्यन्तरं गता देवी ॥

122. अश्नतोः पात्रयो राज गुर्वोः प्रभ्वी समागता ।
न्यास्थद्रोमयपिण्डं यं दृष्ट्वा राजाऽजुगुप्सत ॥

123. धिग्धिगित्युच्चरन् यावदुग्रम्पश्यस्य उत्थितः ।
तावत्स देशिकोऽवादीत् को भेदो गोमयान्नयोः ॥

124. इदमन्नं गोमयं च ब्रह्मरूपमसंशयम् ।
यथा दासी च राज्ञी च ब्रह्मैवेत्यवगम्यते ॥

125. घृतधारया यथाग्निस्समुज्ज्वलन् क्रुद्धपूर्वोऽयम् ।
अवधीरणयाचार्यं त्वमिदं भुङ्क्ष्वेत्यगर्जदत्युच्चैः ॥

126. गुरुरवदद्धो भुञ्जे वीक्षस्वाद्येति पश्यति स पत्यौ ।
मुकुलितवदने गुडवत् सुखेन कबलीचकार तं पिण्डम् ॥

127. दृष्ट्वा सिद्धाद्वैतभावसतमाचार्यं स भूपतिः ।
सलज्जः प्रणिपत्याह भगवन् क्षम्यतामिति ॥

15.योगप्रभावः

128. चिरेण तपसा क्रीता अमोघा योगशक्तयः ।
केनचिद्योगिना ब्रह्म रथेनोह्यत एव यः ॥

129. कृता हि क्षेत्रिया रोगाः शान्ता मन्त्राम्भसा नृणाम् ।

In Public domain. Digitization Muthulakshmi Research Academy

भस्मधूल्या भूतपीडा विषो मन्त्रैरपास्यते ॥

130. कृतहस्तो जलस्तम्भे वाय्वग्निस्तम्भयोरपि ।
न कथं शस्यते लोकैर्दिव्ययोगीति तादृशः ॥

131. मूत्रेण ज्वाल्यते दीपः सुगन्धिः क्रियते च विट् ।
निवार्यते हृच्चलन तत्सिद्धत्वं ब्रुवन्त्यमी ॥

132. दत्तै रुपायनैर्भक्तैः शिष्यैश्चास्मै दिने दिने ।
भूतपूतः कुटीरोऽद्य जातं सौवर्णमन्दिरम् ॥

133. कुहनाविप्रो भगवान् कदाचिदुपसृत्य योगिवरम् ।
अभियुक्तस्तद्गोष्ठ्यामकुण्ठितं तन्महत्त्वमस्तावीत् ॥

134. अवदच्च ततो भगवन्! चापल्यं क्षम्यतां, बहोः कालात् ।
अभिलष्यते मया ते प्रत्यक्षं योगशक्तिमवगन्तुम् ॥

135. दृश्यतामित आयाति गच्छच्छैलोमङ्गजाः ।
किमयं भवतो योग प्रभावेन मृतो भवेत् ॥

136. श्रुत्वैतां प्रार्थनां योगी कियदेतदिति ब्रुवन् ।
व्यकिरद्भसितं येन गजः क्रन्दन् मृतोऽपतत् ॥

137. स गतश्चित्रं नाम स्तुवन् प्रभावं सहस्रशः प्राह ।
भगवन् ! पुनर्गजोऽयं जीवत्विति सद्य एव स प्राणीत् ॥

138. माया योग्यवदद्भोः कियच्चिरं भगवता तपस्तप्तम् ।
येनादृष्टश्रुतचर ईदृग्दिव्यप्रभाव उपलब्धः ॥

139. अपनीयतां महात्मन् ! शङ्का मे मारितः क्षणेन गजः ।
पुनरकृतलब्धजीवः किमनेनासाद्यते मोक्षः ॥

139. इत्युक्त्वा प्रतिवचनं तस्यालब्ध्वा निरीक्ष्य च मुहूर्तम् ।
प्राप्तोऽदृश्यत्वं स । व्यरमत्तत्प्रभृति योग संरम्भात् ॥

In Public domain. Digitization Muthulakshmi Research Academy

16.कौपीनरक्षणम्

140. न वाति नरगन्धोऽपि यत्र ग्रामबहिस्तटे ।
सृष्ट्वाश्रमं कोऽपि भिक्षुर्वीतरागोऽवसत्पुरा ॥

141. प्रतिबुद्धः कुक्कुटेन स्नात्वा निर्झरवारिषु ।
धृत्वा कौपीनमेवायमामध्याह्नं तपस्यति ॥

142. तद्वैराग्यं तपस्तस्य वीक्ष्य धन्यत्वकङ्क्षिभिः ।
अहं प्रथमिकाभाग्भिर्भिक्षापौरैः समर्प्यते ॥

143. स भिक्षार्थं बहिर्गत्वा यावदायाति मूषकः ।
तावत्कौपीनमेतस्य कल्पयामास खण्डशः ॥

144. परेद्युरेवमेवाभू दपरेद्युश्च तत्तथा ।
कौपीनस्यापिदारिद्यादभूद्भिक्षुरकिञ्चनः ॥

145. भिक्षया सह कौपीनस्यार्थिनं कोऽप्युपादिशत् ।
बिडालः पुष्यतां यस्मादाखोः पीडा निवर्तते ॥

146. अभिनन्द्य तमुपदेशं गत्वा सद्यः पुरे परिभ्रम्य ।
आनीय बिडालार्भकमवर्धयद्याचित्तैः क्षीरैः ॥

147. दिव्यं तत्सुमुहूर्तं यस्मिन् मार्जालपादनिक्षेपः ।
आश्रमभुवि तत्प्रभृति गतासुपीडः स आप सुखनिद्राम् ॥

148. विवराद्बहिरागच्छन् दृष्टो मार्जालकेन बिभ्यदयम् ।
प्रविशत्यन्तः पश्यति मुहर्मुहुर्विवरतः समुत्थशिराः ॥

149. यथावदास्ते कौपीनं मूषकास्पृष्टमातपे ।
स तपस्वी बिडालं तममन्यत तपः फलम् ॥

150. उपरम्य जपाद्विप्रः पश्यन् मार्जालशाबकक्रीडाः ।
हसति पुनर्जपति पुनः पश्यति हसति च निमीलयति च दृशौ ॥

In Public domain. Digitization Muthulakshmi Research Academy

151. एवंविधया ह्रस्वं क्रमाद्ध्रसीयो ह्रसिष्ठं च ।
भवतिस्मान्ते चाभूत् प्रलुप्तभूयिष्ठमेव तस्य तपः ॥

152. अवसन्नायां रात्रौ प्रबुध्यमानेन पात्रहस्तेन ।
तेन पयोऽर्थं प्रत्यहमटाट्यते प्रतिगृहं ग्रामे ॥

153. द्वित्राण्यहानि दत्तानि तस्मै क्षीराणि याचितैः ।
नेत्यवाचि तुरीयेऽह्नि गम्यतामिति पञ्चमे ॥

154. यथाकथञ्चिद्यच्छाम भिक्षां तुभ्यं कुतः पयः ।
आनीयते बिडालाय क्रीयतां गौः पयस्विनी ॥

155. पर्याप्तं पीयतां क्षीरं बिडालेन च पाय्यताम् ।
दैनिकोऽयं पादयात्रा क्लेशस्ते व्यपनीयते ॥

156. इत्यादिष्टो गृहस्थेन केनचिच्चिन्तयन्निदम् ।
स बाढमिति गां क्रेतुं कथञ्चिद्धृदयेऽकरोत् ॥

157. पथिकात्परलोकस्य कस्मैचिद्दातुमिच्छतः ।
प्रत्यग्रहीद्धेनुमेकां मृतकल्पां धरामरः ॥

158. पुण्यतस्तस्य गोधेनुर्जीविताऽश्रमशाद्वले ।
चरन्ती स्वेच्छया जाता पीवराङ्गी घटोध्न्यपि ॥

159. सायं प्रातश्च पर्याप्तं क्षीरं तस्मै प्रयच्छति ।
यत्पीत्वा विप्रमार्जालौ पीनौ जातौ दिनक्रमात् ॥

160. रजन्यामप्रबुद्धायां प्रबुद्धो दोग्धि तत्पयः ।
मार्ष्टि गोष्ठं तृणंश्छिन्ते तत्क्रियास्वेव गाहते ॥

161. लीढभूयिष्ठमभवद्बिडालेनैव तत्तपः ।
अवशिष्टं यत्तदद्य कबलीक्रियते गवा ॥

162. स पतत्याश्रमप्रान्तपल्लीग्रामेष्वनेकशः ।

In Public domain. Digitization Muthulakshmi Research Academy

गोग्रासार्थं पीडितैस्तैर्दीयतेत्वल्पशोऽल्पशः ।।

163. याञ्चार्थमागतं पश्यन् कोऽप्याह भ्रुकुटीमुखः ।
ननु दत्तं मया ते ह्यो गम्यतामित्यवज्ञया ।।

164. अपरेद्युः कश्चिदाह ब्राह्मणाहिण्ड्यते कुतः ।
प्रतिग्रामं प्रतिदिनं यस्मै कस्मैचिदर्थिना ।।

165. क्रीणीहि क्षेत्रखण्डं यत्प्रसूते सर्वसम्पदः ।
पुष्णात्वीदृग्गोसहस्रं भुङ्क्तां दत्तां स्वयं भवान् ।।

166. इत्युक्तमात्रो विप्रोऽसौ सम्यक्सञ्चिन्त्य तद्वचः ।
गत्वाश्रमप्रान्तदेशं वशीचक्रे परेद्यवि ।।

167. उद्धर्तुं कण्टकान् क्षेत्रात् क्रष्टुं वप्तुं ततः क्रमात् ।
सस्यानां वर्धनाद्यर्थे न्ययुङ्क्त च भटान् बहून् ।।

168. कृषिकर्मसु निर्मज्ञन् उन्मज्ञंश्च प्रतिक्षणं ।
शिरोदघ्नेषु विप्रस्स यत्र कुत्राप्यटाट्यते ।।

169. यत्किञ्चित्कार्यार्थं दिने दिने कुत्रचित्प्रयातस्य ।
प्रविलम्ब्य गृहायातस्याऽस्यान्नं कोऽपि नास्ति सज्ञयितुम् ।।

170. अन्यमुपायमपश्यन् युवतीकरमग्रहीत्ततस्तेन ।
निरमायि रम्यसौधः स्पृहणीयसमस्तवस्तुसम्पूर्णः ।।

171. नियुक्ताः किङ्करास्तेन किङ्कर्यश्च शतं गृहे ।
तत्क्षेत्रं सूयते स्वर्णं सामन्तोऽस्तेऽभवद्यतिः ।।

172. असंलब्धावकाशेन स्नातं तप्तं न तेन धिक् ।
मलकूपस्थकृमिवत् सोऽयं जीवति संसृतौ ।।

173. आचार्येण कदाचित् पृष्टो नत्वा सलज्ज सः ।
कौपीनरक्षणार्थमयं पटाटोप इति समाधत्त ।।

In Public domain. Digitization Muthulakshmi Research Academy

174. गुरुदेव! प्रसीदात्र वस! गृह्णन् मत्कृताथिथेयमिति ।
प्रार्थितवन्तं शिष्यं न्यक्कृत्य यथेच्छमेव गुरुरगमत् ।।

17. सर्वं विष्णुमयं जगत्

175. कृतगुरुबोधः सर्वं विष्णुमयं जगदिति प्रबुद्धमतिः ।
साक्षात्कृतधर्मा कोऽप्यगमत्परिहाय गेहमात्मीयम् ।।

176. न परस्यात्मना किञ्चिन्नपरेणात्मनोऽपि च ।
श्वानं विप्रं च मनुते हरिरित्येव सञ्चरन् ।।

177. अयमव्याजं शिशुरिव हसन् प्रमत्त इव दिक्तटान् धावन् ।
क्रन्दन् भूताविष्टो यथा जनैश्चिन्तितो मतिभ्रष्टः ।।

178. पर्यटते रथ्यासु साध्वी काचित्कृपावती तस्मै ।
अददादोदनपिण्डं यमयं गृह्णन् गतस्तरोर्मूलम् ।।

179. अश्नतस्तस्य पात्रेऽन्नं भुङ्क्ते कश्चन कुक्कुरः ।
दत्त्वैकं कबलं तस्मै तेनैकं भक्षितं मुदा ।।

180. अवलोक्य तं हसत्सु जनेषु मत्तोऽयमिति कृत्वा ।
सोऽब्रूत हरेः पार्श्वे हरिरुपविष्टोऽन्नमश्नाति ।।

181. भो भो यूयं हरयो वृक्षा हरयोः विहङ्गमा हरयः ।
हरयः पशवश्च विना हरिं न किञ्चिदपि दृश्यते लोके ।।

18.दारदासः

182. सेवाभ्यर्थी कश्चन विप्रकुमारः सुरालयानिव धिक् !
कार्यालयाननुदिनं प्रदक्षिणीकृत्य निर्याति ।।

183. तत्र प्रतिष्ठितो देवो नादात्तस्मै स्वदर्शनम् ।
स तपस्वी स्थितो दूरादभिवादयते मुहुः ।।

184. यद्यपि तथापि कथमपि सन्दृश्य महाधिकारिणं कमपि ।

In Public domain. Digitization Muthulakshmi Research Academy

स्वीयान् व्यजिज्ञपत्स दुर्भरदारिद्र्यदेवताविकृतीः ॥

185. प्राचीकटद्दयां श्रुत्वा कथां हृदयदारिकाम् ।
परेभ्योऽयं खलु श्रेया नन्धात्केकरदृग्यथा ॥

186. संलप्य सुधामधुरैर्वचोभिरन्तेऽधिकार्यवदत् ।
नापेक्षितो नियोज्यो ममाधुना पश्य! मां पुनरपीति ॥

187. अपरेद्युरागतं तं न मेऽद्य सम्भाषणावकाशोऽस्ति ।
पुनरायाहि ! श्वो वा परश्व इत्यब्रवीत् स गतः ॥

188. एवं सेवालुब्धो निरशन उच्छूनपादयुग्मः सः ।
कार्यालयस्य सततं प्रदक्षिणानाचरत्येव ॥

189. निष्फलांस्तस्य यत्नांस्ता नूषरक्षिप्तबीजवत् ।
दृष्ट्वा सुहृत्कोऽप्यवादीत् कियान् मूर्खोऽसि रे ! सखे! ॥

190. जनश्रुतिः श्रूयतेऽत्र दारदासोऽधिकार्यसौ ।
आराधिता देवता सात्वनुगृह्णाति ते वरम् ॥

191. अलमन्यैः प्रयत्नैर्भो गच्छाद्यैव तदन्तिकम् ।
सत्यं श्वो वा परश्वो वा बहुना किं? नियोक्ष्यसे ॥

192. इत्यादिष्टमहामन्त्रः शतच्छिद्रपटं दधत् ।
बुभुक्षार्तः शुष्कवक्त्रोऽपश्यद्देवीं नियोगिनः ॥

193. श्रुत्वा सा शोच्यकथां द्रुतहृदयाऽश्रूणि मुञ्चन्ती ।
यत्किमपि दातुमैच्छत् परन्त्वनिच्छन् ग्रहीतुमयमवदत् ॥

194. अनपेक्षितमम्ब! धनं । प्रसीदानुगृहाण! माम् ।
इत्यूचिवांसं देव्याह मया किं क्रियतां भण ! ॥

195. अम्ब! भवद्वाक्साह्यं मदपेक्षितमस्त्यहं तु सेवार्थी ।
अनुगृह्यातां यथाहं भर्त्रा तव जीविकाप्राप्तः ॥

In Public domain. Digitization Muthulakshmi Research Academy

196. इत्युक्तमात्रा देव्याह किमियन्मात्रमेव वा? ।
प्रभुं वक्ष्याम्यद्य रात्रौ प्रातरागम्यतामिति ॥

197. परेद्युः प्रातरागत्य दृष्ट्वा तौ दम्पती पुरः ।
पुष्पोद्याने सञ्चरन्तौ प्रणमन् दूरतः स्थितः ॥

198. आहूय भर्ता ब्रूते स्म लेखकस्त्वं नियोजितः ।
कार्यालये मदीयेऽद्यारभ्यैवायाहि सज्जितः ॥

199. इत्युक्तस्स गजारूढ इवात्यानन्दतुन्दिलः ।
कार्यालयमगच्छद्यं तदध्यक्षाय दर्शयन् ॥

200. भर्ताऽहाऽयं कुशलः क्रियासु शान्तो युवा ऋजुप्रकृतिः ।
अत्र नियुक्तोऽद्येति तेनाभिहितं च बाढमेवेति ॥

201. नाचीचलद्भर्तृचित्तमार्तकण्ठस्वरस्तथा ।
अचीचलत्स्वदाराणां कलकण्ठस्वरो यथा ॥

19.पणबन्धः

202. क्रीडन्तौ पुरतौ मातुर्गजाननषडाननौ ।
वीक्ष्यास्पृहयतां कण्ठहाराय युगपत्तदा ॥

203. अवदज्जननी भूमिं प्रदक्षिणीकृत्य मां प्रथमम् ।
प्राप्तो ग्रहीतुमर्हति श्रुत्वेदमगच्छतामुभौ पुत्रौ ॥

204. स्कन्दो मयूरमारूढः प्रस्थितो नभसः पथि ।
गत्वा द्वैमातुरोऽकार्षीज्जनयित्र्याः प्रदक्षिणम् ॥

205. कृतकृत्यं प्रणमन्तं विलोक्य पुत्रकमदादम्बा ।
तावत्स्वग्रैवेयं न यावदायाति षण्मुखस्तत्र ॥

206. फेनायमानवदनः स्विन्नाङ्गः स्कन्द उपसृत्य ।
दृष्ट्वा कण्ठे भ्रातुर्हारं सम्भ्रान्त इदमवदत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

207. अम्ब लम्बोदरो भ्राता वाहनेनाखुना कथम् ।
भूमिं प्रदक्षिणीकृत्याऽकालहीनं स आगतः? ॥

208. गजमुख आह श्रुणु! भो माता गर्भस्थवेधोऽण्डा ।
जननीप्रदक्षिणेन हि सिद्धप्रायं प्रदक्षिणं भूम्याः ॥

20. सर्वे जन्तव ईश्वररूपिणः

209. सर्वान् जन्तून् पदार्थांश्च निश्चित्येश्वररूपिणः ।
प्रणम्यन्तामितिच्छात्र बृन्दं गुरुरुपादिशत् ॥

210. आहर्तुं समिधः कश्चिच्छात्रो यावद्वनेऽटति ।
तावच्छ्रुतमपेत! द्राग्गजो मत्तोऽभिधावति ॥

211. इत्याकर्ण्य वचः सर्वे विना छात्रेण केवलम् ।
मत्वा तं मूर्तिमन्मृत्युं जङ्घाबलमुपाश्रयन् ॥

212. अभिधावन्तं करिणं परमेश्वरमेव निश्चित्य ।
छात्रः प्राञ्जलिरस्तौत् सहस्रशीर्षा पुरुष इति महोच्चैः ॥

213. रे! रे! अपेहि! दूरादपेह्ययमकालमृत्युरायाति ।
इति घोषितमपि शतशो हस्तिकेन, स्थितोऽयमवगणयन् ॥

214. उपधाव्य मदेभेन तुण्डाग्रेण समुद्धृतः ।
दूरोत्क्षिप्तो भग्नशल्योऽपतच्छात्रः शिलातले ॥

215. तदवस्थममुं श्रुत्वा सर्वे सब्रह्मचारिणः ।
तत्रागत्य सहाचार्यः शोचन्तस्तमुपाचरन् ॥

216. आचार्यः आह भद्र हस्तिपककृतापसारणोऽपि भवान् ।
नापसृतः कुत? इयमद्यापतिता दुर्विपत्त्वयानीता ॥

217. श्रुत्वेदमाह शिष्योभवद्वचः सर्वजन्तुरीश इति ।
कृत्वा प्रमाणकं धिक् हतोऽस्मि तुन्दिल इवापगामध्ये ॥

In Public domain. Digitization Muthulakshmi Research Academy

218. आकर्ण्य गुरुः प्राह यथा करी निश्चितस्त्वयेश इति ।
हस्तिपकोऽपि तथैव निश्चेयोऽस्त्येव रे! मूर्ख! ।।

द्वितीयो भागः

1. एकलव्यम्

1

1. आजानुबाहुयुगल ओजस्तेजस्समुद्वमत्कायः ।
उज्ज्वलकपाटवक्षा यात्येको मूर्तिमद्वीर्यम् ।।

2. करयोश्शराश्शरासस्तूणीरं पृष्ठके, गलेऽविरले ।
गुञ्जासराश्चकाशे कट्यां हरिणाजिनाम्बरं यस्य ।।

3. आगत्यायं भक्त्याऽचार्यद्रोणस्य पादयोः पतितः ।
अवददहमेकलव्यो हिरण्यधन्वाख्य वनचरेन्द्रसुतः ।।

4. धनुर्विद्याऽध्यापिता मे तातपादैर्मयाऽधुना ।
विद्यानिष्णातामाप्तुं प्राचार्यः प्रविचीयते ।।

5. धनुराचार्यैः सर्वैर्भवान् स्तुतश्चापवेदनिष्णातः ।
प्राप्तव्य इत्यवोचन्नाशंसे शम्यतेऽत्र तृष्णेति ।।

6. आचार्यदेव! भवदाज्ञप्तः पितृशिक्षितां धनुर्विद्याम् ।
इच्छामि दर्शयितुमिति ब्रुवाणमुत्थाप्य तं गुरुरगादीत् ।।

7. अयि बाल व्यपदिशसि किरात इति वेदवद्धनुर्वेदः ।
नोच्चार्यते मन्त्राः संस्कृतिबाह्यैर्जनैर्यथाविहितम् ।।

8. स्वरवर्णहीनमन्त्रान्न केवलाऽपेक्षितालाभः ।
अनपेक्षितं च लभसे कूपात्खनकः पिशाचमिव घोरम् ।।

9. नाध्याप्योऽव धनुर्वेदस्तृष्णा तव न शाम्यति ।
अलमन्यथा विचिन्त्य हितैषी कथयामि ते ।।

In Public domain. Digitization Muthulakshmi Research Academy

10. श्रुत्वैतदेकलव्यो भग्नाशोऽत्यन्तदूनात्मा ।
प्राञ्जलिराज्ञां गन्तुं द्रोणमयाचिष्ट शीर्षमवनम्य ॥

11. बाष्पायमाणनयनं दीनास्यं तं गुरुर्वीक्ष्य ।
स्निधो यदृच्छयाह युज्यस्वेष्टेन भोस्त्वमिति ॥

2

12. सङ्कुचितविकृतवदनं नेत्रे पर्यश्रुणी दृशं शून्याम् ।
दधता स्थितं कुटीरोपान्ते केनाऽपि दग्धचित्तेन ॥

13. भजन् द्रोणं शिष्यवृत्त्या भवेयं तदनुग्रहात् ।
सुधन्वेति दिवारात्रं मयोत्स्वप्रायितं भृशम् ॥

14. धिक्कष्टं हतदैवं मनोरथस्य मम मूलमुत्पाट्य ।
सिञ्चत्युष्णजलैर्बत काङ्क्षितसिद्धिः कथन्वपुण्यानाम् ॥

15. नास्त्यधिकस्तुल्यो वा द्रोणस्येति प्रशंसन्ति ।
अन्यत्रास्मात्तीर्थात्तृष्णा मे शम्यते कुत्र? ॥

16. न मया शक्यमवाप्तुं वृक्षाग्रफलं यथा धनुर्विद्या ।
क्रियतेऽत्र मुधा ग्रीवा प्रसारणमूढचित्तेन ॥

17. इति शोचत उच्छ्वसतो नैराश्यादेकलव्यस्य ।
व्यद्योतत विद्युदिव कश्चिद्भावो हृदाकाशे ॥

18. अविलम्बितमुत्थाया सनात्समानीतपङ्कमृत्तिकया ।
निरमायि द्रोणस्य मूर्तिस्तेनाञ्जसा मुहूर्तिर्धे ॥

19. समासीनः पुरस्तस्य पत्रैः पुष्पैरपूपुजत् ।
प्रदक्षिणनमस्कारानाचचार मुहुर्मुहुः ॥

20. अभ्यस्यति यावदयं शरान् पुरो विग्रहस्य, चित्रमिदम् ।
तावत्स्फुरन्ति चित्ते तदस्त्रविद्यारहस्यानि ॥

In Public domain. Digitization Muthulakshmi Research Academy

21. शिक्षयति गुरुर्यद्यत् पाण्डवान् हस्तिनापुरे ।
धनुःशास्त्रे दविष्ठोऽपि तत्तत्सर्वं निशाम्यति ॥

22. अर्चिता प्रतिमा तस्य प्रणतस्य शिरस्तटे ।
हस्तमाधाय वक्तीव त्वं सिध्येत्यस्त्रकर्मणि ॥

23. भगवान् द्रोणाचार्यो दृष्टः स्वप्नेषु तस्य रजनीषु ।
उपदिशति मन्त्रविद्या अध्यापयति प्रयोगतन्त्रांश्च ॥

24. अर्चता प्रतिमामेवं मयाप्ता कृतहस्तता ।
साक्षाद्गुरूपदिष्टास्ते कियत्कौशलमाप्नुयुः ॥

25. न कृतं तावत्पुण्यं मयेति हर्षं कृतार्थतया ।
शोकं चापुण्यतया आतपवर्षाविवाप समकाले ॥

26. भो गुर्वाशीर्वचसः फलं मयाप्तमिति स कृतज्ञः ।
छित्वाऽप्यङ्गं देयाऽवश्यं गुरुदक्षिणेत्यकृतमनसि ॥

3

27. शिक्षमाणं लक्ष्यभेदांस्तं समासद्य कुर्कुरः ।
वने व्यक्षेपयच्चित्तं बुक्कनैः कर्णकर्कशैः ॥

28. तर्जनैर्भर्जनैर्वापि न चलन्नीषदुच्चकैः ।
श्वा बुक्कति स्म येनायं भ्रष्टलक्ष्योऽभवन्मुहुः ॥

29. व्याधेन व्यधितेन सप्त शराः कुप्यता सकृत्क्षिप्ताः ।
संलग्नाः शुनकमुखे विचित्रचित्राकृतिं विदधति स्म ॥

30. शरविद्धः श्वा क्रन्दन् प्रतिध्वनन्तीषु दिक्षु परिधावन् ।
विसृजन् लालाः पश्चात्पश्यन्पश्यन्पलायनं चक्रे ॥

31. वनेऽत्यध्वं तत्र तत्र पर्यट्य शुनमागतम् ।
शरचित्रमुखं वीक्ष्य पाण्डवा विस्मयं ययुः ॥

In Public domain. Digitization Muthulakshmi Research Academy

32. शरशिल्पं श्लाघमानाः स्तुवाना हस्तकौशलम् ।
धन्विनं श्वाविधं द्रष्टुकामास्ते प्रस्थितास्ततः ।।

33. पर्यटद्भिररण्यान्यां तैर्निषादो विलोकितः ।
कुत्रचिन्मृण्मयद्रोण मूर्त्यग्रे शरशिक्षणः ।।

34. आत्मानं गोपयन्तस्ते पश्यन्तस्तस्य कौशलम् ।
दृग्भारभूतं चापस्य शुष्कास्या अतपन् हृदि ।।

35. निशाता एकलव्यस्य बाणा लक्ष्यं न केवलम् ।
किन्त्वलक्ष्यं फल्गुनस्याप्यच्छिन्दन् हृदयं बत! ।।

36. गताः कथञ्चिद्व्याधस्य पुरः स्थिता तमब्रुवन् ।
कस्त्वं? ते व्यपदेशः कः क्व वासोऽस्त्रागुरुश्च कः ।।

4

37. इति पृष्टः प्रत्यवादीत् भ्रातरः! श्रूयतां मम ।
नामैकलव्यो व्याधोऽहं वास्तव्योऽत्रैव कानने ।।

38. भगवांश्चापाचार्यः शैलानां मेरुवत्समुत्तुङ्गः ।
शस्त्रभृतां कीर्तिधनो द्रोणस्तत्पादशिष्यरेणुरहम् ।।

39. मर्मवेधिशरेणेव तदाख्यानेन ते हताः ।
जग्मुस्त्यक्त्वा पाण्डवास्तं तत्तेजोविमुखीकृताः ।।

40. व्याधस्य तेजसा जातो व्रणो हृदि किरीटिनः ।
क्षते क्षारमिवाद्यासीत् द्रोणस्याचार्यकं श्रुतम् ।।

41. ततश्चित्तेन दग्धेन पार्थोऽगच्छत् स्वमन्दिरम् ।
उपगत्य द्रोणमेवावोचद्भ्रूकुटिताननः ।।

42. भवता प्रतिश्रुतं मे कुर्यां ककुदं धनुर्धराणां त्वाम् ।
ऋतमिति मृषोद्यमेतत्त्वतिसर्वः कोऽपि दृष्टोऽद्य ।।

In Public domain. Digitization Muthulakshmi Research Academy

43. अयं किल भवच्छिष्यो न कदापि त्वयोदितः ।
कश्चिदस्तीत्यद्य यावत् किं ते लभ्यं प्रतार्य माम् ॥

44. अतिशेते स धानुष्को नहि मामेव केवलम् ।
परन्तु त्वां त्वदाचार्योस्तदाचार्यांश्च हेलया ॥

45. इति मर्माविधं वाचं ब्रुवाणं क्रुद्धमानसम् ।
प्रतिवक्तुमजानन् स स्थितस्तूष्णीक उन्मनाः ॥

46. शनैः पार्थो निषादस्य धनुषः पारदृश्वताम् ।
लाघवञ्चापि हस्तस्य विस्तरेण न्यवेदयन् ॥

47. स्वात्मानमनुसृतवते समर्चितां तां धनुर्गुरवे ।
प्रतिमां प्रणम्य च शरा नभ्यस्यन्तं किरातमददर्शत् ॥

5

48. अवलोक्य गुरुं दूरात् प्रत्युद्गम्याङ्घ्रिपद्मयोः पतितः ।
प्रक्षाल्य हर्षबाष्पैः स एकलव्यो दृढाभक्तिः ॥

49. दत्त्वा तस्मा अर्घ्यपाद्ये उपवेश्य मृगाजिने ।
वीजयन् गतखेदं तमात्मनोऽशुश्रवत्कथाम् ॥

50. विज्ञाय तस्य भक्तिं द्रोणोऽभिनिविष्टतां, धनुः शास्त्रे ।
निष्णातताञ्च शंसन् परामृशच्चाङ्ककं स्निग्धः ॥

51. प्राञ्जलिरवद्व्याधो भगवन् सुप्रातमद्य पुण्याहम् ।
चिरसञ्चितमात्मीयं भाग्यं फलितमिति निश्चिन्वे ॥

52. व्यथतेत्वात्मा साक्षात्त्वदङ्घ्रिसेवामहाभाग्यम् ।
न प्राप्तमिति महात्मन् धन्योऽहं त्वत्कृपापात्रम् ॥

53. दूरात्करिपुरात्तीर्त्वा नदीः क्रान्त्वा महाटवीः ।
अद्रीनारुह्यावरुह्याऽगतः स्नेह कियान्मयि ॥

In Public domain. Digitization Muthulakshmi Research Academy

54. मनोरथोऽस्ति मे कश्चित् यत्सिद्धिं संशये यतः ।
पुरेव क्रियते व्यर्थ इति शङ्काकुलं मनः ॥

55. अभिलष्यत्यात्मा मे भवते गुरुदक्षिणा समर्प्येति ।
मा वादीः प्रतिषेधं तारय! मां वृण्वभीष्टवस्तूनि ॥

56. धनराशीन् धान्यराशीन् क्षेत्राणि स्वर्णसूनि च ।
यच्छाम्यहं किं बहुना स्वाङ्गं छित्त्वापि दीयते ॥

57. परिग्रहानुग्रहेण धन्यं मां कुरु सर्वथा ।
इत्यूचिवांसमाचार्योऽब्रवीच्छीर्षं मृदु स्पृशन् ॥

58. अहं कथं दक्षिणीयो मया किं शिक्षितं तव
कथं शिष्योऽस्यपूर्वेऽयं शैष्योपाध्यायिकावयोः ॥

59. अभिनन्द्यः सर्वथाऽसि तिष्ठ! त्वं साधयाम्यहम् ।
इति निर्यातुकामं तं दण्डवत्प्रणिपत्य सः ॥

60. गुरुदेव! प्रसीदेष्टां गृहाण! गुरुदक्षिणाम् ।
अनृणं कृतकृत्यं च कुरु मामित्ययाचत ॥

61. दीनालापैर्याचितोऽपि चिन्तयन् दक्षिणां कथम् ।
गृह्णाम्यशिक्षिताच्छिष्यादित्यगृह्णन्नयाद्गुरुः ॥

6

62. ततस्तत्र स्थितः पार्थस्तं प्राप्याह वनेचर!
कश्चिच्छिष्यं कृतीकर्तुमाचार्येण प्रतिश्रुतम् ॥

63. शिष्यस्त्वं यदि गृह्येथाः प्रतिज्ञाभङ्ग आपतेत् ।
येनाचार्यो दूषितः स्यात् ततस्तेनावधीरितः ॥

64. यथास्याद्दजुराचार्यः कृतार्थस्त्वं यथा भवेः ।
कश्चित्तथाविधोपायः कथञ्चिदपि चिन्त्यताम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

65. एवंवदति किरीटिनि विषण्णचित्तेन तेन शबरेण ।
कथमप्याचार्यस्य शिष्यत्वं प्रीणता समाधायि ॥

66. प्रतिज्ञातः शिष्य एव क्रियतां गुरुणा कृती ।
द्रोणशिष्योऽयमित्येतदलं मे केवलं यशः ॥

67. जीवाम्यहं शिष्यरेणुर्भ्रात! मास्तु ममेतरत् ।
इतिकर्तव्यतामूढं कर्तव्येऽद्य नियुंक्ष्व माम् ॥

68. तेन हृष्टः पाण्डवोऽख्यत् यद्येवमुपपद्यते ।
त्वद्दक्षिणकराङ्गुष्ठो गुरवे दक्षिणार्प्यताम् ॥

7

69. इति वचनेऽवसिते स व्याधश्छित्त्वात्मनोऽङ्गुष्ठम् ।
गुरुदक्षिणां समार्पिपदाचार्यार्थं तदा तस्मै ॥

70. गुरोरनपराद्धास्याऽपतन्मूर्धनि दुष्कृतम् ।
पाण्डुपुत्रस्यासहिष्णोर्वनेचरयशो घ्नतः ॥

71. भगवान् द्रोणस्सदयः शिष्यस्य हितं विचिन्त्य पार्थस्य ।
कबलीचकार शूली विषमिव हा! हन्त! तदपयशः ॥

2.रुरुप्रमद्वरम्

1

72. फलपुष्पाण्यलभ्यानि पश्यन्त्यै लब्धुमिच्छया ।
अपचित्याग्रशाखाभ्यो रुरुस्तस्यै प्रयच्छति ॥

73. पुष्पधूल्याकुले नेत्रे भोः! फूत्कुर्विति याचते ।
मास्राक्षीरिति वक्तारं स्पृशत्येव हसन्मुखी ॥

74. सवयोभिः सरवीभिस्तां क्रीडन्तीं बालिकां जिताम् ।
धारयन्तीं सन्निधाय रुरुर्मोचयति स्वयम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

75. विधूनयन् पुष्पशाखास्तरोः कन्यामथस्थिताम् ।
अभिषिञ्चन् सुमासारैरभिषिक्तस्तया पुनः ॥

76. कलस्वरं हसन्ती सा निकुञ्जेषु निगूहिनम् ।
गुप्तक्रीडासु धावित्वा मृग्यन्ती संस्पृशत्यमुम् ॥

77. परस्परं प्रश्नयन्तौ निगूढार्थाः प्रहेलिकाः ।
तौ पर्यायेण जयिनौ हसतः जितौ मिथः ॥

78. उदञ्च्यते जलं तेन सिच्यन्ते तरवस्तया ।
आद्यानि मे तवान्यानि फलानीत्याह हासिनी ॥

79. अन्विष्यन्ती तत्र तत्र रुरुमेवोपगच्छति ।
आहूताऽपीतरैर्बालैरध्येतुं बालिकामणिः ॥

80. यथाच्छायात्मनस्तस्य तच्छाया च यथात्मनः ।
पतेदङ्के तथा स्थित्वा बाला सन्ध्यासु मोदते ॥

81. शिलाघातात्स्रवद्रक्त पादाग्रां रुदतीं रुरुः ।
प्रमृज्य बाष्पाण्युद्धृत्य वहन् स्कन्धेन गच्छति ॥

82. क्रीडन्त्याश्चरणे तस्याः कण्टकेन क्षते बत! ।
पश्यतः कण्टकशतैरुरोः पादः क्षतो भवेत् ॥

83. बालशाखा बालशाखास्वियं वल्लीषु वल्लरी ।
मयूरी च मयूरीषु चरन्ती तत्र दृश्यते ॥

84. नाश्नात्यददती तस्मै यत्किञ्चिदपि बालिका ।
दत्तं परैश्च यत्स्वस्मै तदर्धं सोऽपि यच्छति ॥

85. हसिता तेन शुकीति गोरंकुस्त्वन्त्वसीति सा ब्रूते ।
हरिणीत्यपहसिताऽह हरिणस्त्वमसीति च प्रगल्भेव ॥

86. तस्य तरोरेव फलं स्वादीयोऽभूत्तया करस्पृष्टम् ।

In Public domain. Digitization Muthulakshmi Research Academy

तस्यैव च प्रसूनं तयात्वपचितं रुरोः सुगन्धितरम् ॥

87. अवीक्षमाणावन्योऽन्यं न क्षमेते मुहूर्तकम् ।
उत्तानहृदयौ दृष्ट्वा तौ नन्दन्त्याश्रमस्थिताः ॥

2

88. कालेन गच्छताङ्गेषु सन्नद्धं यौवनं तयोः ।
शनैर्दूरापसृतयोश्चिते संश्लिष्यतो मिथः ॥

89. उपक्रमेते सल्लापमन्योन्यं तौ यथापुरम् ।
गद्गद्यन्तौ वचोमध्ये त्रुट्यन्तौ लपतस्तदा ॥

90. सङ्गच्छेते न चान्योऽन्यं सङ्गम्यापि न पश्यतः ।
परिवृत्य मुखे दृग्भिर्जेघ्नीयेते शरैरिव ॥

91. आत्मनः शैशवक्रीडा गोष्ठीचेष्टास्तदा तदा ।
प्ररोमन्थायमानाभ्यां ताभ्यामानन्द्यते मनः ॥

3

92. निहताऽकाण्डे काचिद्बालशुकी प्रेमपात्रमाश्रमिणाम् ।
स्थूलोतुना कदाचिद्यच्छुत्वा तापसैश्च बहुरुदितम् ॥

93. नलिनीं ललामभूतां सरसो गज उज्जहार मदमत्तः ।
छिन्ना मूले लतिका मनोहरा मूषिकेण हतकेन ॥

94. दुःशकुनान्यवलोक्य प्रत्यक्षं प्राप्य दुःस्वप्रान् ।
शङ्कितमतिभिर्मुनिभिर्विनिश्चितं शान्तिकर्मणां कृतयो ॥

4

95. सह तापसकन्याभिः खेलन्ती बालिका प्रमादेन ।
पादेनामर्द्याऽहिं तेन क्रुद्धेन हन्त! सन्दष्टा ॥

96. फेनायमानसृक्का तिमिरपिहितदृग्विलुप्तमुखकान्तिः ।

In Public domain. Digitization Muthulakshmi Research Academy
निश्चलकनीनिका च प्रमद्वराऽम्रियत हन्त! हा! हा! धिक्! ॥

97. घ्नन्त्यात्मानं दृष्टमात्रं जना इत्युत्थदुष्फणः ।
जागर्ति सर्पः सन्दष्टुं मर्षयेत् किं प्रमर्दितः? ॥

98. सख्यस्तस्या रुदत्यस्ताः सोरस्ताडं प्रधाविताः ।
आवेदयन्नाश्रिमिभ्यो वैक्लव्याहतचेतसः ॥

99. अस्तङ्गतेवेन्दुकला वातोद्धूतेव दीपिका ।
मृता सा येन संच्छन्नं दिवाऽपि तमसाऽश्रमम् ॥

100. भगिनी मम कुत्रास्ते? स्वसा मे क्वास्ति? हा! हताः ।
अविधा! अविधेत्युच्चैः सख्यः क्रन्दत्य आगताः ॥

101. विवर्णवदना बाष्पधाराक्लिन्नमुखा मृगाः ।
पश्यन्तः पालनीं स्वीयामनदन्तस्तृणं स्थिताः ॥

102. व्यरमन्नृत्यात् केकी व्यरमद्वत कोकिलापि कलगानात् ।
विरतवचाः कीरोऽपि तच्छिष्यतया कृतज्ञभावेन ॥

103. जलसेकैरालवालेष्वात्मानं दोहदैश्च सा ।
सम्पोष्यावर्धयच्चेति वृक्षैर्मूकैः स्थितं शुचा ॥

5

104. दुःखोदन्तममुं श्रुत्वा रुरुः शोचन् प्रमूर्छितः ।
क्षणादुत्थाय चुक्रोश यन्निशम्यारुदन् शिलाः ॥

105. प्राग्जन्मस्विह जन्मनि चाचरितं यत्तपो मया सर्वम् ।
मुनयः! प्रदीयते मे प्रमद्वरा योज्यतां प्राणैः ॥

106. तपसः फलमेषा मम मूर्तं पुण्यं मम प्राणाः ।
प्राणानां न च जाता जनिष्यते नापि तादृशी बाला ॥

107. क्रूरसत्त्वैराश्रमेषु प्रशान्तैर्भूयते खलु ।

In Public domain. Digitization Muthulakshmi Research Academy

कथं हन्ताहिनाऽनेन नोत्सृष्टं क्रौर्यमात्मनः ॥

108. सुकृती गतायुरिति वाग्लक्ष्यं भूता ममार सा बाला ।
पापी चिरायुरिति वाग्लक्ष्येण मया कियच्चिरं जीव्यम् ॥

109. क्षीणसारं स्थाणुकल्पं ममाङ्गमभवद्यतः ।
कर्तुं नालमहं किञ्चिजीवन्नपि मृतोऽस्म्यहम् ॥

110. निर्वाणमाश्रमज्योतिः स्रस्ता माला गलान्मम ।
समुज्ज्वलाऽभ्रशत्तारा दैवेनोपहतोऽस्मि हा ॥

111. वनदेवतेऽम्ब! कृपयाऽविलम्ब्य सञ्जीवकरणीं ते ।
दत्त्वा प्रमद्वरायै जीवय सा मे शरीरार्धम् ॥

112. हरिणाः हरिणाक्षी वः प्रियां सखीमन्तेरण हरिणाङ्कः ।
विज्ञाप्यतां भवद्भिस्तेनाप्तेनाऽमृतेन सा जीव्या ॥

113. एवं रुदतोऽप्यस्य यावत्सम्प्रार्थना न फलिताऽभूत् ।
केनापि, तावदेते बिभ्यति कालादिवेति मुनिपुत्रः ॥

114. क्रुध्यन् तस्मै मनसा प्रज्वलताऽब्रूत रे! काल! ।
पापिन्! प्रत्यर्पय मे प्रमद्वरासूस्त्वया मुषितान् ॥

115. भवितव्यं शप्तेन त्वयाऽन्यथाऽद्येति यच्छ्रुत्वा ।
स कृतान्तस्सन्त्रस्तस्तं सान्त्वयितुं विसृष्टवान् दूतम् ॥

6

116. आगत्यायमदृश्यो व्योम्नि स्थित्वा गभीरकण्ठेन ।
प्राहैवं तं दूषण तिक्तानि वचांसि सान्त्वमधुराणि ॥

117. रुरो! किं मन्यसे कालं समवर्ती स धर्मराट् ।
कथं तमीहसे शप्तुं मुष्टिनाऽद्रिं भनक्षि किम्? ॥

118. विद्यावानपि मूर्खस्त्वं प्रतिभासि रुरो! मम ।

In Public domain. Digitization Muthulakshmi Research Academy

जन्ममृत्योः कर्म जन्तोर्हेतुर्नात्र यमः प्रभुः ।।

119. मृतैः कैर्वा जीव्यतेऽत्र त्वं शप्ता किं न शप्यसे ।
भगवान् दयमानस्ते प्रियं कालश्चिकीर्षति ।।

120. यदि स्निह्यसि तस्यां त्वं यदि दूनोऽसि तत्कृते ।
तवार्धायुर्यच्छ तस्यै येन सा धारयेदसून् ।।

7

121. स निशम्येदं वचनं प्रमद्वरायै प्रदीयतेऽर्धायुः ।
इति यावद्वक्ति गिरं तावत्स्वापादिव प्रबुद्धा सा ।।

122. नलिनीव धौतपङ्का शशिरेखेव च वलाहकान्मुक्ता ।
सा कन्याद्योतिष्टापास्ताहिविषा यथापूर्वम् ।।

123. प्राप्तमृत्युर्लब्धजीवा बभासे सा रुरोर्दृशोः ।
प्रतप्तस्वर्णवल्लीव पूर्वतोऽपि समुज्ज्वला ।।

124. मन्त्राक्षतान् मौनिवर्गो वनलक्ष्मीः सुमाक्षतान् ।
तच्छीर्षयोर्व्यकारिष्टां शकुन्तैर्मङ्गले कृते ।।

125. किं न यच्छति यो मह्यमददादर्धमायुषः ।
इत्यग्रहीत्तदधाङ्गमादौ शिष्टं क्रमाद्वधूः ।।

126. तदारभ्यावर्तयन्तौ शैशवाभ्यस्तकेलिकाः ।
पुनः पुनः प्रीणयन्तावन्योऽन्यं तौ ननन्दतुः ।।

3.चिक्रोडकथा

1

127. परस्परं स्पर्धमाना उत्पाट्याद्रीन् महातरून् ।
आनीयाम्भोनिधेर्गर्भे पातयन्ति कपीश्वराः ।।

128. कृतहस्तः सेतुबन्धे नलस्तांस्तान् महोदधौ ।
प्रतिष्ठाप्य निबध्नाति सेतुं दृष्टश्रुतेतरम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

129. मुखं व्यादाय जलधिः शैलादीस्तत्रं पातितान् ।
सर्वभक्ष इवश्नस्तानुद्गिरत्यूर्मिघोषणैः ॥

130. स्वेदाम्बुभिः कर्मकृतां कपीनामुच्छ्वयन् भृशम् ।
अब्धिः सेतुं बध्यमानं निर्मज्ञयति नैकशः ॥

131. अक्षान्त्येव च वाराशिर्वानराणां बलानि च ।
आघातैः प्रतिघातैश्च श्रमयन्ति परस्परम् ॥

132. सुग्रीवाज्ञाभङ्गभीत्या भक्त्या च रघुनन्दने ।
यावच्छक्यं जागरूकैर्निर्व्यूढाः कपिभिः क्रियाः ॥

133. भूत्वा ते सहकृत्वानः प्रेरयन्तः परस्परम् ।
कपिसङ्घा दिवारात्रं कार्यनिर्वहणोद्यताः ॥

134. सहस्रैरिव हस्तैश्च सहस्रैरिव चाङ्घ्रिभिः ।
गजायुतबलेनेव चैकैको व्यापृतः कपिः ॥

135. नक्तंदिवमजानन्तो न वशा क्षुत्पिपासयोः ।
ध्यायन्तो रामपादाब्जे क्रियाः कुर्वन्ति वानराः ॥

2

136. एकदानुसृतो भ्रात्रा सुग्रीवेण च सञ्चरन् ।
सेतुबन्धनकार्याणि राघवः पर्यवेक्षते ॥

137. सेतुक्रियावानरैस्तैर्भूः प्रसूतेव निर्गतैः ।
पिपीलिकागाङ्ग्यात्रा समा याति शनैर्गतिः ॥

138. दशयोजनविस्तीर्णः शततालद्वयस उदधिरयम् ।
बद्धव्यः कथमिति हृदि चकार चिन्तामतीव काकुत्स्थः ॥

139. परिवृत्तिः खलु भूमेर्व्योम्नि प्लवनं हि हस्ताभ्याम् ।
उत्पातनं हिमाद्रे रचना सेतोर्महाम्भोधेः ॥

In Public domain. Digitization Muthulakshmi Research Academy

3

140. तरुशाखाशिखरस्थश्चिक्रोडः कश्चिदीक्षमाणास्तत् ।
क्लिश्यति हृदि न समाप्ता सेतोरचनाऽद्य यावदिति ॥

141. चञ्चूपुटैः काकगृद्ध्राः पातयन्त्यम्बुधौ शिलाः ।
चटकाः सूत्रखण्डानि चारं चारं ककुब्गणे ॥

142. अनुगच्छन्त्यब्धिमार्गं बद्धश्रेण्यः पिपीलिकाः ।
धावन्ति पतगास्तत्र स्वस्वसेवाप्रदित्सवः ॥

143. हन्त! हन्तैभिरन्यैश्च भग्नाङ्गैः श्रम्यते भृशम् ।
धिङ्गां धिङ्गां कर्तुमत्र नकिञ्चित्प्रभवाम्यहम् ॥

144. चिक्रोडश्चिन्तयन्नेवं मुञ्चन्नश्रूणि वीक्षते ।
दिशः शून्या मनो दग्धं दधात्यास्यं च कोचति ॥

4

145. श्रीरामनामवदने हृदये श्रीरामपादपद्मयुगम् ।
श्रीरामरूपमक्ष्णोः पुरतः कुर्वन् मुहूर्तमस्थात्सः ॥

146. उड्डीय पतङ्गमवन्निपत्य तीरेऽम्बुधेः सेवाम् ।
कर्तुं विचिन्त्य कामप्यप्रभविष्णुः परं दुःख्यन् ॥

147. शरवेगेनाधस्ताद्वृक्षस्याग्रादधस्पदाच्चाब्धिम् ।
धावित्वा चिक्रोडः क्षणात्प्रविष्टस्तदम्भांसि ॥

148. स्नातस्तटमारूढः सिकतास्ववलुण्ठ्य पुनरसौ यातः ।
सेतोर्बन्धनदेशे सैकतरेणून् पुनः पुनर्धुवति ॥

5

149. स्वस्यैव सिकतालेशैर्गाधोऽम्भोधिर्भवेत्ततः ।
निरन्तरायं बद्धःस्यात्सेतुरित्यमुदद्य सः ॥

In Public domain. Digitization Muthulakshmi Research Academy

150. स्पर्धमान इवात्यन्तं चिक्रोडः सह वानरैः ।
सैकतादम्बुधिं तस्मात्सैकतं प्रति धावति ॥

151. तटदेशमटन् रामः सहागतो भ्रातृवानरेन्द्राभ्याम् ।
दूराद् दृष्ट्वा जन्तुं तं स्मयमानोऽवदत्स्वपार्श्वस्थौ ॥

152. अन्यदेवकृतं साह्यं वानरैर्बलिभिर्मम ।
अन्यदेव च चिक्रोडकृतं भोः! कौतुकावहम् ॥

153. प्रभवेयं शोधयितुं ऋणं कपीनां यथाकथञ्चिदपि ।
नालं निर्यातयितुं चिक्रोडस्य तु जनुःशतेनाऽपि ॥

154. आनीयतां दिदृक्षेऽहं तं चिक्रोडं सुहृद्वरम् ।
इत्यादिष्टो वानरेन्द्रः सुग्रीवस्तंसमानयत् ॥

155. पुरो विलोक्य काकुत्स्थं भगवन्तं प्रणम्य सः ।
कृत्वा प्रदक्षिणान् भक्त्या पपात पदपद्मयोः ॥

156. कृच्छ्रैर्व्रतैस्तपोभिश्च यो देवो हि सुदुर्लभः ।
स दृष्टोऽश्रममल्पिष्ठजन्तुना किं मया कृतम् ॥

157. इत्यभिनन्दन्तं स्वं तं जन्तुं वीक्ष्य सम्प्रीतः ।
मेने दाशरथिर्हृदि नायं चिक्रोडमात्रोऽस्ति ॥

158. दृष्टं श्रुतमपि नैव प्राणिष्वल्पेष्वमूदृशं चरितम् ।
केनाऽप्यभाग्यहेतोस्स्वतपोभ्रष्टेन भवितव्यम् ॥

6

159. मत्वैवं हस्ताभ्यामुद्धृत्य मुहुर्मुहुस्तमाभृशति ।
लालयति स्मितपूर्वं चुम्बति संलापयति च पुत्रमिव ॥

160. चिक्रोड! मे प्राणबन्धो! हृष्टोऽस्मि तव सेवया ।
नालं प्रत्युपकर्तुं ते वरं वृण्विति सोऽब्रवीत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

161. ततः प्रणम्य चिक्रोडोऽवदद्धन्योऽस्मि भोः प्रभोः! ।
रोचते मे वोढुमङ्गं त्वदनुग्रहचिह्नितम् ॥

162. इति तत्रभवान् रामोऽभ्यर्थितस्तंस्पृशन् मृदु ।
गात्रेऽस्यामुद्रयद्रेखास्तिस्रो हस्तेन सुन्दराः ॥

163. भूयोऽर्थितः स तस्मिन् प्रायुंक्ताशिष ममू रेखाः ।
कुलमुद्रा अनुबध्नन्त्यनन्तरीयानपीति कारुणिकः ॥

164. चिक्रोडं निर्यान्तां पश्यन्नास्ते चिरेण दाशरथिः ।
परिवृत्य च स प्रणमन् मुहुर्मुहुरधावदब्धितटम् ॥

4. गानपरीक्षा

165. सुरगायनयोर्नारद तुम्बुरयो रात्मनस्तरतमत्वे ।
स्पर्धाङ्कुरः प्रभूतः क्रमेण वृद्धश्च वृक्ष इव ॥

166. कुशला ये संयमितुं शिरसी खल्वाटयौर्महात्मानः ।
उभयोस्ते पार्श्वगता अजुहवुरेधांसि वैराग्नौ ॥

167. हस्तिमशकान्तरं नावित्येके नाब्धिपल्वलान्तरमिति ।
अपरेण चोक्तमिति च कथितं कर्णेजपैर्मिथो बहुधा ॥

168. तृणाय मन्यतेऽन्यं कोऽप्यन्यस्तं मनुते रजः ।
देशकालौ प्रतीक्षेते तौ पराभवितुं मिथः ॥

169. उभौ दिव्यमुनी एव सात्त्विकौ ज्ञानिनौ च यौ ।
तथापि तौ प्रावृततां निन्दन्तौ पामराविव ॥

170. तौ विरिञ्चिमुभौ गत्वा कदाचित्प्रणिपत्य तम् ।
निर्णीयतां तारतम्यमावयोरित्ययाचताम् ॥

171. प्राह भगवान् विधाता तुम्बुर! मे नारदः पुत्रः ।
येन भवान् भवदीया मां ब्रूयुः पक्षपातीति ॥

In Public domain. Digitization Muthulakshmi Research Academy

172. ततो विहाय मां गत्वा वैकुण्ठं पृच्छतं युवाम् ।
इत्युक्तमात्रं तद्द्वन्द्वं प्रतस्थे हरिमन्दिरम् ॥

173. तयोः श्रुत्वाऽभ्यर्थनां तां विष्णुरप्याह तुम्बुर! ।
ज्ञातं ते खलु मुख्योऽयं भक्तेषु मम नारदः ॥

174. शङ्कितः स्यां पक्षपाती न त्वयात्वितरैर्जनैः ।
मया भवत्तारतम्यं विनिर्णेतुमसाम्प्रतम् ॥

175. तपस्यन्तं हनूमन्तं हिमशैले युवां गतौ ।
पृच्छतं येन वां ज्ञेयं तारतम्यं भविष्यति ॥

176. स महात्मा रामभक्तो यश्च गायनतल्लजः ।
यं गायकाः प्रणम्यादौ गातुं व्याददते गलम् ॥

177. इत्याज्ञप्तं मुनिद्वन्द्वमववीर्य दिवो भुवम् ।
आञ्जनेयं तपोनिष्ठं गत्वैक्षिष्ट हिमाचले ॥

178. शनैरुन्मील्याक्षिणी स विलोक्य पुरतः स्थितौ ।
मुनी कथां तयोः श्रुत्वा हनूमांस्तावभाषत ॥

179. शिलासने स्वीक्रियेतां भवद्भ्यामत्र तापसौ! ।
मया नीराजनं यावद्राघवाय समर्प्यते ॥

180. इत्युदित्वा वानरेन्द्रः स्तोत्रगीतं प्रचक्रमे ।
स्थाणवोऽङ्कुरिता येन प्रद्रुता अभवन् शिलाः ॥

181. शिलापीठद्वये लीने तौ पङ्कान्तर्न्यमज्जताम् ।
कपिगानवशीभूतौ नाजानीतां दशामिमाम् ॥

182. यावद्गीतं समाप्यायं नयने उदमीलयत् ।
तावल्लग्नं मुनिद्वन्द्वं घनीभूतशिलान्तरे ॥

In Public domain. Digitization Muthulakshmi Research Academy

183. दिनान्ते मुकुलीभूते जलजाते द्विरेफवत् ।
नारदस्तुम्बुरश्चास्तां लग्नार्धाङ्गौ विपद्गतौ ॥

184. तपस्विनौ हन्त! हन्त! क्लिश्यन्तौ क्षुब्धमानसौ ।
पश्चात्तप्तौ बहिर्गन्तुमायस्यन्तौ बभूवतुः ॥

185. बहिः प्रापय मां मामित्यार्तालापौ पुनः पुनः ।
हनुमांस्तावुभौ वीक्ष्य प्राह भोः श्रूयतां मुनी! ॥

186. तारतम्यावबोधाय युवामत्रागतौ खलु ।
शिलासने यथा लीने भवद्भ्यां गीयतां तथा ॥

187. श्रुत्वोपावीणयत्सद्यो यावच्छक्यं स तुम्बुरः ।
भिन्नभिन्नान् गीतरागान् महान्तं कालमेव च ॥

188. तथैवास्तां घनीभूते शिलासन्धौ यथापुरम् ।
मृदुत्वमपि न प्राप्ते व्यरंसीद्धन्त! तुम्बुरः ॥

189. उपक्रान्ते ततो गीते नारदेन महर्षिणा ।
शिलापट्टौ मृदूभूय बन्धो व्यशिलष्यदल्पशः ॥

190. आविष्कृत्य कलाप्रौढिमगासीदृषिपुङ्गवः ।
चिरमेव दृषत्पीठे नाभूतां तु म्रदीयसी ॥

191. यथा पङ्के विनिर्मग्नौ बहिरागन्तुमक्षमौ ।
गजौ क्षुब्धौ मुनी दृष्ट्वा हनुमानन्वकम्पत ॥

192. असमाप्तं नारदस्य गीतमेवावलम्ब्य सः ।
आलपन्मधुरं येन व्यलीयेतां शिलासिके ॥

193. दिष्ट्या लब्धं जीवितं मे मयाप्तं हि पुनर्जनुः ।
सुप्रातोऽस्मीति हृष्यन्तौ मुनी पङ्काद्बहिर्गतौ ॥

194. प्रणिपत्य हनूमन्तं गीतविस्मितचेतसौ ।

In Public domain. Digitization Muthulakshmi Research Academy

विलीनविद्यादर्पौ तौ जग्मतुर्विनताननौ ॥

195. ज्यायानित्येव गण्यःस्यान्नारदस्तुम्बुरादपि ।
यथैव केकराक्षोऽन्धात् तथापि स गतो ह्रिया ॥

5.मेघः

196. पीत्वेव मद्यमब्दो मत्तो भूत्वा स्खलद्गतिर्गच्छन् ।
आकाशवीथिकायां तिष्ठन् गच्छति च विस्मृतो गम्यम् ॥

197. नायमैकान्तिको देश इति शङ्कालवं विना ।
पतन्नङ्के स्पृशन् गृह्णन् मूढः श्लिष्यति तारकाः ॥

198. न कदापि याति गृहिणीं वर्षासु यदृच्छया सकृद्याति ।
प्रत्युद्गतां पुरन्ध्रीं तटिल्लतां घोषणैस्स भर्त्सयति ॥

199. विहरन्ति नभोवीथ्यामेकाकिन्योऽप्सरः स्त्रियः ।
चेद्दूषयेर्वज्रिणा त्वं छिद्यसे मेघ! खण्डशः ॥

6.कृतज्ञता

200. स्वरक्षणे जाग्रतो ये घनास्तेषां विनिर्गमात् ।
म्लानो ग्लानो वृक्षकोऽस्ति ध्रियमाणः कथञ्चन ॥

201. स मर्मरैः प्रार्थयते यातायातान् समीपगान् ।
न विदुः किन्नु तद्भाषां द्रष्टुं तं कोऽपि नागमत् ॥

202. अवेक्ष्य शोच्यतां तस्य श्रुत्वा च प्रार्थनारवान् ।
निर्भिन्नहृद्दलद्बाष्पस्तं जीवयितुमैषिषम् ॥

203. आलवाले दत्तसारे । कृतैः सलिलसेचनैः ।
द्वित्रैरेव दिनैर्वृक्षः स दृष्टोऽपूर्ववज्ञनैः ॥

204. प्रकृतिस्थः क्रमाद्भूजो दृढस्कन्धश्च सारवान् ।
ऋणनिर्यातनार्थं मे त्वरमाण इवावृधत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

205. प्राप्तकाले यथाशक्ति पत्रपुष्पफलैर्युतम् ।
शाखाकराञ्जलिं भक्त्या चलाङ्गो मह्यमार्पिपत् ॥

206. त्वयैवेदं दत्तमङ्गं तवैव नतु मामकम् ।
छित्वा मां गृह्यतामिष्टमित्यख्यद्भ्रमरस्वनैः ॥

207. मत्साकृत्य स सर्वस्वं यावज्जीवं मृतश्चमाम् ।
प्राप्यकाष्ठङ्गालभावं भस्मीभूयाऽप्युपाचरत् ॥

7.शिलादृश्यम्

208. वर्षातपैर्नाभिभूतः शैलशृङ्गोपरि स्थितः ।
मौनमुद्रां दधत्कोऽपि तपस्यति महोपलः ॥

209. स्पृष्टोऽपि शाखातन्वीभिः पुष्पस्तनदलांशुकैः ।
गायन्तीष्वप्यासु कीरकण्ठैर्नेषच्चलत्यसौ ॥

210. अभितः परिवृत्यैनं प्रस्तराः प्रतिशेरते ।
तत्त्वोपदेशं प्राप्ता नु समाध्याविष्टचेतसः ॥

211. कदा त्यक्तसमाधिः स्यात् कदा स्यात्तदनुग्रहः
इत्युत्कण्ठास्तमीक्षन्ते निर्निमेषदृशो जनाः ॥

8.शैलः

212. काऽददाच्छैशवे स्तन्यं तुभ्यं माता? यतो गिरे !
वज्रकायोऽसि दीर्घायुस्तव कस्याशिषः फलम् ॥

213. पाषाणहृदयोऽपि त्वं त्वत्स्रवन्ति कृपापगाः ।
आश्रितान् क्षुद्रजन्तूनप्यवत्याश्रवदो भवान् ॥

214. ओषधीः साररत्नानि चार्थिभ्यस्त्वं प्रयच्छसि ।
यतस्ते कीर्तिशृङ्गाणि भासतेऽभ्रलिहानि भोः ॥

215. प्रसूतो यस्य येनासि वर्धितोऽभूस्त्वमीदृशः ।

 In Public domain. Digitization Muthulakshmi Research Academy

दृष्ट्वोन्नतिं प्रतिष्ठां च ते मुदं कियतीमियुः? ॥

9.चन्द्रः

216. मेघशैले व्योमगङ्गातीरे, कोणे च कुत्रचित् ।
आस्ते तपोवनं यत्रावसच्चन्द्रो महामुनिः ॥

217. युवा शुद्धः कलापूर्णश्चारुमूर्तिर्मनोहरः ।
तमोहर्ता स लोकस्य चाकाशीति सगुन्नतः ॥

218. मोहान्धां यौवनोद्रेकात्पतन्तीं मुहुरात्मनि ।
अपास्यति करैर्दूरं न तु श्लिष्यति रोहिणीम् ॥

219. आश्रमप्राङ्गणासीनः सायं ज्योत्स्नामिषादसौ ।
बोधयत्युडुशिष्येभ्यस्तत्त्वगाथा दिने दिने ॥

220. संशयेषु क्षालितेषु तस्य प्रवचनैर्मुनेः ।
तुषाररूपेणाश्रूणि ते मुञ्चन्ति विहायसः ॥

10.झरी

221. ऊर्मिहस्तैस्तीरयुग्मे वृक्षाः श्रेणीकृता इव ।
तत्स्पर्शनात्कोरकिता रेजुः पुलकिता इव ॥

222. गायति गीतं वंशे, स्मिते कृतेऽपि च शरवणेन ।
मार्गं स्वस्य निरुध्य स्थितेष्वपि प्रस्तरेषु मूढेषु ॥

223. वेणीधृतवनपुष्पा मन्दानिलबृन्दवेषमानमनाः ।
आलिप्तफेनगन्धा हंसीभिः संलपन्ती च ॥

224. दूरीभूताऽस्पृशन्ती तांस्त्वं कुत्र प्रस्थिता झरि?
तव प्रणयराज्ये कमभिषेक्तुं हृदीहसे ॥

11.कोकिलः

225. स्वागतं भोः सखे! तुभ्यं वसन्तास्थानगायक ।

In Public domain. Digitization Muthulakshmi Research Academy

बहोः कालात्तु दृष्टोऽसि त्वया कुत्र गतं? स्थितम्?

226. किं विनेतुं गतोऽसि त्वं किन्नरीर्दिव्यगायनीः? ।
अभ्यस्तं नूतनं गीतं गीयतां कर्णपेशलम् ।।

227. परुच्छ्रुतं मया गानमुपचूतं स्थितेन भोः !
अद्य यावत्पुनर्नैव श्रुतं तादृक्क्वचित्सखे! ।।

228. यदा यदा स माकन्दो मया दृष्टस्तदातदा ।
त्वद्गीतं स्मर्यते स्वादूद्गाराश्चोद्यन्ति मे भृशम् ।।

229. चूतासनसमारूढे त्वयि गायति किन्वभूत् ।
गीतामृतं तवाश्यानं मधुरं तत्फलं यतः।।

230. किन्नु पीतं वल्लरीभिर्यतः पुष्पाण्यधुर्मधु ।
किन्नु मग्ना मारुताश्च नचेत्ते शीतलाः कथम्।।

231. श्रुते श्रुते भवद्गीते प्रतिभासि च मे पिक ।
अपूर्वभाषाकाव्यस्य रसघट्टान् पठन्निव ।।

232. ऋतुस्त्वया विना मन्ये विदेशस्थप्रिया वधूः ।
देशस्त्वया विना विद्वान् कुतोऽपि हतवाक्कृतः ।।

12.मन्दमारुतः

1

233. किं देवी प्रकृतिर्माता पीयूषार्द्रैः कराम्बुजैः ।
सहस्रैः स्वान् लालयन्ती समालिङ्गति पुत्रकान् ।।

234. स्वर्गस्थैर्नन्दनोद्याने श्लिष्टामरवधूजनैः ।
रचिताः कविभिः श्लोकाः किं स्वक्रीडाभिवर्णनाः ।।

235. स्निग्धयोर्नूत्नदम्पत्योः श्लिष्टान्योऽन्याङ्गयोः परम् ।
किं निभृतभाषितानि म्रदिष्ठानि प्रियाणि च ।।

 In Public domain. Digitization Muthulakshmi Research Academy

236. सान्द्रीभूता नभस्यादौ वायुभिः शकलीकृताः ।
अणुभूताश्च कालेन किमदृश्याः पयोमुचः?।।

237. अमरीभिर्निगूढाभिस्तिरस्करिणिकावशात् ।
यैर्वीज्यन्ते जनाः स्निग्धास्तानि स्तनपटानि किम् ।।

238. नचेत्कथमियान् मोद इयती माधुरी कथम् ।
इषन्मृदुत्वशीतत्वमोहाश्च प्राणिनां कथम् ।।

239. मन्दानिलाः कुत्र तप्तं कोऽददाद्वरमीदृशम् ।
मानिनौ सङ्गमय्यात्तपुण्यस्येदं फलं किमु ।।

2

240. क्रियते हि मन्दमारुत! भवता विश्वोत्सवः प्रसन्नेन ।
नान्योऽस्ति त्वादृश इति तत्काले श्लाघ्यसे जगत्प्राणः ।।

241. स्थित एव हठादङ्गं भयावहं यथा विवर्ध्योच्चैः ।
उन्मूलयन् महीजान् भञ्जन् सौधान् गिरींश्चलयन् ।।

242. हुंकुर्वाणैर्महाघोरैः सहस्रैराननैर्भवान् ।
ग्रसिष्णुरिव लोकांस्त्रीन् लक्ष्यते कालरात्रिवत् ।।

243. दहनेन प्रज्वलता सङ्गम्य त्वं कदाचिद्धिक् ।
हित्वा भीतिं पापात्कारयसि च लोकसंहारम् ।।

244. दृष्टश्चद्भिः शैशवे त्वां जनः स्वप्नेऽपि तादृशः ।
भविष्यसीदृशः क्रूर इति नासीर्विशङ्कितः ।।

245. पिशाचेनेवचाविष्टो विवशो नाशयन् भुवम् ।
दुःस्थितैर्दुःखितैर्भूयो जनैः शप्तः कथञ्चन ।।

246. अनुशोचन्निवाश्रूणि मुञ्चन् वर्षमिषाद्भृशम् ।
गर्जाव्याजाद्वारितोऽपि तूच्चै रोरुद्यते भवान् ।।

In Public domain. Digitization Muthulakshmi Research Academy

13.पुष्पापचयः

247. समरन्दैः सुमबृन्दैः पत्रैर्हरितैश्च नेत्रपर्वकरीम् ।
उपसृत्य लतां कश्चिच्चिन्वन् कुसुमानि सन्दृष्टः ॥

248. पश्यति मयि स क्रूरः पुष्पाण्यवचित्य निश्शेषम् ।
व्यपगतभूषां विधवां बालामिव तां लतां कृतवान् ॥

249. नास्त्यन्तरात्मा तस्येति मन्ये यद्यस्ति तर्ह्यसौ ।
न बोध्यते किं कार्यं तत् दूष्यं द्रावत्यज्यतामिति ॥

250. पश्यतो मम नेत्राभ्यां प्रस्तुता बाष्पवाहिनी ।
अयत्नमवदं जाल्म किं काष्ठे ते करौ न किम् ॥

251. अनपचितकुसुमभारा नेत्रानन्दिन्युदीक्षमाणानाम् ।
सुभगा सुवासिनीव वल्ली ते दृष्टिमपहन्ति? ॥

252. शपेयुः क्षुधिता भृङ्गा हृतस्वा विलपेल्लता ।
नष्टानि पुण्यक्षेत्राणीत्याक्रन्देन्मन्दमारुतः ॥

253. इति रुष्टेन मयोक्तः स आह भगवान् महादेवः ।
कुसुमैर्लक्षैरर्च्यश्चेतव्यान्यद्य सर्वपुष्पाणि ॥

254. कर्णारुन्तुद एतस्य श्रुते वाक्ये ममाऽजनि ।
मतिः सताड्य तं कर्तुं गलहस्तबहिष्कृतम् ॥

255. कबलीकृतकोपेन कथमप्युक्तो मया स दुष्टनरः ।
मृत्पिण्डमते मूर्ख पततो लतिकासु पश्य भृङ्गांस्तान् ॥

256. आयान्तं पातुं मधु निवर्तयन् भृङ्गसङ्घाघातम् ।
किं कुसुमानि चिचीषसि निःशङ्कं देवपूजायै ॥

257. अपहरसि बलाद्धन्त कवलानि मुखे कृतानि मधुपानाम् ।
न क्षालयितुं शक्यं जन्मशतेनापि पापमलम् ॥

 In Public domain. Digitization Muthulakshmi Research Academy

258. धिक्! धिक्! कृतगोघातस्तच्चार्मिकपादुकाप्रदातेव ।
त्वं भवसि पुण्यलिप्सुर्हतभृङ्गचयस्समर्चयन् देवम् ।।

259. अवचित्य दुःखितेषु प्राणिषु नकेषु कुसुमानि ।
अर्चयता भगवन्तं रे! मूर्ख फलं त्वया किमासाद्यम् ।।

260. तव हृदयकुसुममात्रं किं बहुना रोचते भगवते भोः ।
नत्वैतानि सुमानि यदीच्छसि चिनुष्व पतितानि ।।

261. अपचितसुगन्धिकुसुमैर्निर्जीवशिलार्चनाच्छ्रेयः ।
अभिवादनलतानां सुमफलभारेण दर्शनीयानाम् ।।

262. निशम्योक्तं मया सर्वं कृत्वा गालोडितं च सः ।
सानुतापं प्राह देव दुष्कृतं यन्मया कृतम् ।।

तृतीयो भागः

तृणकणाः

1

1. त्वां द्रष्टुमेव दत्ताभ्यां नेत्राभ्यां दृश्यते परः ।
त्वामर्चितुं प्रदत्ताभ्यां हस्ताभ्यामर्च्यते परः ।।

2. त्वां गातुमेव वीणा मे भवता देव शिक्षिता ।
न प्रीणितोऽसि गीतेन प्रीणिता धनिका मुहुः ।।

3. भवता प्रदत्तभृत्या समृद्धिमानाप्तबहुभोगः ।
नाहं भवन्तमभजे वेतनवृध्यै मुहुर्मुहुर्याचे ।।

4. स्थातुं मया समक्षं ते न शक्यमपराधिना ।
न स्थातुं च परोक्षं ते क्षाम्येत्कोऽन्योऽपराधिनम्?।।

2

5. गणयसि न त्वं स्वर्ण मणिसञ्चयमण्ययस्कान्त ।

In Public domain. Digitization Muthulakshmi Research Academy

गाढमयः खण्डे मे स्निह्यसि को नु खलु हेतुः स्यात् ॥

6. राजतः काञ्चनैः पात्रैः सम्पन्नोऽसि मणीमयैः ।
कुतो मृण्मयपात्राय मम स्पृहयसि प्रभो ! ॥

7. वैणिकैर्वांशिकैरन्यैः प्रीण्यसे खलु गायकैः ।
प्रीतिः कुतस्तेऽद्य जाता गीते रूक्षे मम प्रभो ॥

3

8. प्रचलच्छम्पालतिका प्रग्रहमयमितवारिवाहाश्वैः ।
व्योमरथेनोढेन सञ्चरमाणो मया स सन्दृष्टः ॥

9. उपविशता सिकतासु मया नदीशीतलोर्मिकारूपान् ।
स्वकटाक्षान् करुणार्द्रान् प्रसारयन् वीक्षितो देवः ॥

10. पिकस्वरश्रुतिं कृत्वा सर्वान् पल्लवयंस्तरून् ।
गायन् श्राव्यं वसन्ताख्यं गेयं दृष्टः स गायकः ॥

4

11. उदेतीदं कुतो ज्योतिर्न कोऽप्यन्नास्ति नैव च ।
व्योम्नि चन्द्रस्तारकाश्च सञ्छन्नाः सान्द्रवारिदैः ॥

12. उदेतीदं कुतो ज्योतिः कियन्मे हृदयङ्गमम्
कियन्नेत्रोत्सवं कुर्वदपूर्वं मधुरं च यत् ॥

13. किं कान्तिपुञ्जस्तेऽङ्गस्य किं स्मितं ते मनोहरम् ।
भगवस्ते कृपाक्षीरसिन्धोर्वा भङ्गसञ्चयः? ॥

5

14. ह्यः सायं चन्द्रकला नौकारूढः सखे! गायन् ।
गगनधुनीसलिलेषु विहरन्नास्ते भवान् हि सहमित्रः ॥

15. अधिरूढो वारिदाश्वं रथ्यायां तारकावने ।

 In Public domain. Digitization Muthulakshmi Research Academy

वाह्याल्या विहरन् दृष्टो ह्यो रजन्यां भवान् खलु ॥

16. उदयाद्रौ पौर्णमास्यां स्थितेन प्रत्यगङ्गनाम् ।
लक्ष्यीकृत्य सखे! क्षिप्तो मल्लीगुच्छस्त्वया खलु ॥

6

17. यतमानः क्लिश्येऽहं भवन्तमुपसर्तुमनवधेः कालात् ।
देव कथमुपसरेयं दिगन्तरेखेव दूरदूरगतम् ॥

7

18. मम नेत्रपुण्डरीके, मनः कुमुदमङ्घ्रिपङ्कजद्वन्द्वम् ।
करकोकनदयुगं च सङ्ग्रथ्य समर्पयामि तव पदयोः ॥

8

19. पुष्पाञ्जले! तवैकैकं दूतीभूत्वा सुमं प्रभुम् ।
यातना मम विज्ञाप्य मां करो त्वनुकम्पितम् ॥

9

20. मम जीवितगाधास्ते निवेदयाम्येव गानतन्त्रिकया ।
आशंसेऽनेकेषामंशानामुत्तरं देव ! ॥

10

21. त्वामेव मत्वा पुत्रं मे देव चुम्बामि तन्मुखम् ।
त्वामेव मत्वा श्लिष्यामि सुन्दरीं मे दिने दिने ॥

11

22. आहूतोऽहं किङ्करैस्त्रिर्नामग्राहं महोच्चकैः ।
गत्वा सभां करौ बध्वा प्राड्विवाकपुरः स्थितः ॥

23. बहुधा प्रश्नयन् मां स वेपमानं भयाद्व्यधात् ।
अपराधे स्थापयित्वा दण्डं द्वीपान्तरस्थितिम् ॥

24. पतित इव प्रासादाद्गर्ते धिक्! पूतिगन्धिनि ।
अपारयन् समारोढुमेकाक्यस्थां रुदंश्चरन् ॥

In Public domain. Digitization Muthulakshmi Research Academy

25. दृष्ट्वोत्पततः पतगान् वात्याधूतांश्च वारिदान् ।
अप्रभुस्तद्गतीः प्राप्तु विषण्णोऽत्र स्थितोऽस्म्यहम् ॥

26. अविधा! अविधा!! जन्मन्यस्मिन् भुक्ताघसञ्चयः ।
पुनस्त्वां प्राप्य भो देव! किं भजेय यथापुरम् ॥

12

27. उप्तं पुरा निम्बबीजं फलमाम्रस्य लिप्स्यते ।
अहं मूर्खः किमून्मत्त उपहास्योऽस्मि सर्वथा ॥

13

28. आगतो देव! ते सौधमुच्चैस्त्वामाह्वयं मुहुः ।
प्रतिशब्दः श्रतो नैव यद्यासीः किं न भाषसे? ॥

14

29. नहि जलजे तव चरणे मम हृद्भृगस्य चम्पके देव! ।
न च चन्द्रस्तव वदनं मम नेत्र कुवालयोरभूत्सविता ॥

30. नाभयदस्तव हस्तः करवालो भयङ्करः ।
न कटाक्षाः शातबाणा विरुद्धोऽसि प्रभो! कुतः? ॥

15

31. व्योम प्रणमति मूर्घ्ना दिशाकरैरुत्थितैर्नमस्यति भूः ।
गिरयोऽभिवादयन्ते पतितास्त्वामेव सागराः स्तुवते ॥

16

32. यच्छत सरितः! पाद्यं लतिका! अर्घ्यं फलानि भो वृक्षाः!
पतगाः! स्वागतमायात्यद्य कुटीरं ममातिथिर्देवः ॥

17

33. मूलगतं त्वां देव! वृक्षा मां पल्लवाङ्गुलिभिः ।
जिज्ञापयिषन्तीति भ्रान्तो गत्वाऽस्मि भग्नाशः ॥

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

भर्तृदानम्

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Introduction

The great epics and the Mahapuranas have been the inexhaustible mines of the gems of stories and the पारिजातापहरणकथा is one such gem which is cut into beautiful shapes and processed, as it were, into variegated colours by many an Indian poet. This story is found in हरिवंश, (in two places with slight differences), महाभागवत and the विष्णुपुराण According to the first story of हरिवंश, श्रीकृष्ण, after killing नरकासुर goes, along with सत्यभामा to इन्द्र's place to restore अदिति's earrings, stolen by नरक. There सत्यभामा is attracted by the पारिजात tree and instigates her husband to take this away by force to be planted in her garden. The second story runs as follows:- श्रीकृष्ण was, once, camping on रैवतक with his wife रुक्मिणी who celebrated the उद्यापनम् of a व्रत there. नारद visited him there and presented him with a पारिजात flower. श्रीकृष्ण gave it to रुक्मिणी sitting nearly, though he had his own misgivings about the reaction of सत्यभामा. नारद did not allow this opportunity to slip away, and with an intention of creating trouble between the cowives, praised Rukmini to the skies, and concluded saying that she had won the greatest love of her husband, as was evident by the gift of पारिजात flower, recived by her and that all her cowives including सत्यभामा were no more than servant-maids. This had सत्यभामा the desired effect; The सखी's of had promptly reported this to her and she could be pacified only when she was promised by श्रीकृष्ण that he would plant a पारिजात tree in her garden. He sends word to इन्द्र through नारद, asking him to send the पारिजात tree, but इन्द्र refused which resulted in a fight between them. At last the fight was stopped by the intervention of इन्द्र's father, कश्यप, and इन्द्र presented the tree to Srikrishna. सत्यभामा performed पुण्यकव्रत and after one year, the tree went to its original place. The story of भागवत almost follows the first story of हरिवंश with slight variations here and there.

Though closely following the first story of हरिवंश, the story of विष्णु पुराण differs from the former, as for the reason of पारिजातापहरण.

In Public domain. Digitization Muthulakshmi Research Academy
After killing नरकासुर at the request of इन्द्र, श्रीकृष्ण, accompained by सत्यभामा goes to स्वर्गलोक to return the ear rings. There he is received with great respect. But सत्यभामा feels insulted when she finds that शची, herself gracefully decorated with the पारिजात flowers, does not present them to her, thinking her unworthy of such celestial privilage. So she wants to take away the tree itself. In the ensuing battle, all the powerful weapons of इन्द्र being exhausted, he at last uses his invincible वज्रायुध, even which is made powerless and caught by श्रीकृष्ण. इन्द्र tries to flee away. On seeing him in such a plight, सत्यभामा graciously condones him saying "Oh! husband of शची! it is quite unbecoming of you to flee like this. I do not care for your पारिजात. your wife was proud of your greatness and insulted me by not giving due respect. Now my purpose is over. Take back this tree." इन्द्र is ashamed of his impetuosity and requests श्रीकृष्ण to take the tree to द्वारका, Thus the पारिजात हरण कथा has got many charming aspects worthy of poetical treatment, and that is why there are about a dozen काव्य either दृश्यस or श्रव्यस in later Sanskrit literature, with this story. But all of them are now forgotten, at least in आन्ध्रदेश to which the influence of the famous Telugu poem पारिजातपहरणमु by मुक्कु तिम्मन of the 16th century must have been one of the contributory factors, in this part of the country. And with a commendable intention, as it were, of popularising this beautiful story again, in the modern sanskrit literature the well-known poet critic sri Sannidhanam Suryanarayana sastri Garu, presents to the sanskrit world a beautiful poem भर्तृदानम् in 168 verses of वंशस्थवृत्त ।

The Sanskrit lovers of the other parts of the country must be knowing Sri Sastri Garu only as a sanskrit poet. But his fame as a good आलङ्कारिक and वैयाकरण of no mean order had been quite well established, long ago, in आन्ध्रदेश and in this regard his two monumental works, in Telugu, काव्यालङ्कारसग्रहमु and तत्समचन्द्रिका speak for them selves. And, if a little personal indulgence is not mistaken, my first respectful interest in

 In Public domain. Digitization Muthulakshmi Research Academy

him was aroused when I happended to read his काव्यालङ्कारसंग्रहमु prescribed for a higher Telugu examination, and especially the lucid exposition of the रस theries. His Jataka katha guchamu, Dwandwa Yuddamu, Keersandesamu, vivekandamu and etc. (all nearly twenty Telugu kavyas) won him a high place among Telugu poets also. The fearlessness in expressing his views on any contemporary poet or scholar, and the capacity to tolerate the views expressed by others, are some of his personal traits, worthy of emulation and rarely found in these days elsewhere.

Now, turning to the poem, we can see, as the poet himself inform us, that this mainly based on two Telugu works, the one referred to above, and the other Tulasidala Mahima. This happy blending of these two themes brings an extra ordinary new charm to this poem. In the first work, the arrogant, self centred सत्यभामा at last comes out triumphant from her so called woe striken condition, caused by giving the flower रुक्मिणी to in her absence. Generally, Narada is known to have been creating quarrels only to see that the arrogant party is subdued at the end. But this did not happen in this case. शृङ्गाररस is maintained as the अङ्गिरस । नायिका is कलहान्तरिता with अनुकूलनायक । But all this has been completely change by our poet by blending the तुलसी वृत्तान्त also with this story, and it works as an anti climax. Satyabhama revels at her triumph and feels highly exalted among her cowives when नारद appears on the scene and advises her to perform the पुण्यकव्रत where she was to give away her husband to the पुरोहित or any such सत्पात्र and take him back after paying riches equal to him in weight. She is fully confident of her abnormal wealth and fidelity of her husband, and readily agrees to the proposal, only to be rescued at last by her much hated rival रुक्मिणी and to be stripped of her egoism, in the presence of all her co-wives. This beautiful conclusion changes the complete trend of the plot. Now शान्तरस becomes the dominant sentiment of poem with शृङ्गार रस as the अङ्ग रस। The real purpose of नारद also is thus fulfilled. In this connection,

In Public domain. Digitization Muthulakshmi Research Academy
the words of रुक्मिणी and सत्यभामा at the end, are worth quoting: -

न लोकसाधारणपूरुषः स्वसः !
अयं पति र्नौ भगवान् परात्परः ।
अमेयरूपः किल नैव शक्यते
धनैः स तुच्छैः परिमातुमीदृशैः ॥
तदाह सत्या प्रणिपत्य रुक्मिणीम्
स्वस यथायं पति रीक्षितस्त्वया ।
मया तथा नह्यनभिज्ञयाऽकरो,
ईशोर्ममोन्मीलनमद्य ते नमः ॥

By way of discribing the patience of रुक्मिणी in the verse 2/12 the poet suggests that the famous dictum अत्युच्छ्रयः पतनहेतुः is the key note of the poem, an understanding of which is the source of निर्वेद, which according to some rhetoricians is the स्थायीभाव of शान्तरस .

Having this general view of this poem in mind let us now go into some of the important details. The poet bases his poem up to पुण्यकव्रत on the Telugu पारिजातापरहरणमु faithfully following even the minute details, while describing the ten avataras, and the angry सत्यभामा etc. But being a good आलङ्कारिक Sri Sastri Garu knows the value of the famous saying of आनन्दवर्धन - अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् औचित्योपनिबन्धस्तु रसस्योपनिषत् परा and omits one or two sentences which are put by the Telugu poet, into the mouth of the आजन्म ब्रह्मचारिन् नारद as addressed to रुक्मिणी. नारद says to रुक्मिणी that flower would be helpful as a lamp or a fan when she is engaged in amorous sports with her husband. The sense of औचित्य makes our poet omit this.

One of the famous verses of the Telugu poem is the one describing how सत्यभामा in her rage, kicked the head of श्रीकृष्ण bowed at her feet to appease her. Perhaps, this is the climax; and the verse is very popular among the Andhras of even slightest taste in Telugu literature. This पादताडन is not the first innovation of the poet. It is as old

 In Public domain. Digitization Muthulakshmi Research Academy

as kalidasa who reffers to it कान्ता पादतलाहतिस्तव मूदे तद्वन् ममापि etc in विक्रमोर्वशीयम्. मम्मट even lays down a rule that the hero should not get angry even after receiving this unique honor. ईदृशाः इति, नायिकापादपहरणादिना नायककोपादिवर्णनम् etc का.प्र. VII उल्लास Yet of all the incidents of this poem, this alone is well remembered if not by श्रीकृष्ण, by all the readers! This climaxic interesting incident has been vividly described by our poet also.

Sri Sastri Garu, has introduced an important change which brought some improvement in the character of श्रीकृष्णम्. According to all the other stories, excepting that of विष्णुपुराण, श्रीकृष्ण goes to heaven, as a friend and is received there by इन्द्र with atmost honour and respect. At last he finds it convenient to take away the पारिजात tree at the instance of his wife, even without formarly informing his kind host इन्द्र . This is not like steeling the butter in his childhood and is quite unjustified. And the same इन्द्र who prostrated, previously, at श्रीकृष्णs feet, soliciting his help in suppressing the demon नरक now takes arms, so ungratefully against him. Thus the characters of both श्रीकृष्ण and इन्द्र are stained. But the change introduced by the poet, that इन्द्र himself, on knowing the intentions of श्रीकृष्ण presented पारिजात to him, has not only completely wiped out the stain, but also added dignity to their characters. It has also some other purpose connected with the plot construction. Unlike the other पारिजात काव्य's the main story (आधिकारिक कथा) of this poem is भर्तृदान and if the poet goes on elaborating on the प्रासङ्गिक कथा of पारिजातापहरण to the undesirable eclipse of the main point, this poem would have been subjected to the blemish of अङ्गस्याप्यतिविस्तृवृत्तिः All this is avoided by condensing the whole incident in two verses; a condensation which is technically called one of the varieties of ओजस् called समास Of course, this has been suggested to him, as the learned poet himself admits, to the similar incident in रघुवंश but the real worth of a poet is judged by the selection of the useful incidents that may be found in many places and

In Public domain. Digitization Muthulakshmi Research Academy
adopting them to the purpose in hand. आनन्दवर्धन explicitly approves such संवाद while he says:- संवादास्तु भवन्त्येव बाहुल्येन सुमेधसाम् नैकरूपतया सर्वे ते मन्तव्या विपश्चिता । संवादो ह्यन्यसादृश्यं तत् पुनः प्रतिविम्बवत् आलोख्याकारवत्तुल्यदेहिवच्च शरीरिणाम् । ..... तृतीयन्तु कमनीयं शरीरसद्भावे सति ससंवादमपि काव्यवस्तु न त्यक्तव्यं कविना । नहि शरीरी शरीरिणा अन्येन सदृशोप्येक एवेति शक्यते वक्तुम् ध्व.आ. IV.

This poem is written in the वैदर्भी style. In almost all the verses we can see the प्रसादगुण. By way of example, the following verses can be cited :-

पराङ्मुखी निश्वसतीं मुहुर्मुहुः स्तलोदरीं पार्श्यशयां जनार्दनः ।
परामृशन् पाणितलेनं सर्वतो मुखच्छदं तं व्यपनीय चागदत् ।।
सरस्वतीं हैमवतीं रमासतीम् शचीं विहायार्हीत नाऽन्यसुन्दरी ।
प्रसून मेतद् भवती च सर्वथा हरिप्रिया तत्सदृशीदमर्हति ।।

we also come across such beautiful expressions like - अधीननाथापि चरेत्र मालिनी । विलङ्घ्य शस्य विनय कुलङ्गना ।

प्रियाप्रसादाय चरेन्न कोऽपथम्
घटो न खल्वल्पकमप्यवानमत्
मुखन्तु तस्या युवतेरवानमत् ।।

At the context of सत्यभामा failure to weigh her husband against even the hundreds of maunds of gold, poet puts a wonderful argument in her shrewd mind which is but natural. She thinks :-

अमुं मुकुन्दं रतिकेलिषूरसि सुखेन वारान् कति नावहं पुरा?
अभूतपूर्वस्य भरस्य का कथा शठस्य भाव्यं मायया मुनेः ।।

The description of the mental condition of सत्यभामा in the verse:- वचः समाकर्ण्य च दूरतो मुनेः etc, and the description of the reaction of her cowives at her request to relieve श्रीकृष्ण from नारद (in four verses) is true to human nature and bespeak the psychological understanding of the poet.

While almost all the Indian Languages are influenced by the Sanskrit Language, they, in their turn, influence Sanskrit and this poem itself stands as an example for this. But it is also natural that some of the

In Public domain. Digitization Muthulakshmi Research Academy

expressions and phrases peculiar to these languages, also should find place in sanskrit. A few examples can be selected from this poem itself. The word विचार्य in the verse 5/5 is used to mean पृष्ट्वा as is used in Telugu by some people, and more often, in Tamil. We also find the word सुवासिनी which is commonly used, in telugu, to mean, in the kalidasian, nay, vedic phrase अविधवा The phrase साप्ताहिक भूषणोच्चयः can be easily understood by Andhras who are familiar with such expression एडु वाराल नगलु meaning the jewellery meant for the seven days of the weak seperately.

As a good grammarian, Sri Sastri Garu has given us such happy प्रयोग's like पक्तिमम् सुखा करोति and मृषोद्यम्. In two places the word पुनीत is used as the क्तप्रत्ययान्त of the word पूञ् पवने क्रयादि गुण, where as the correct form is पूत. It is true, the word पुनीत has come into vogue recently not only in Telugu but also in Hindi, Marathi and the philologist may come forward and justify this, saying this is oe the 'anology' of पुनीतः the third person, dual of present tense. Yet a conservative minded Sanskrit grammarian in my opinion, would not accept such forms as correct.

I am highly grateful to the विद्वत् कवि श्री सूर्यनारायण शास्त्री garu, for his वात्सल्य with which he has asked me to write this introduction. I pray God to give many more opportunities to the modern Sanskrit Literature to be enriched by the valuable contributions of this learned poet.

P. Sri Ramachandrudu
Vedanta Siromani
Vidwan Visharada
M.A.(Sanskrit, English, Hindi)

In Public domain. Digitization Muthulakshmi Research Academy

expressions and phrases peculiar to these languages also find their place in sanskrit. A few examples can be selected from this poem itself. The word [illegible] in the verse 5/5 is used to mean [illegible] as is used in Telugu by some people, and more often in Tamil. We also find the word [illegible] which is commonly used in telugu, to mean, in the kalidasian, nay, vedic phrase [illegible] The phrase [illegible] [illegible] can be easily understood by Andhras who are familiar with such expression [illegible] meaning, the jewellery meant for the seven days of the week seperately

As a good grammarian, Sri Sastri Garu has given us such happy [illegible] s like [illegible] and [illegible]. In two places the word [illegible] is used as the [illegible] of the word [illegible] where as the correct form is [illegible]. It is true, the word [illegible] has come into vogue recently not only in Telugu but also in Hindi, Marathi and the philologist may come forward and justify this, saying this is be the 'analogy' of [illegible] the third person, dual of present tense. Yet a conservative minded Sanskrit grammarian in my opinion, would not accept such forms as correct.

I am highly grateful to the [illegible] gaaru, for his [illegible] with which he has asked me to write this introduction. I pray God to give many more opportunities to the modern Sanskrit Literature to be enriched by the valuable contributions of this learned poet.

P. Sri Ramachandrudu
Vedanta Siromani
[illegible]
M.A.(Sanskrit, English, Hindi)

In Public domain. Digitization Muthulakshmi Research Academy

भर्तृदानम्

1

1. सुतो विधातुः कलहाशनो मुनिः कदाचन द्वारवतीं समागतः ।
ददर्श देवं हरि मक्षकेलिका विनोदमग्नं सह भोजकन्यया ॥

2. स दृष्टमात्रं भगवान् मुनीश्वरं पुरोऽभिगम्य प्रणिपत्य सप्रियः ।
प्रदाय पाद्यार्घ्य मनर्घ्य मात्मनि प्रहृष्य तं प्राकृतवत्समस्तवीत् ॥

3. *पुनीतभूतं मम मन्दिरं भृशं विमुक्त आसं दुरितैः कृतै रहम्
पुरातनं मे सुकृतं च पक्त्रिमं मुने! त्वदीयागमनेन साम्प्रतम् ॥

4. तवास्ति काङ्क्ष्यं नहि पारिकाङ्क्षिणो न ते विनोद्यं च परे विनोदिनः ।
तथापि नः प्राकृतमार्गवर्तिनः समुद्दिधीर्षु श्चरसीह भूतले ॥

5. इति स्तुवानं बहुथा व्यतिक्रमं विनीतवाचं नत आह नारदः ।
अणोरणीयान् महतो महत्तरस्त्वमत्र लीलानरमूर्तिरीक्ष्यसे ॥

6. न किं भवान् स श्रुतिसम्पदं पुरा निहत्य तच्चोर मजाय योऽददात्?
भवान्न किं योऽब्धिनिमग्नमन्दरं क्षणात्समुद्धृत्य शिवङ्करोऽभवत्?

7. न वा भवान् यः पृथिवीं सुरारिणा समुद्दधाराब्धितले निमज्जिताम्?
नवा किमु त्वं नरसिंहविग्रहः स्वभक्तरक्षामकरोररिन्दमः ?

8. नवा त्वमेवाहतवामनाकृति स्त्रिविक्रमोऽजाण्डमकाण्डमाक्रमी?
न किं भवान् यः शमयाञ्चकार तं प्रचण्डबाहूद्भवदर्पपावकम् ?

9. भवान्नकिं योऽखिललोककण्टकं दशाननं वृक्षमिवाच्छिदच्छरैः?
नवा भवान् शैशवलोलयैव योऽवधीत्प्रलम्बासुरधेनुकासुरौ?

---

* तथा पुनीता तनुभिःपदैस्तव इति पुनीतशब्दः श्रीमद्भागवते १९ अध्याये ३१ श्लोके दृश्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

10. न सोऽसि किं कंसमुखान् नृराक्षसान् न्यहंश्च यो लोकहिताभिकाङ्क्षया?
न किं भवान् भाविनि कल्किनामको अनिष्यते म्लेऽच्छवधाय यः पुनः॥

11. निवर्तते वाङ्मनसा सहेति यः स्तुतस्त्रयीभिः स परात्परो भवान् ।
परंतु मां प्राकृतवत्स्तवीषि यन्निसर्ग एवैष महीयासां नयः ॥

12. भवान् महाविष्णुरियं विदर्भजा रमैव वैकुण्ठपुरं तवालयः ।
युवां दिदृक्षुस्तृषितो यथा सरस्तथाऽहमायामि न तेऽस्मि नूतनः ॥

13. इति स्तुवन् दिव्यसुमं सुरापगा सुवर्णपङ्केरुहपत्रवेष्टितम् ।
उपायनं श्रीहरये महामुनिः समर्प्य भक्त्या प्रणतोऽवदद्यथा ॥

14. इदं किलात्यद्भुतमद्भुतेषु यन्मनोज्ञमुद्गन्धि च पारिजातकम् ।
निदाघकालः शिशिरायते सुमे हिमर्तुरूष्मायत आलये स्थिते ॥

15. कदापि न म्लायति न त्वजत्यदः स्वदिव्यगन्धान् न जहाति च द्युतिम् ।
रजः प्रपूर्णा मसृणां च मोहनं मनः समुल्लासयति स्त्रवन्मधु ॥

16. नहि क्षुधा वा नहि वा पिपासया कदापि पीड्यो भविता जनः क्वचित् ।
अमासु भात्युज्ज्वलदीपसन्निभं तमांसि भित्वा निबिडानि सर्वतः ॥

17. धृतं तरुण्या तनुते मनोहरां तनुद्युतिं कोटिगुणां च पूर्वतः ।
अनन्तभोगान् प्रददात्यनारतं करोति कल्याणापरम्परां गृहे ॥

18. अलङ्कृतानेन सुमेन किङ्करीर्वधूः सपत्नीः कुरुते न केवलम् ।
प्रियं च दासीकुरुते सुखाकरोत्यनन्यसाधारणाभाग्यभागभवेत् ॥

19. दुकूलवासांसि समीहितानि बह्वनर्घ्यरत्नाभरणानि योषितः ।
मृदूनि तल्पानि च वाहनानि च स्फुरन्ति सङ्कल्पसमक्षणे पुरः ॥

20. प्रभाव एतस्य गिरामगोचरः सुमान्तरं नास्ति तुलाधिरोहणे ।
इदं समर्प्याङ्घ्रिसरोजयोः सुमं भवामि धन्यः परपूरुषस्य ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

2

21. हरिर्गृहीत्वा शिरसा नतेन तत्सुमं मुहूर्तं व्यचिचिन्तदात्मनि ।
ददामि कस्या इदमत्र दुर्लभं प्रियासु मात्सर्यमनः सु मे मिथः ॥

22. न सत्यभामा सहते प्रदीयते विदर्भजायै यदि नैव युज्यते ।
अमूं पुरास्थां परिभूय रुक्मिणीं दवीयसीं तां प्रति चिन्तनं च मे ॥

23. यथा वधूनां स्पृहणीयवस्त्विदं तथा न पुंसो मम तेन नोचितम् ।
तदप्रदानं च ततो ददाम्यहम् विदर्भजाया इदमित्यदात् सुमम् ॥

24. प्रियेणं दत्तं प्रसवं विदर्भजा प्रणम्य मूर्ध्ना प्रतिगृह्य सुस्मिता ।
अलञ्चकारात्मकचेषु शैलजा यथा कलां चान्द्रमसीं मनोहराम् ॥

25. परिष्कृतानेन सुमेन रुक्मिणी मुनिं ववन्दे विनयैकभाजनम् ।
त्रिलोकसाम्राज्यरमेव भास्वती दृगुत्सवं सन्दधती नवं हरेः ॥

26. अभौममुच्चैः स्पृहणीयमप्यदः सुमं न चायाचत रुक्मिणी पतिम् ।
अधीननाथापि न मानिनी चरेद्विलङ्घ्य शस्यं विनयं कुलाङ्गना ॥

27. महामुनिः प्रायुजदाशिषो यथा भव त्वमार्ये! महिषीजनाग्रणीः
शिरोमणिस्त्वं भव! वल्लभस्य ते भवेः सपत्नीजनतामनोज्वरः ॥

28. वदन्ति सत्याप्रिय इत्यमुं जनाः मृषोद्यमेतन्न ऋतं यतोऽददात् ।
सुमं भवत्या अवधीर्य तां हरिः पुरन्ध्रि! दिष्ट्या खलु वर्धसेऽधुना ॥

29. अपैतु वाल्लभ्यमदः शमन्तकप्रभावगर्वः प्रविलीयतां कृशः ।
हताऽस्तु सौन्दर्यकलासमुद्धतिः क्षणेन सत्याहृदयप्रतिष्ठिता ॥

30. सरस्वतीं हैमवतीं रमासतीं शचीं विहायार्हति नान्यसुन्दरी ।
प्रसूनमेतद्भवती च सर्वथा हरिप्रिया तत्सदृशीदमर्हति ॥

31. उमाऽऽक्रमी दर्घशरीरमात्मनः प्रियस्य वक्षःस्थलमब्धिकन्यका ।
सरस्वती केवलमास्यपङ्कजं त्वमाह्वरापादशिरः प्रियाङ्गजम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

32. न लङ्घते तावकशासनं प्रियः कदापिच त्वामनुगम्य गच्छति ।
करोति चिन्द्रातप आतपत्रकं विलिम्पते त्वां हरिचन्दनं यथा ।।

33. त्वमर्हसीदं कुसुमं महाद्भुतं सतीसहस्रे भवती मदोऽर्हति ।
प्रदाय तुभ्यं हरिणा समंजसं कृतं हि सत्यां परिहृत्य गर्विताम् ।।

3

34. निहत्य रक्षोनरकं हरिः पुरा विमोच्य बन्दीकृतसुन्दरीशतम् ।
ततो महिष्यष्टकमप्युदूढवान् विशिष्य सत्या च विदर्भजाऽऽदृते ।।

35. यदा यदा या प्रसिता यथा प्रिया तदा तदा केलिकया तथा स ताम् ।
विनोदयन् सर्वगतोऽस्ति नाद्भुतं त्विदं जगन्नाटकसूत्रधारिणः ।।

36. भवाम्यहं यौवनरूपभास्वराः महाभिजात्या प्रियवल्लभेति च ।
विवृद्धमात्सर्यमनाः परस्परं बभूव सत्यारमणी च रुक्मिणी ।।

37. यदत्र दृष्टं च यदत्र भाषितं तदञ्जसाऽचष्ट सखीजनस्ततः ।
विनिर्गतः स्वां महिषीं नियोजितः स्थितोऽत्र यो ज्ञातुमना रहः कथाः ।।

38. सुमप्रदानात्कृतदुर्विमाननां निरुध्य दारा इतरे विषेहिरे ।
प्रधानभूता महिषीषु रुक्मिणी परं च वृद्धा वयसा च सा यतः ।।

39. कुतोऽत्र नाद्यापि समागता सखी गता प्रियस्यान्तिकमक्षि दक्षिणाम् ।
बत स्फुरत्याकुलितं च मे हृदित्यतीव सत्या व्यथितास्त मन्दिरे ।।

40. अहं कथाः काः शृणुयां सखीमुखाद्धरेर्महाकापटिकस्य दुःश्रवाः? ।
विशङ्कते चित्तमनिष्टमेव मे बतेति सोताम्यति शून्यचेतसा ।।

41. तथा विषण्णामुपसृत्य तत्सखी जगाद कोपारुणालोचना सत्ती ।
किमम्ब! तुभ्यं कथयामि? रुक्मिणी गृहे प्रियं प्रैक्षिषि ते कथञ्चन ।।

42. तया सहाक्षान् सति दीव्यति प्रिये तव द्युलोकात्कलहाशनो मुनिः ।
हठात्समागत्य सुदर्लभं क्षितौ किमप्यदात्सूनमभिष्टुवन् मुहुः ।।

In Public domain. Digitization Muthulakshmi Research Academy

43. हरिर्गृहीत्वा कुसुमं तदादरान्महान् प्रसादोयमिति ब्रुवन् बहु ।
दृशावुपस्पर्श्य मुहुर्मुहुश्च तद्विदर्भजायै स्मितवक्त्र आर्पिपत् ॥

44. अलङ्कृता मूर्ध्नि सुमेन रुक्मिणी पुपोष लावण्यमपूर्वमद्भुतम् ।
अदर्शि राज्ञीव जगत् त्रयस्य मे दृशोः सपत्नीजनतार्चितेव च ॥

45. किमुच्यते धूर्तमुनेः प्रजल्पनम्? हरेश्च भैष्म्याः पुरतश्च मेऽवचत ।
यथाऽद्य सौभाग्यमदो घनीकृतो विलीय सत्याहृदये विशुष्यतु ॥

46. न कस्य कोपप्रभवेत्तदातनीर्मुने र्हरिस्तद्युवतेश्च पश्यतः ।
जनस्य दुर्भाषणवञ्चनाकलाः? शठत्रयं तद्वहुनोदितेन किम्? ॥

4

47. यथा भुजङ्गी चरणेन ताडिता यथाग्निकीला घृतधारयोत्थिता ।
तदुक्तवाचा प्रहताद्यमानिनी जगाद कोपारुणदृग् ज्वलन्मतिः ॥

48. कथं? पुनर्ब्रूहि पुनश्च कथ्यतां प्रजल्पितं यत्कलहाशयोगिना ।
श्रुतं श्रवः पेयमिदं सुरारिणा? किमाह रुक्मिण्यपि ? गूहसे कुतः? ॥

49. मुनिर्ददातु प्रसवं बहु स्तुवन् उपायनं श्रीहरये स यच्छतु ।
निजेच्छया स्वीयजनाय किन्त्वसौ कुतः कथां मेऽस्पृशदेतयोः पुरः ॥

50. परस्परस्यात्मनि बीजमावपन् कलेस्तथा जल्पतु नाम दुर्मुनिः ।
निसर्ग एषोऽस्य कथं न वारितः स शौरिणोच्छृङ्खलभाषणाद्यतिः?

51. तदस्तु धूर्तेन कृतं सुरर्षिणा कृतं तदास्तां च विदर्भकन्यया ।
यदत्र गोपेन कृतं शठेन तत्सहे कथं? मे व्यथते भृशं मनः ॥

52. जनाः स्वदोषान् न विदन्ति सङ्गतं स्त्रियो न विश्वास्यमिति प्रचक्षते ।
त एव सत्यं शरदभ्रचञ्चल प्रवृत्तयोऽविश्वसनीयमूर्तयः ॥

53. कृताऽद्य यावद्वहुमानितोच्चैस्तरां सपत्नीशतके प्रियेण मे ।
विमानिताद्यैवमहं कथं सहे? गिरस्तु तासामपहासगर्भिताः ॥

 In Public domain. Digitization Muthulakshmi Research Academy

54. स मां हरिर्वञ्चयते प्रियः किल प्रियास्य भैष्मी विदितं न मे यथा ।
तथाद्ययावच्चरितं कियद्बत प्रशंसनीयं, हरिवर्तनं सखि! ॥

55. ददौ किल श्रीहरये मुनिः सुमं विदर्भजायै स ददौ च तत्किल ।
इति प्रसङ्गं श्रुतवत्यसावं ध्रिये पुनः किं श्रवणीयमस्ति मे ? ॥

56. न वेत्त्ययं का नरकासुरं रणे निहत्य वीरा विजयश्रियं ददौ? ।
न वेत्ति रुक्मिण्यपि किं? न वेत्ति वा जनः? कृतान्याऽद्य मुरारिणा बत! ॥

57. सुमं प्रदत्तं वसता विदर्भजा गृहान्तरे यत्तदिहोपपद्यते ।
कथं सपत्न्यः परिमृज्य माननां भजन्ति तां दास्य इवात्र दूयते ॥

58. यथान्तराले वदनस्य जिह्विका यथा च सूत्रं कुसुमस्रगन्तरे ।
तदेव पुण्यैकफलं यदङ्गना हृदन्तरे सन्ततमस्ति तत्प्रियः ॥

59. वचो मम स्वप्नकथास्वपि प्रियो न लङ्घते किञ्चिदपि प्रयच्छति ।
न मे सपत्न्यै प्रथमं विमुच्य मां न तारतम्यं सहतेऽन्ययोषिताम् ॥

60. कथं सहेऽद्यावधि यो न चिन्तितः पृथङ्ममाङ्गात्प्रियता न शङ्किता ।
कदापि यस्येषदयं स वल्लभः प्रवर्तते यत्कटु चाधरोत्तरम् ॥

61. स विस्मृतः किं कृतगुप्तकेलिका वनान्तडोलाविहृतीर्बतावयोः ।
पणीकृतं द्यूतकलासु चुम्बनं विदर्भजाविभ्रममद्यलालसः? ॥

62. ददाति यत्काञ्चनरत्नभूषणान्यनर्घ्यवस्त्राणि, सुमस्रजः सखि! ।
भवेद्धि तत्सह्यमसौ ददाति चेन्मनोऽन्यनार्यै कथमत्र सह्यते? ॥

63. इति व्यथासञ्जनितक्रुधाज्वलन्मना वधूः कोपगृहं तमोवृतम् ।
यथा भुजङ्गी हरिचन्दनान्तरं विवेश फूत्कारततिं विमुञ्चती ॥

64. असौ वसाना परिधूसरं पटम् निरस्तसर्वाभरणा शिरस्तटम् ।
पटेन संवेष्ट्य तमोमये गृहे स्थिता यथाऽभ्रान्तर ऐन्दवी कला ॥

65. प्रवेपथु स्विन्नमभूत्तदङ्गकं प्रभातचन्द्रेण समं तदाननम् ।

In Public domain. Digitization Muthulakshmi Research Academy

उदश्रु तन्नेत्रयुगं यतोऽपिबत् प्रचण्डमात्सर्यविषं विकारकृत् ॥

66. मम प्रियः श्रीहरिरद्य रुक्मिणी विलासजाले पतितो यथा शुकः ।
भवे* दशक्यं मम तस्य सङ्गमः पुनश्च धिङ्मामिति सा विषीदति ॥

67. अपूर्वभूताद्विरहात्तदा वधूरधीरमुत्ताम्यति निश्वसित्यसौ ।
मुहुश्च तल्पे लुठति प्रमुह्यति प्रभूतमाक्रोशति खिद्यतेतराम् ॥

68. विषादतप्ता विमनायिता तथा सती न भुङ्क्ते न च वा निमज्जति ।
समीपगां न प्रतिभाषते सखीं न चावकुण्ठं व्यपनीय वीक्षते ॥

69. विशङ्क्य सत्यासहचारिणी मुनिप्रसूनवृत्तान्तनिवेदिनीं हरिः ।
भवेन्नु सङ्क्षुब्धमनाः प्रिया ममेत्यमूं ययौ सान्त्वयितुं मनस्विनीम् ॥

70. प्रवेपते केतुपटो यथा मनो दृशौ च चक्रे इव सभ्रमी बत ।
पदो र्विपर्यस्तधृतात्मपादुकस्त्वरायणमाणः प्रययौ रथेन सः ॥

71. रथात्स तद्वार्यवतीर्य सम्भ्रमाद्व्यतीत्य कक्षा विजनं तदङ्गणम् ।
विलोक्य शुद्धान्तगृहं गतस्ततः प्रशान्तकल्लोलमिव ह्रदं हरिः ॥

72. न तत्र कूजन्ति विहङ्गमाः कलं शिखावलो नृत्यति नैव दृक्प्रियम् ।
न कश्चन स्वागतिकश्च दृश्यते धृतं नु मूकव्रतमत्रवर्तिभिः?

73. मम क्वा सत्या? क्व मम प्रियेत्यटन् विचार्य चेटीं विदितस्तया पुरः ।
प्रदर्शिताध्वा गतया निजाग्रतः स नीत एकान्तगृहं गृहान्तरे ॥

74. शनैः शनैः कोपगृहं प्रविश्य तां पदादिशीर्षान्तकृतावगुणठनाम् ।
निरीक्ष्य मायी कृतहस्तसंज्ञया निषेवमाणा अपसार्य तत्सखीः ॥

75. स्वयं गृहीत्वा व्यजनं सखीकरात्स्मिताननो वीजयते समीपगः ।

---

* "शक्यमिति कर्माभिधायां लिङ्गवचनसामान्योपक्रमात् वामनकाव्यालङ्कारसूत्राणि पञ्चमाधिकरणे द्वितीयाध्याये २३ सूत्रम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

प्ररोचनाया इव तत्प्रियाङ्गना वपुर्ज्वलन्मन्मथजातवेदसः ॥

76. परीमले सम्प्रति पारिजातक प्रसूनकस्य प्रसृते हरे स्तनोः ।
कुतोऽयमागच्छति दिव्यगन्ध इत्यपास्य वक्त्रच्छद मैक्षताबला ॥

77. अतर्कितोपस्थितमेवमङ्गना समीक्ष्य हस्तस्थिततालवृन्तकम् ।
शिरोऽवनम्याश्रुकणान् मृजत्यसौ पुनः समाच्छादयदात्मनो मुखम् ॥

78. पराङ्मुखी निश्वसतीं मुहुर्मुहुस्तलोदरीं पार्श्वशयां जनार्दनः ।
परामृशन् पाणितलेन सर्वतो मुखच्छदं तं व्यपनीय चागदत् ॥

79. प्रिये! कुतस्त्वं मलिनांशुकं धरस्यपास्य कौशेयपटं कुतोऽजहाः ।
मनोज्ञरत्नाभरणानि? पल्लवस्तवाधरोष्ठः शुषितः कुतोऽभवत्? ॥

80. वचः सुधास्यन्दि न भाषसे कुतः? न वीक्षसे मां प्रणयार्द्रदृष्टिभिः? ।
दृढं न बध्नासि च बाहुबन्धनैस्तवापराद्धोऽस्मि कथं? वद प्रिये ! ॥

81. मनोऽवगन्तुं मम किं विचेष्टसे? न चेत् परीहासकृते व्यवस्यसि? ।
कृतं किमागश्च मया न सह्यते दशा तव ब्रूहि! दयस्व मे प्रिये! ॥

82. मनोवचोभ्यां क्रियया च वा प्रिये! वधूस्तत्वदन्या नहि लालिता मया ।
परत्र मिथ्याप्रणयः प्रदर्शितस्तत्वदीयसेवां गणयामि वैभवम् ॥

83. अलं गृहीत्वा तरुणि! त्वमन्यथा निरागसं मां त्वदधीनजीवितम् ।
न* विश्वसेस्त्वं यदि मामकं वचः शपामि सत्ये! शृणु! जीवितेन मे ॥

84. कृतं भवत्या मधुराधरेण मे कृतं च बाहापरिरम्भणेन च ।

---

* अत्रेद मवधेयम् - श्वसेत् - श्वसेतां - श्वसेयुः । श्वसेः श्वसेयम् अत्र गण कार्यस्यानित्यत्वज्ञापनात् शपो लुङ् न भवति । अनित्यत्वं च क्षमूषो घटादिपाठात् पठादयः पितः इत्येव षित्वे सिद्धे पुनः षित्करणात् ज्ञायते । एवं च न विश्वसेदविश्वस्ते विश्वस्ते । नातिविश्वसेत् न विश्वसेत्पूर्वविरोधितस्य आश्वसेषु निंशाचराः प्रत्यया दाश्वसन्त्य इत्यादयः प्रयोगाः उपपद्यन्ते (माधवीयधातुवृत्तिः)

In Public domain. Digitization Muthulakshmi Research Academy

अलं प्रियेऽद्य त्वदपाङ्गपातनं ममेति चेलाञ्चलमाचकर्ष सः ।।

85. अभिघ्नती शातकटाक्षजालकैः पटाञ्चलं तस्य कराद्विकृष्य सा ।
स्वहस्तलीलाकमलेन तं प्रियं प्रहर्तुमुद्युक्तवतीरुपावशा ।।

86. यदा प्रसन्ना न बभूव सान्त्वनै र्बहुप्रकारैरपि हास्यपेशलैः ।
वचोभिरस्याः पदपल्लवद्वयं ननाम मूर्घ्ना बहुमायिको हरिः ।।

87. विधातृशक्रप्रमुरवैर्यदर्च्यते हरेः शिरस्तत् प्रजहार भामिनी ।
स्ववामपादेन कथं मनस्विनी प्रिये कृतागस्युचितं समाचरेत्? ।।

88. प्रियाङ्गनायाः पदताडनात्तदा सरोमहर्षः कुहनापटुर्हरिः ।
स्मरेण लब्धोपदवन्मुदंगतः स्पृशंस्तदङ्गं पुनराह सस्मितम् ।।

89. प्रिये! भवत्याः पदताडनं पुनर्महान् प्रसादो मम किन्त्वहं व्यथे ।
कियद्रुजाभूत् पदपल्लवस्य ते क्षतस्य मद्गात्रजकण्टकैरिति ।।

90. वचः समाकर्ण्य हरेर्मनस्विनी समुत्थिता विश्लथबद्धवेणिका ।
स्तनांशुकं संस्पृशती दृशोऽरुणाः प्रसारन्यती चलिताधराऽवचत् ।।

91. विडम्बनाभिः कृतमद्य वञ्चिता त्वयाहमुत्तानहृदाऽद्दता किल ।
सुधामयीभिश्चतुरोक्तिभिश्चिराद्धसन्ति सख्यो महिषीजनश्च माम् ।।

92. न विश्वसेयं वचने तवानृते पुनश्च सन्दीपय मा शठ! व्रज! ।
न रोचते गीस्तव सुप्रिया हिता विदर्भजाता प्रणयस्वरूपिणी ।।

93. प्रलम्भनं वाक्पटुता च धूर्तता मृषावचस्तेऽजनि जन्मनः पुरा ।
इदं विदत्यप्यविवेकिनी त्वया विमानिताहधिगियं विमूढता ।।

94. तव श्रवो यन्मुनिना कृतं स्तवं विदर्भजाया अशृणोत्पुरा प्रियम् ।
अरुन्तुदं मे श्रृणुयाद्वचः कथम्? त्वमद्य जिह्नेष्युपय न्न मां कुतः? ।।

95. प्रकाश्य लोकोत्तरपारिजातकप्रसूनगन्धैस्तव दिव्यवैभवम् ।
समागतो मां हसितुं नचेत् कुतः समागमस्त्वं प्रविहाय रुक्मिणीम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

96. भवेदसुभ्योऽभ्यधिकं भवेच्च यद्विभूषणं गौरवकारणं च यत् ।
अपैति मानं यदि तन्मनस्विनी भवेद्धि जीवच्छव एव केवलम् ॥

97. प्रसूस्तव स्नेहमवेक्ष्य देवकी मयि प्रसन्ना बहुमन्यतेतराम् ।
स्नुषासु मध्ये कथमद्य सेवितुं कलङ्किनी तां प्रभवाम्यभागिनी? ॥

98. शमन्तकेनालमलं पिकैः शुकैः कृतं सरोभिर्जलकेकिकास्पदैः ।
कृतं च केलीवनपुष्पमण्डपैरहं हताशा नहि कार्यमस्ति तैः ॥

99. न मे सपत्न्यो बत यावदेव माम् हसन्ति तावत्परिकल्पयामि ते ।
मुदं घनां कामिति मां तु मन्यसे इति ब्रुवत्यश्रुमुखी निरुद्धवाक् ॥

100. विवृद्धशोकानलदग्धमानसा रुरोद पत्युः पुरतः स्थिता वधूः ।
पटाञ्चलेनावृतवक्त्रचन्द्रमाः पिकाङ्गनाकोमलकाकलीस्वना ॥

6

101. तथा क्रुधानिग्रहणेऽक्षमा प्रियां प्रियो मुकुन्दो रुदतीस्मिताननः ।
दृढं समाश्लिष्य परामृशन् शिरो मृजंश्य सोऽख्यद्गलिताश्रु गण्डयोः ॥

102. सुकेशि! दासे मयि ते कुतो व्यथा? लतान्तमात्रस्य कृते वचः शृणु !
प्रविश्य तन्नन्दनमाहरामि ते निरुध्य चेन्द्रं सुरपारिजातकम् ॥

103. प्रिये! त्वदीये खलु केलिकावचे सरस्तटे सम्भृतशीतमारुते ।
मनोज्ञरम्भातरुपण्डमण्डले प्रियो भवत्या अवरोपयाम्यहम् ॥

104. वचः समाकर्ण्य नवाम्बुदाकृतेः प्रियस्य सत्या धृतरोमहर्षणा ।
भृशं बभासे नवनीपवल्लरी यथा मयूर्यश्च सखीचयोऽभवत् ॥

105. तथा प्रसन्ना शरदापगेव सा विनिर्गता कोपगृहात्सहप्रिया ।
करं गृहीत्वा मणिमन्दिरं ययौ सखीजनालोकरवे समुत्थिते ॥

7

106. न याचितो दास्यति पारिजातकं पुरन्दरस्तं सुरभूरुहोत्तमम् ।

In Public domain. Digitization Muthulakshmi Research Academy

श्रुतं च शच्यै स ददावुपायनं कथं करोमीति हरिर्व्यचिन्तयत् ॥

107. विचिन्त्य सत्या सहितः सुरालयं प्रयाय बन्धुः किल नन्दनं गतः ।
तरुं समुन्मूल्य स हर्तुमुद्यतः प्रियाप्रसादाय चरेन्न कोऽपथम् ? ॥

108. श्रुतप्रवृत्तिर्मघवान् हरेत्तरुं हरिर्बलादित्यपरानपि द्रुमान् ।
हरेन्विति प्राप्तभयः सभाजयन् उपाहरत्तं हरये स्वयं स्तुवन् ॥

109. अपेक्षितं प्राप्य स पारिजातकं निवारितो भ्रात्रभिघातदुष्कृतात् ।
सुरै र्विसृष्टः प्रमदाभिनन्दितो हरिस्तमानीय वने व्यरोपयत् ॥

110. न सन्ति लोके कति पूरुषाः स्त्रियः? न सन्ति मोहोज्ज्वलसङ्कथाः कति? ।
न दृष्ट मद्यावधि न श्रुतं च यत्प्रियः प्रियायै दिव आहरत्सुमम् ॥

111. अहो बतास्ति स्पृहणीयमेतयोरनुत्तमं भाग्यमचिन्त्यवैभवम् ।
दुरापकाष्ठागतहार्दमेतयोरिति स्तुते तत्पुरदम्पतिव्रजः ॥

112. स पारिजातः कुरुते दृगुत्सवम् फलैश्च पुष्पैर्विविधैर्दलैर्वने ।
मुकुन्दरूपाः किल पारिजातको गृहे स्थितोऽस्या हृदयोत्सवं ददत् ॥

8

113. श्रिया महत्याऽनघरूपसम्पदा तथाविधेयीकृतवल्लभेन च ।
जितं मयेत्युद्धतमानमत्सरा सती सपत्नीः कुरुतेऽवधीरणाम् ॥

114. प्रपूर्णकामैः परितुष्टमानसौ परस्परस्नेहमयैकजीवितौ ।
उभौ च तौ द्रष्टुमनाः समागतः कदाचिदब्जासनपुत्रको मुनिः ॥

115. स दम्पतिभ्यामतिथिर्यथाविधि प्रदत्तपाद्यार्घ्य उदीतसम्मदः ।
कथाप्रसङ्गेन विनोदयंश्च तौ जगाद सत्यां कुहनामतिर्यतिः॥

116. पुरन्ध्रि! सत्ये! किमु वच्मि सौभगं त्वदीय? मासीत्तव पारिजातकः ।
त्वया सपत्न्यो नहि केवलाः शची महेन्द्रराज्ञी च जिता महत्तया ॥

117. तवास्य भाग्यस्य यथोचितं चरे व्रतोत्तमं सम्प्रति पुण्यकव्रतम् ।

In Public domain. Digitization Muthulakshmi Research Academy

अरुण्धतीहैमवतीशचीमुखैः सतीजनै र्यच्चरितं शुभावहम् ॥

118. तमानुपूर्व्येण वदामि पुण्यकव्रतप्रकारं शृणु ! देवि ! जाग्रती ।
उषैव मङ्क्त्वा परिधाय वाससी शुची नमस्येः श्वशुरौ च ते पतिम् ॥

119. ततः सपत्नीरुपसृत्य मत्सरं रुषावलेपौ च विधूय चित्ततः ।
निमन्त्रयस्व व्रतदर्शनाय ताः यथानुरज्यन्ति तथा त्वमाचरेः ॥

120. सुवासिनीभ्योऽहरहः समर्पये परः सहस्रेभ्य उपायनानि च ।
स्रजश्च गन्धान् बहुवस्त्रभूषणान्यवश्यमेवं कुरु! मासमुत्सुका ॥

121. पुनर्व्रतोद्वासकृतो पुरोधसम पुनीतमाम्नायविदं गुणाकरम् ।
महाकुलीनं च नियुज्य कारयेर्व्रतक्रियास्तेन यथाविधि कमात् ॥

122. धनानि धान्यानि च वस्तुवाहनान्यमूल्यरत्नाभरणाम्बराणि च ।
सवत्सगोधेनुशतं च किङ्करान् प्रकल्प्य तस्यै महिताय दक्षिणाम् ॥

123. प्रयच्छ भर्तारममुं पुरोधसे समन्त्रमस्मात् प्रतिगृह्यतां पुनः ।
तुलाप्रमाणं धनमस्य निष्क्रयं प्रदाय भद्रे! शिवमश्नुषे चिरम् ॥

124. फलं व्रतस्यास्य यदुच्यते बुधैः श्रियः समृद्धा बहुपुत्रसम्पदः ।
विना व्रतं तत्त्वदवाप्तमस्त्विदं भवत्प्रियः स्याद्भवदेकवल्लभः ॥

125. अहं विशङ्केऽथ तुलाप्रमाणकं किमस्ति रिक्थं तव? कथ्यतां सति ! ।
इति ब्रवाणं तमुवाच सा यथा कुतस्त्वयाऽशङ्कि ! मुने ! वचः श्रुणु ॥

126. मणिः प्रसूतेऽन्वहमष्टमद्गृहे सुवर्णभारान् महितः शमन्तकः ।
महच्च दत्तं जनकेन यौतकं स्थितश्च साप्ताहिकभूषणोच्चयः ॥

127. तुलाप्रमाणादधिकं बहूक्तिभिः कि मस्ति रिक्थं मम तच्च्युतुर्गुणम् ।
पुनर्यदा यावदपेक्ष्यते मया ददाति तावच्च तदा सुरद्रुमः ॥

In Public domain. Digitization Muthulakshmi Research Academy

9

128. सुरर्षिणा कापटिकेन संस्तुतं व्रतं चिकीर्षुः प्रियभामिनी हरेः ।
अवाप्य तत्सम्मतिमाह्वयद्वता निजाः सपत्नीः सुहृदश्च बन्धुताम् ॥

129. यथागमोक्तं परिकल्प्य पूजनाः गुरूपदिष्टा भृतभक्तिभावना ।
महीसुरेभ्योऽर्पितभूरिदक्षिणा नता कृताशीश्च सुवासिनीजनम् ॥

130. ततो मुनीन्द्रे जलधारया पतिः प्रदीयतामित्युपदेष्टरि प्रियम् ।
निरीक्ष्य लज्ञावनताननाऽह सा श्रुता मुनेर्वाग्भवतेति सस्मितम् ॥

131. हरिः स्मितालङ्कृतवक्त्र आह तां सरोजनेत्रे! कथमत्र शङ्कसे ? ।
त्वमागमोक्तं विधिमेनमाचरेस्तवान्यथा स्याद्वत कर्मलुप्तता ॥

132. व्रताङ्गदानस्य परिग्रहेण ना वनुग्रहं कुर्विति दम्पती मुनिम् ।
ययाचतुस्तं परमेष्ठिनन्दनं त्रयीविदं कोऽस्ति ततो महत्तरः ॥

133. पुरोहितेऽध्येतरि तक्रियापरत्रयीगिरां सा सजलं सदक्षिणम् ।
अदात्पतिं तत्त्वविदे महात्मने महर्षये नारदनामविष्णवे ॥

134. गृहीतदानः स उवाच नारदः पुरन्ध्रि! सत्ये ! प्रतिगृह्यतां पतिः ।
तुलाप्रमाणं परिकल्प्य निष्क्रयं धनं भवत्येति महानृजुः किल ॥

135. तुलां तदाज्ञापरिकल्पितां जनैः समारुरुक्षद्भगवान् प्रियो हरिः ।
घटान्तरे सन्निहितानि भूयसा धनं सुवर्णं मणिभूषणानि च ॥

136. यदा धनं तत्तुलितेन शौरिणा समानय काञ्चनरौप्यपात्रिकः ।
अमूल्यवस्त्राणि पुनःपुनर्जनो न भेजिरे यान्यपि तत्तुलां बत ॥

137. पुनश्च गत्वा परितो गृहंजनो गवेष्य नालब्ध च वस्तु किञ्चन ।
बभूव शुष्काम्बुरिवाम्बुधिस्तदा धने तदीये सतृणं समर्पिते ॥

138. ततस्तया प्रार्थितपारिजातक प्रवृष्टमत्यन्तधनं समर्पितम् ।
घटः स न स्वल्पकमप्यवानमत् मुखं तु तस्या युवतेरवानमत् ॥

 In Public domain. Digitization Muthulakshmi Research Academy

10

139. मुनिस्तदा म्लानमुखीं गलद्रुचं भयव्यथाव्याकुललोललोचनाम् ।
उवाच सत्यां तव सर्वसम्पदः पुरन्ध्रि! रिक्ताः प्रतिभान्ति मेऽधुना ॥

140. न दातुमीष्टे भवती प्रतिश्रुतं प्रियस्य ते निष्क्रयमेष आहृतः ।
पुरस्य वीथ्यां विपणिष्यते मया प्रगल्भवाचोऽभिहिता स्त्वया मुधा ॥

141. इतीरयंस्तामुपसृत्य माधवं प्रणम्य मूर्ध्नाऽह हरे! तव प्रिया ।
अदत्त सत्याऽत्रभवन्तमद्य मे तदेहि! सेव्योऽप्यसि सेवको मम ॥

142. गृहाण! वीणां मम सज्जितामिमाम् इति ब्रुवस्तां न्यदधाभ्दुजे हरेः ! ।
पवित्रगङ्गाजलपूर्णमित्यसौ कमण्डलुं वामकरे न्यवेशयत् ॥

143. जपोचितोऽसाववधीयतां सर इति न्यधत्तास्य करे च दक्षिणे ।
महेश्वरोऽदादिति कक्ष आर्पिपद्धरेर्मुनि श्वापदचर्म नारदः ॥

144. ततो नयंस्तं पुरवीथिका भ्रमन् जनाः पणध्वं परमेश्वरं हरिम् ।
पणध्वमांगच्छत नन्दनन्दनं प्रदाय मे निष्क्रयमित्यघोषयत् ॥

145. यतौ पते विंक्रयणाय वीथिका भ्रमत्यमुष्मिन् विषसाद भामिनी ।
अनेन धूर्तेन भवामि वञ्चिता कथं लभे मत्पतिमित्यदूयत ॥

146. किरातगीतेन यथा मृगी बत! यया झषी धीवरजालकेन च ।
वचोभिरेतस्य शठस्य मौनिनो हृता हतेत्यश्रुमुखी रुरोद सा ॥

147. यथा त्रिशङ्कोस्तनयं स कौशिक स्तथा प्रियं सम्प्रति पण्यवीथिकाम् ।
नयत्यसौ विक्रयणाय नारदो हतास्मि कुर्याकिमिति व्यकम्मत ॥

11

148. ततो हताशा प्रतिकर्तुमक्षमा विपण्णचिता बहुशो विलापिनी ।
गता सपत्नी विंनिवेद्य वञ्चनां पतिं विमुक्तं कुरुतेत्ययाचत ॥

149. तदैककान्ता पतिदानसङ्कथा निवेदिता किं प्रथमं त्वया हरेः? ।
त्वमेकपत्नी किल सर्वतोमुखी भवेत्तवास्मिन् प्रभुतेति मन्यसे ॥

150. मया कथञ्चित्कृतयाचनैर्मुनेः पतिर्विमुक्तोऽपि न मुच्यते त्वया ।

In Public domain. Digitization Muthulakshmi Research Academy

करद्वयीबद्धममुं निधास्यसि त्वदीयहर्म्यान्तर इत्यदूदुषत् ॥

151. ममाद्य वर्धापनमेहि मद्गृहं मयि प्रसीदेत्युपयाचितः पतिः ।
त्वयाऽसहिष्ण्वा विनिवारितो मिषादलज्ञिताऽऽगा इति कास्विदाह ताम् ॥

152. कृतप्रतिज्ञः सुमडोलिकोत्सव प्रदातुमार्यः प्रिय आगतो न माम् ।
कुकृत्यमेतत्तव भग्नवाञ्छिता कृतात्ययैवेत्यपरा निनिन्द ताम् ॥

153. तथा सपत्नीभरसौ तपस्विनी प्रचण्डसोल्लुण्ठनभाषणैः परम् ।
तिरस्कृता नम्रशिरा अतिह्रिया ततो निवृत्ता बत दूनमानसा ॥

154. वचः समाकर्ण्य च दूरतो मुनेर्जनाः पणध्वं परमेश्वरं हरिम् ।
पणध्वंमागच्छत नन्दनन्दन इति क्षता निश्वसतीक्षते दिशः ॥

155. अमुं मुकुन्दं रतिकेलिषूरसि सुखेन वारान् कति नावहं पुरा?।
अभूतपूर्वस्य भरस्य का कथा? शठस्य भाव्यं खलु मायया मुनेः ॥

156. न वेद्मयहं किं पतिगात्रगौरवं विचित्रमेतद्यदमुष्य वर्ष्मणा ।
तुलां नयात्येव गजप्रमाणकं सुवर्णरत्नाभरणादिकं मम ॥

157. कथं वहत्यद्य शिरीषकोमलप्रियो ममेमं गुरुवल्लकीभरम्? ।
मम स्मरन्त्या अपि तं भरं भुजो व्यथां विधत्ते नितरां वहन्निव ॥

158. मुनिः शठोऽसौ बहुमायिको हरिः उभौ च मां वञ्चयितुं व्यवस्यतः ।
करोमि किं? कं शरणं व्रजाम्यहं कथन्तु मायातिमिरं विशीर्यते ? ॥

12

159. इतीद्धशोकाकुलितेन चेतसा क्रियाविमूढाऽगतिका च रुक्मिणीम् ।
उपेत्य पद्भ्यां प्रणिपत्य मोचनं प्रियस्य तन्मस्करिणोऽभ्ययाचत ॥

160. पुरा सपत्न्या बहुधावधीरिताप्यसौ विदर्भेश्वरकन्यकामणिः ।
प्रशान्तचेता असहिष्ट जानती समुच्छ्रयाणां पतनावसायिताम् ॥

161. शिरोमणि र्या महिषीषु रुक्मिणी गताऽनु तां प्रेक्ष्य तुलां विहस्य च ।
उवाच रत्नाभरणादिभिः कथं हरिं पतिं तोलयितुं व्यवस्यसि? ॥

162. न लोकसाधारणपूरुषः स्वसः? अयं पतिर्नौ भगवान् परात्परः ।

 In Public domain. Digitization Muthulakshmi Research Academy

अमेयरूपः किल नैव शक्यते धनैः स तुच्छैः परिमातुमीदृशैः ॥

163. इति ब्रुवाणा तमपास्य धिग्धिगित्यमूल्यरत्नाभरणादिसञ्चयम् ।
समागतं प्रार्थनया मुनीश्वरं पतिं च मूर्ध्ना प्रणिपत्य सादरम् ॥

164. तुलां समारोप्य पतिं हसन्मुखं घटान्तरे सा तुलसीदलं न्यधात् ।
जनेषु पश्यत्सु सविस्मयं हरेर्घटो लघूभूय हठात्समुत्थितः ॥

165. अहो ! गुरुत्वं तुलसीदलस्य यन्निजोदरस्थैर्भुवनैर्महागुरुम् ।
हरिं लघीयांसमचीकरत्तुला स्थितं ततोऽभूत्तुलसी हरिप्रिया ॥

166. तदाह सत्या प्रणिपत्य रुक्मिणीं स्वस! र्यथाऽयं पतिरीक्षितस्त्वया ।
मया तथा नह्यनभिज्ञयाऽकरो ईशोर्ममोन्मीलनमद्य ते नमः ॥

167. प्रणम्य चेयं चरण द्वयं मुनेः पुरः स्थिताऽह व्रतकैतवान्मुने ।
प्रबोध्य भक्तिं मम चेतसस्तमः कृतं विशीर्णं कियती कृपा मयि ॥

168. पतिं ततः प्राप्य जगाद मूढया मया क्रुधालुप्तधियाऽसि ताडितः ।
मणिर्यथान्धेन शिलाधिया हृतः क्षमस्व देवेत्यपतच्च पादयोः ॥

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

कचदेवयानीयम्

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

INTRODUCTION

There is hardly any necessity of this introduction to introduce the renowned poet of 'Kachadevayaniyam' Shri Sannidhanam Suryanarayana Sastri, who has enriched modern Sanskrit literature with some anthologies and narrative poems.

In the present work, the author deals with a ख्यातवृत्त the love story of Kacha and Devayani, a story immortalized in the Adiparva of the Mahabharata. All the upakhyanas in the epic are like one long paranthesis, a mighty digression and a colossal aside to the reader. The under current of the most of the stories is the conjugal love, the passionate sufferings and their consummation in divine existence on the spiritual love attained after retribution.

The present author has kept the original story in view while writing this poem; but he has not descended to the narrative current of the original story. The poet, judiciously enough, has avoided the conventional links of the original story. In fact, his poetic muse voluntarily pauses at the departure of Kacha, repudiating the sincere affection of Devayani. The poet, I think, thinks that the readers are too familiar with the narrative to be treated with the progressive details. He has willingly confined himself to the development of love between the two lovers. In fact, more than the ecstacies of love, the agonies of despirse are vividly described in the poem.

Kacha approaches Sukracharya, with some ulterior motive and therefore he is indifferent to the lovelorn entreaties of Devayani, ney, he is callous towards them. In the context of this attitude of कच देवयानी s affection is praisworthy; she is struck by the arrows of cupid. Her love has the roots of geniality about it. It is sunny, kindly and with all keenness never touched by the poison of ulterior motive.

The poet, depicting the advent of love, describes, with vigorous rolling line of mellifluous words - the various अनुभावऽ of the Srungara

 In Public domain. Digitization Muthulakshmi Research Academy

Sentiment.

Look at the fantasies of Devayani.

कदापि चाज्ञातनिजागतिः शनै
शनैश्च पश्चाद् विनिमील्य चक्षुषी ।

Look at the exquisite use of suggestion -

इतः पिबन्तौ मधु भृङ्गदम्पती
प्रसूनपात्रे कच ! वीक्षतां भवान्
शुकीशुकावत्र मिथोऽभिजिघ्रतो
लतातरू श्लिष्यत इत्यवेक्षयेत् ।।

Despite Kacha's insensibility, tumults of love surge out from the heart of her. Though the poet has not described the depth of her love elaborately, he probes in the mind of Devayani with tender sympathy. The persuasive charm and warm pulsations of love sick heart glow through the following lines.

भवत्करेणापचितं सुमं भवे -
दगन्धिलं चापि सुगन्धि मे कच!
भवत्करेणापचितं फलं च मे -
विरुच्यपि स्यात्सुरुचीति भाषते ।।

The next stage, Longing, now follows. Love is best expressed mutely in seperation. Kacha's delay in returning home, engenders many apprehensions in Devayani's heart. The poet's rich sense of pity is manifested in such lines-

मदीयदृष्टिस्तिमिरान्धतां गता -
ममाङ्कानि प्रदहन्ति भूयसा ।

She is paying tributes of tears for her deity of love.

The precepter is able to know by clairvoyance, the foul trick played upon kacha, by the Asuras. Owing to profound affection for his daughter, he rejuvenates him, much to the dismay of the Asuras. The poet has described the dilemma of the preceptor with great insight.

Inscrutable indeed are the ways of Fate. It has shown its might.

In Public domain. Digitization Muthulakshmi Research Academy

He was compelled to bestow the सञ्जीवनीविद्या on Kacha.

तथापि सोऽनन्यगतिः कविर्ददौ
भवेत्कथञ्चिद् भवितव्यमुच्यते ।।

Fate has laid its frost-like hand upon the lotus like heart of Devayani. Her heart began to dance in glee at the rebirth of Kacha. The Long-Cherished dream was going to be actualized. The fruit was ready; but, as Devayani could not pluck it. Her love-abode was completely destroyed, though she tried to preserve the idol ! कच with stubborn resistance, refused to submit to the passionate appeals. His arguments though appealing to the intellect, do not sir any emotions. He could not marry Devayani owing either to a vow or to her being a sister of him. The arguments penetrate through the heart of Devayani.

स्मितं परावृत्तमुखेन यत्त्वया
मुहुश्च विद्धं यदपाङ्गकैः शितैः ।
हतं सुमैर्यन्मदेनन वा शरै-
स्तदेतदासीन्मृगतृष्णिका मम ।।

The adamant like heart of Kacha could not be moved even slightly by her arguments.

The poet has skilfully decribed the conditions of her heart once cherishing sweet desires, once seeing them crushed.

The following words, emanating from the agonized heart, clearly indicate the excruciating affliction of Devayani -

यथा सविस्रम्भमहर्दिवं वसन्
गृहे प्रभोर्हस्तकृतार्थसञ्चयः ।
भटस्तथा त्वं च गतः कृतार्थतां
पलायितुं धूर्ततया व्यवस्यसि ।।

Thus in a narrative charged with various feelings of love, pity, agony the poet has described the love story of two lovers. He has effected a marvellous blending of the conventional and the Rhetoric.

In Public domain. Digitization Muthulakshmi Research Academy

It is difficult to point even the salient features of his style, in this short resume. However, it can be said without reserve, that the scholar poet is a master of Sanskrit ornate style. The appropriate use of various tenses, the euphonious verses, chaste diction and charming compounds and the dexterity in using various figures of speech -

Happy विरोधाभास like अदत्तकर्णः ...... प्रदत्तकर्णः, सुरालयः ..... असुरालयः

अर्थान्तरन्यास like प्रकल्पते श्रेयस आपदुच्यते ।

उपमा like यथैव मीनं बडिशम् .... etc, and the knowledge of many a poetic convention, amply stand testimony to the erudite scholarship of the author.

The poet is doing a signal service to the people in reteling the classical stories in new light. When classical scholarship is seemingly on its wane and when old classics are not receiving due attention, such attempts of re-orienting them, will undoubtedly create a zeal for the true appreciation of the didactic tales in the less initiated ones.

The poet, therefore, deserves full admiration and encouragement for bringing forth such editions.

P.G.Lalye,
Lecturer inSanskrit,
Arts and Science College

In Public domain. Digitization Muthulakshmi Research Academy

आमुखम्

श्रीमतो भगवतो जगन्नियन्तुरनुग्रहेण धन्योऽस्मि यत्पुनरपि श्रीमतामान्ध्र-गीर्वाणभाषयोरनेकललितगद्यपद्यरचनाधुरन्धराणां श्री सन्निधानं सूर्यनारायणशास्त्रिणां कविवर्याणां सरसगम्भीरवचः पीयूषास्वादनसुसमयो मेऽद्य सम्प्राप्तः ।

कचदेवयानीकथेयं महाभारतआदिपर्वणि, सम्भवपर्वणि ७०-७१ अध्याययोरुपवर्णिताऽस्ति ।

देवैः प्रार्थितः सुरगुरोः पुत्रः कचः सञ्जीवनीविद्याहरणाय दानवगुरोः शुकस्य समीपमगच्छत् । विद्यासाधनोपायोऽपि पित्रा बृहस्पतिनैवोपदिष्टः । स त्वतीव चमत्कारेण कविनानेनैवं वर्णितः ।

अदत्तकर्णोऽप्ययमर्थितः परैः
प्रदत्तकर्णः स्वसुतागिरे भवेत् ।
विलोक्य सा त्वां नयनामृतायितं
सुता कवेर्नन्दति ते हिता भवेत् ।। इति

अयं कपटोपायोऽपि देवकार्यसाधनाय यत्न इत्यदोषायैव पर्यवस्यति । कचः शुक्रसमीपे ब्रह्मचर्यं चरिष्यामीति प्रत्यजानात् । बृहस्पतेः पुत्र आगत इति सन्तुष्टः शुक्रस्तं शिष्यत्वेनाङ्गीचकार । एतेन शुक्रस्य महदौदार्यं व्यज्यते । कचं, युवानं, संहननाङ्गं, विनीतं, नियमव्रतचारिणं, सदा गुरोः स्वपितुः शुश्रूषणे तत्परं दृष्ट्वा गायन्ती च ललन्ती च तं रहः पर्यचरद्देवयानी । तस्या मनोवृत्तिं कविरयं सुललितपदबन्धेन सुमनोहरभावविशेषैरेवमुपवर्णयति -

पदं चकारास्य कचस्य दर्शन
क्षणात्प्रभृत्यात्मनि कापि विक्रिया ।
कवेः सुताया बहुशः पिपासव-
स्तदङ्गलावण्यरसं दृशोऽगमन् ।।

युक्तं चैतत् । नारीणां स्वभाव एवायम् ।

"गायन्तं चैव शुल्कं च दातारं प्रियवादिनम्
नार्यो वरं कामयन्ते रूपिणं स्त्रग्विणं तथा" ।।

In Public domain. Digitization Muthulakshmi Research Academy

तस्याश्चेष्ठाः "फलानि पुष्पाणि, शिरोजबन्धो मम" इत्यादिभिः श्लोकैः कविनामुना वर्णितास्ता अतीव रमणीया रतिस्थायिनि शृङ्गारेऽनुभावाः परन्त्वेककर्तृका एव। कचस्तु देवयानीं गुरुदेवपुत्रिकां सहोदरीं चिन्तयतिस्म मानसे। एतदसुरा न सेहिरे।

"परां गुरो स्तद्दुहितुश्च रागिताम्
विलोक्य सेर्ष्यं कुधियः सुरद्विषः
हरेन्नु विद्यां मृतजीवनीं गुरो-
रितीममाशंक्य निहन्तुमुद्यताः" ।।

एतेन दानवानां बृहस्पतिविषये द्वेषः सञ्जीवनीविद्यागोपनाय यत्नश्च गम्यते। असुरास्तावदेकदा वने गुरोर्गाश्चारयन्तमेकाकिनं कचं जघ्नुः । कचमपश्यन्त्या देवयान्या विलापैरार्द्रहृदयः शुक्रो मृतजीवनीविद्यां प्रायुजत् । कचः सुप्तोत्थित इवाविरासीत् । दानवास्तं कचं प्राप्तजीवितमवेक्ष्य जातविस्मया गुरोः शुक्रस्य कृत्यमिदमिति विचिन्त्य पुनस्तं हत्वा दग्ध्वा तद्भस्म सुरायां मेलयित्वा च शुक्राय पानार्थं प्रायच्छन् । शुक्रः सुरया सार्थं कचभस्माप्यपिबत् । पुनः कचमपश्यन्ती देवयान्यक्रोशन्ती विललाप । अत्राचेतनान्यपि चेतनवच्छोकाभिभूतानीव वर्णयता कविनामुना चमत्कारकौशलं महत्प्रदर्शितम् ।

महता शोकेन विलपन्ती देवयानी स्वहृदयमाविष्करोति स्वपित्रे । तथाहि।

"स चन्द्रमा मामकहृक्च्चकोरयो
रसौ हृदो मे नवमन्मथः पितः !
युवा च शिष्यो भवतश्च शीलवा-
नयं च जामातृपदं तवार्हति ।।"

स्वसुतामेवं विलपन्तीमवेक्ष्य तां समाधाय दिव्यदृष्ट्या पश्यन् दिवि वा भुवि वा क्वापि नैक्षत तम् । पुनर्मनः सन्धाय ध्यायन् तं स्वोदर एवापश्यत् । दानवानामिदं कृत्यमिति ज्ञात्वा सञ्जीवनीविद्यां प्रायुजत् । तदा "भवत्प्रसादादहमस्मि जीवितः" इति कुक्षिस्थः कचोऽवदत् । शत्रुपक्ष्याय कचाय विद्यां दातुमनिच्छन्नपि शुक्र एवमचिन्तयन् ।

In Public domain. Digitization Muthulakshmi Research Academy

"तनुस्थितः संशृणुते कथं न मत्
परोपदेष्टुर्मुतजीवनीं कचः? ।
परोपदेशाद्वरमन्तवासिनः
कृतोपदेशो दुहितृप्रियस्य मे" ॥

एवं लब्धविद्यः सुरगुरुपुत्रः कचः स्वगुरोः शुक्रस्योदरं भित्वा बहिरागत्य विद्यामहिम्ना शुक्रमुज्जीवयमास । अत्र कविना यश्चमत्कारः कृतः स तस्यैव शब्दैः कथ्यते ।

मृतं तमाचार्यमवाप्तविद्यया
स जीवयन्नर्पितदक्षिणोऽभवत् ॥

एतेन परशुरामस्य पितृवाक्यप्रतिपालकस्य "स्वमातृरेणुकायाः शिरश्छित्वा सुप्रसन्नात्पितुः स्वमातृपुनरुज्जीवनवरं प्राप्य पुनर्मातरं रेणुकां लेभे" इति कथा स्मारिता भवति । तथैव श्रीहर्षमहाकवेश्चिन्तामणिमन्त्रचिन्तितफलरूपनैषधकाव्यकर्तुरपि स्मारयति ।

कचो यद्यपि मृतसञ्जवनीविद्याहरणायागतः तथापि कथासन्दर्भो महता वैचित्र्येणोपवर्णितः । येनागतिकगतिर्याचनात्पूर्वमेव शुक्रस्तांविद्यां कचायोपदिदेश।

"कचो गुरुं नार्थितवान्" इति श्लोके सर्वमिदं सोपपत्तिकमुपवर्णितम् । "भवेत्कथंचिद्भवितव्यमुच्यते" इत्यर्थान्तरन्यासोऽपि साधितः । सर्वमिदं "त्रिसुपर्णमयाचितं ब्राह्मणाय दद्या" दित्यपूर्वविधिं द्योतयति ।

अनन्तरं "उपेयुषी शुक्रसुता कचं प्रियं" इत्यारभ्य तयोः संवाद उपवर्णितोऽस्ति। स त्वतीव हृदयङ्गमः । न केवलमेत एव घट्टाः किंत्वाश्रमे कचप्रवेशः, देवयान्याः कचदर्शनादारभ्य सञ्जाताः शृङ्गारचेष्टाः कचहृदयावर्जनाय देवयान्या कृताः परिहासकेलयः, कचनिर्गमनघट्टः, किं बहुना कथितेन ? आमूलाग्रं सर्वोऽपि घट्टो मधुकोश इव रसनिष्यन्दी महत आनन्दाय कल्पते । वाचकाः सहृदया स्तानवश्यं पठन्त्विति प्रार्थये ।

असंशयमिदं ध्वनिकाव्यम् । कचो बृहस्पतेस्तनूजो युवा, परमसुन्दरः सुकुमारो विनीतः, स्वगुरोः शुक्रस्य परिच्चर्यायां सदा तत्परः । स्मरस्मेरतारुण्यघूर्णन्मदिराक्षी

In Public domain. Digitization Muthulakshmi Research Academy

शुक्रसुता देवयानी दृष्टिपातादेव कुसुमशरवशंवदा "कृतावकाशा किमपि प्रभाषितुं" इत्यादिभिः श्लोकैरुपवर्णिताः शृङ्गारचेष्टा या व्याञ्जीत् ताभिः सुस्पष्टं प्रतीयते तस्या हृदयाधिदेवतास्थानं प्राप्तः कच इति। एताभिश्चेष्टाभिस्तस्या रतिर्विशदीभवति। तथापि शृङ्गारो रसः प्राधान्येनोपवर्णित इति वक्तुं न शक्यते। रिरंसाभिव्यक्तेरेककर्तृकत्वात्। "रतिस्थायिभावस्य सम्यगपरिपोषात्। रतिर्देवादिविषया व्यभिचारी तथाञ्जितः भावः प्रोक्तः" इत्याचार्योक्तेरपरिपुष्टाया रतेर्भावत्वेन न रसत्वम्। किञ्चात्र भावोऽपि वक्तुं न शक्यते। अनौचित्येन प्रकर्षविरोधिना रूपेण प्रवर्तितत्वात्। प्रकर्षविरोधित्वं चैकाश्रयत्वे नायिकानायका श्रिताया रतेः। अत्र नायिकामात्राश्रयत्वाद्रतेः।

"स देवयान्या कच एवमार्तया
गुरोर्दुहित्रा शतशः सहस्रशः।
पुनः पुनः स्तम्भितबाष्पकण्ठया
न्यरोध्यपीषन्न चचाल निश्चयात्" ॥

भूयो भूयो रहस्यपि देवयान्याः प्रार्थना स्तृणायमन्यमानेन कचेन ऋग्वेदीय यमयमीसंवादस्य शुकरम्भासंवादस्य च स्मारितं भवति। एवं कचस्याननुरक्तत्वेन रतेरनुत्कृष्टता। तस्मादत्र न भावः किन्तु भावाभास एव। यथा वा।

मन्दस्मितं प्रकृतिसिद्धमपि व्युदस्तम्
संगोपितश्च सहजोऽपि दृशोस्तरङ्गः
धूमायिते द्विजवधूमदनार्तिवह्ना
वह्नाय कापि रति रङ्कुरतामयासीत् ॥

अत्र द्विजस्त्रीणामेव रतिः। न कृष्णस्य।

देवयानी मदनव्यथामसहमाना कचमालिङ्गितुमुत्कण्ठते। कचस्तु तां गुरुतनयां प्रतिषिद्धगमनां मन्यते। अपि च।

स देवयानीं ब्रुवतीं तथात्मजो बृहस्पतेराह पुरा त्वया यथा।
मयापि लभ्या पितृदेवसम्मतिः स्वस ! र्न मे हृत्प्रभु धर्मनिर्णये ॥

इत्यपि वक्ति कचः। तेन गम्यते ब्रह्मचर्यं चरिष्यामीति स्वप्रतिज्ञातं शास्त्रकृतं

In Public domain. Digitization Muthulakshmi Research Academy

समाजदृष्टं च प्रतिबन्धकं च न्नाभविष्यत् सोऽपि तां नात्यक्ष्यत् ।

अत्रेदमवधेयम् । कचो देवयान्या असकृत्प्रार्थनाभिः किञ्चित्परिवृत्तधैर्योऽपि बलवत्तर प्रतिबन्धकसत्त्वात् स्वानुरागं व्यक्तीकर्तुं न शशाक । प्रतिबन्धकं तावत् त्रिविधम् ।

१. ब्रह्मचर्यव्रतं चरिष्यामीति स्वप्रतिज्ञातरूपम् ।

२. गुरोस्तनयां सहोदरीति सम्बोध्य पुनस्तया साकं प्रणयस्या शास्त्रीयत्वरूपम्।

३. पितृदेवानां सम्मतिमन्तरेण पाणिग्रहस्यायुक्तत्वरूपम् । एवं कथेयं नायिकानायकयोरत्यन्तविरह एव पर्यणंसीत् । तस्मादत्र करुणो रसः । शोक एव यावद्रसं वर्तमानः स्थायिभावः ।

"अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः ।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति कथ्यते" ।।

करुणरसे नायिकानायकयोर्मरणं नात्यावश्यकम् । उदाहृतं च साहित्यकौमुदीकारेण ।

तं नागभोगपरिवीतमदृष्टचेष्ट-
मालोक्य तत्प्रियसखाः पशुपाभयार्ताः ।
कृष्णेऽर्पितात्मसुहृदर्थकलत्रपोता
दुःखाभिशोकभयमूढधियो निपेतुः ।।

पाश्चात्यैः शोकपर्यवसायि काव्यं वा नाटकं वा Tragedy इति कथ्यते तल्लक्षणं तैरेव कृतम् ।

"The conception of human activity striving with circumstances endeavouring to assist itself in the teeth of forces super human in power and meeting with utter ruin, but yet, maintaining its powers which affords the string of Tragedy in Greecc is alien to Indian thought."

कंसवधोरुभङ्गादीनि न शोकपर्यवसायीनि । दुष्टवधास्य सकलानन्दहेतुत्वात् । नागनन्दादौ लक्षणमिदं समन्वेति । तथापि न तत् शोकपर्यवसायि । अन्ते गौर्यादिदेवतानां प्रवेशैः सुखे पर्यवसानात् । भासेन यद्यपि नाट्यशास्त्रनियममतिक्रम्य

In Public domain. Digitization Muthulakshmi Research Academy

रङ्गस्थले वधादीनि दर्शितानि । तथापि ये घातितास्तेऽपि वधार्हा एवेति न शोकस्यावकाशः । "मोदेत साधुरपि वृश्चिकसर्पहत्या" इति न्यायेन तान्यपि न शोकान्तानि । अस्मिन् काव्ये लक्षणमिदं सम्पूर्णतयान्वेति । तस्मादनेन कविना ऐदम्प्राथम्येन ईदृशं काव्यं रचितमिति मम निश्चयः ।

इदं तु बोध्यम् । कविस्तावदसौ रसपरिपोषाय महान्तं यत्नमास्थत् । मूले केचन रसानुगुणा विषयाः सन्ति । ते सर्वेऽपि कविना रसास्वादे विलम्बो माभूदिति त्यक्ताः । उक्तं च ध्वनिकारेण ।

कविना काव्यमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यम् । इतिवृत्ते यदि रसाननुगुणां स्थितिं पश्येत् तदेनां भङ्क्त्वापि स्वतन्त्रतया रसानुगुणं कथान्तरं मुत्पादयेत् इति ।

शिरोमणिः, विद्यावाचस्पतिः, प्राज्ञः,
गुण्डेराव हर्कारे
Retired Sessions Judge,
Gadwal state.

In Public domain. Digitization Muthulakshmi Research Academy

कचदेवयानीयम्

1

1. सुरैः समीकेषु हता अनेकशः पुनर्ध्रियन्ते मृतजीवनीबलात् ।
सुरारयो येन वरीवृधीति त द्बलं द्विषां यान्ति सुराः परिक्षयम् ।।

2. अहोभिरल्पैस्त्रिदिवैर्न शिष्यते सुरालयः स्यादसुरालयः क्रमात् ।
न युज्यते तद्गुरुणा प्रतिक्रियामकुर्वतैवं यदुपेक्ष्यते मया ।।

3. विचिन्त्य वाचस्पतिरित्थमात्मजं कचं समाहूय विबोध्य तत्कथाम् ।
सुत! त्वमाराध्य गुरुं सुरद्विषां गृहाण! विद्यां मृतजीवनीं ततः ।।

4. न यच्छति प्रार्थितमात्र एव तां कविः स कस्मैचिदपि त्वया पुनः ।
निषेव्यमाणान्निपुणं मनीषिणा प्रसन्नचित्तादुपलभ्यतां ततः ।।

5. स देवयान्या दुहितुः प्रियङ्करः प्रविश्य तस्या हृदयं च रञ्जयन् ।
प्ररूढसौहार्दवतोर्द्वयोस्तयोः प्रसादलब्ध्वां मृतजीवनीं हर! ।।

6. अदत्तकर्णोऽप्ययमर्थितः परैः प्रदत्तकर्णः स्वसुतागिरे भवेत् ।
विलोक्य सा त्वां नयनामृतायितम् सुता कवेर्नन्दति ते हिता भवेत् ।।

7. तथोपदिष्टो जनकेन पुत्रकः कचः प्रणम्यामरकार्यसाधने ।
नियुक्तमात्मानमनल्पपुण्यकं विभावयन्नौशनसाश्रमं गतः ।।

2

8. अयं वसन्तः किं? मदः समागमात्सपल्लवा वृक्षलताश्चकासति ।
किमिन्दुरेषोऽस्य मुखस्य रोचिषा प्रभिद्यतेऽन्धं तम आश्रमान्तरे ।।

9. विमुक्तबाणासन एष मन्मथो? जयन्त एव त्रिदिवाद् भुवं गतः? ।
मनोज्ञभा बालविभाकरोऽयमित्यवेक्षमाणास्तममुं शशङ्किरे ।।

10. समेत्य काव्यं प्रणिपत्य सोऽब्रवीत् बृहस्पतेर्देवगुरोरहं सुतः ।
कचाभिधानोऽस्मि भवत्पदाम्बुजे सभक्तिशुश्रूषितुमागतो महन् ! ।।

In Public domain. Digitization Muttulakshmi Research Academy

11. निरीक्ष्य दिव्योज्ज्वलरूपवैभवम् विनीतवेषं विनयैकसम्पदम् ।
शरीरबद्धप्रथमाश्रमं सुतं गुरोरखण्डं सुकृतं तदस्तुत ॥

12. स आह तातस्तव देवतागुरुः स गीष्पतिस्त्वं मधुकोशमर्कगम् ।
त्यजन् कुतः शैलतटं सुदूरगं समागतोऽसि क्लिशितः, किमत्र ते? ॥

13. अहं यशस्वी भवितास्मि भूतले भवादृशाच्छिष्यजनादिति ब्रूवन् ।
सभाजयामास यथैव तद्गुरुं कचं स धन्यं स्व ममंस्त सत्कृतम् ॥

3

14. असौ प्रबुध्योषसि दोग्धि गाः पयः, प्रमार्ष्टि गोष्ठं सलिलं निषिञ्चति, ।
फलानि मूलानि समित्कुशान् वनात्समाहरत्यर्चति तद्गुरोः पदे ॥

15. समाप्य कृत्यानि सुतो बृहस्पतेरधीयमानो गुरुशिक्षिताः श्रुतीः ।
वनेषु गाश्चारयति प्रभाकरः प्रयाति यावद्गिरिमस्तमेककः ॥

16. तदाश्रमाध्यूषुषि पुत्रके गुरोः सपल्लवः स्थाणुरभूदहो ! बत ! ।
पयांस्यदाद्वन्ध्यगवी च तत्रगः फलानि सूते स्म च शुष्कभूरुहः ॥

4

17. पदं चकारास्य कचस्य दर्शन क्षणात्प्रभृत्यात्मनि कापि विक्रिया ।
कवेः सुताया, बहुशः पिपासवस्तदङ्गलावण्यरसं दृशोऽगमन् ॥

18. निलीय तस्मादुशनःसुता क्वचित् स्थिता सतृष्णं प्रपिबत्यमुं कचम् ।
अवेक्षितुं तेन चरत्यदूरतस्तदाभिमुख्यं व्रजति च्छलात्पथि ॥

19. कृतावकाशा किमपि प्रभाषितुं स्मिताननोपैति कचं मनोहरम् ।
तदातदागत्य सहायिनी भवत्यमुष्य कृत्येष्वतदर्थिता स्वयम् ॥

20. फलानि पुष्पाण्यवचिन्वितः कच स्थितानि वल्यामिति याचते मुहुः ।
सुराङ्गनाः किं मदपेक्षया वद सुरूपशोभा? इति वक्ति सस्मितम् ॥

21. शिरोजबन्धो मम विश्लथो भवत्यये! बधानेत्युपसृत्य याचते ।

In Public domain. Digitization Muthulakshmi Research Academy

अपप्तदक्षणोर्मम कौसुमं रज उपेत्य मां फूत्कुरुतादितीहते ॥

22. अधीयमाने निगमान् कचे शनै रुपेत्य शुक्रस्य सुता पुरः स्थिता ।
प्रदर्श्य मिथ्यास्वरवर्णदुष्टतां हसन्मुखी पाठयते मुहुर्मुहुः ॥

23. विनेतुमेषारभतेऽस्य सन्निधौ कचस्य पाठं कमपि व्यतीत्य तम् ।
परं पुनः प्रारभते विहाय तं स्मिताननान्यं च पुनः पुनर्नवम् ॥

24. निगुह्य कुत्रापि तदीयपुस्तकं पलाशदण्डं च कमण्डुलुं कचम् ।
गवेषिणं पार्श्वमुखी हसत्यसौ ददाति चान्ते बहु तेन याचिता ॥

25. कदापि चाज्ञात निजागतिः शनैः शनैश्च पश्चाद्विनिमील्य चक्षुषी ।
तदङ्गसंस्पर्शसुखाभिलाषिणी स्थिता भवेत्तद्विदिताप्यमुञ्चती ॥

26. कदाचिदेकाकिनमभ्युपेयुषी स्थितं निकुञ्जे ललिताङ्गभङ्गिभिः ।
मनोज्ञलास्यानि वितन्वती कचम् कलाविशुद्धिं परिपृच्छति प्रियम् ॥

27. वने चरन्ती सह तेन कन्यका कचेन निम्ने स्खलितेव कुत्रचित् ।
निषद्य दीर्घं श्वसती प्रसार्य मे करं गृहाणोन्नय चेति याचते ॥

28. कदापि मुग्धेव ददाति नोत्तरम् करोति मध्येव च नर्मभाषितम् ।
प्रवक्ति वक्रोक्तिशतानि चैकदा प्रगल्भकन्येव चमत्क्रियापरा ॥

29. इतः पिबन्तौ मधु भृङ्गदम्पती प्रसूनपात्रे कच वीक्षतां भवान् ।
शुकीशुकावत्र मिथोऽभिजिघ्रतो लतातरू श्लिष्यत इत्यवेक्षयेत् ॥

30. स्वपन्तमेनं समुपेत्य चैकदा निरीक्षते चुम्बनलालसा चिरम् ।
निजाननं प्राप्य तदाननं शनै र्भवेत्प्रबुद्धोन्विति भीतिमेति च ॥

31. कदाचनान्धे तमसि प्रचारिणः कचस्य तस्याभिमुखी कवेः सुता ।
व्रजन्त्यमुष्मिन् पतितोपगुह्य तं स्खलत्पदास्मी त्युपयाचते क्षमाम् ॥

32. त मासुराचार्यतनूभवा कचं तथात्मसात्कर्तुमनेकथाऽकरोत् ।
यथैव मीनं बडिशं कृतः श्रमस्तया वृथा बीजमिवोप्तमूषरे ॥

In Public domain. Digitization Muthulakshmi Research Academy

5

33. स देवयानीं गुरुदेवपुत्रिकाम् सहोदरीं चिन्तयतिस्म मानसे ।
तदीयचेष्टाः शिशुकेलिका यथा ऋजुः किलाभात्यनृजुर्मतावृजोः ॥

34. यथैव काव्यं तनयां च तस्य तां कचः सिषेवेऽनुजिघृक्षया तथा ।
तमाद्रियेतेस्म पिता सुता च ता वनन्यमात्मीयमनुत्तमं वरम् ॥

35. दिनावसाने प्रविलम्बिते कचे सुता कवेः क्षुभ्यति शून्यमानसा ।
स्थिताश्रमद्वारि दृशाऽनिमेषया निरीक्षते तत्पदवीं मुहुर्मुहुः ॥

36. कुतो विलम्बो भवता कृतः कच ! श्रमेण कुत्राप्युपविष्टवानसि? ।
तवाननं स्विन्नमभून्निरन्तरम् समुच्छ्वसीति प्रतिगम्य पृच्छति ॥

37. त्वयि स्थिते दूरवने भयङ्करे सुदुर्गमे क्रूरमृगैश्च कण्टकैः ।
सहस्रशोऽहं प्रणमामि देवता भवच्छुभायेति वदत्यसौ मुहुः ॥

38. भवत्करेणापचितं सुमं भवे दगन्धिलं चापि सुगन्धि मे कच ! ।
भवत्करेणापचितं फलं च त द्विरुच्यपि स्यात्सुरुचीति भाषते ॥

39. न रोचते मे कच ! गात्रसंस्क्रिया न वा च भुक्तिर्न च पानमम्बुनः ।
करोमि कृत्यान्यखिलानि चान्यथा न वीक्ष्य ते वक्त्रमिति ब्रवीति च ॥

6

40. परां गुरो स्तद्दुहितुश्च रागितां विलोक्य सेर्ष्यं कुधियः सुरद्विषः ।
हरेन्नु विद्यां मृतजीवनीं गुरो रितीममाशङ्क्य निहन्तुमुद्यताः ॥

41. परेद्युरेनं गहनान्तरे तरोर्निषद्य मूले प्रपठन्तमागमान् ।
प्रसह्य पश्चाद्विनिपत्य घातुका मृगं मृगेन्द्रा इव तेऽच्छिदन् बत! ॥

42. अलम्बयन्तास्य मृतं कलेबरम् क्वचित्तरौ कण्ठकगुल्ममध्यगे ।
विलोक्य गावस्तदवस्थमङ्ककम् रुदत्य उच्चैरगुराश्रमं चिरात् ॥

43. न देवयान्याद्य निरीक्षमाणया निजाश्रमद्वारि कचो न लक्षितः ।

In Public domain. Digitization Muthulakshmi Research Academy

यथापुरं बाष्पदृशः स्वधेनवः शुगार्तकण्ठा अवलोकिता बत! ॥

44. उपेत्य बाष्पप्लुतलोचना गुरुं विवर्णवक्त्राह सगद्गदं यथा ।
गतेऽपि यामे प्रथमे कचो गुरोः सुतोऽद्ययावन्न निवर्तते वनात् ॥

45. तृणानि जग्धानि न होमधेनुभिः र्जलं न पीतं न पयः स्नुतं बत! ।
अपस्वरेणालपितं पिकैः शुकैः र्हविर्भुजा न ज्वलितं हुतैः कृतैः ॥

46. हतोऽभिभूतः किमु घातुकैर्मृगैः ? किमेष दष्टो भुजगेन कुत्रचित्? ।
दवाग्निकीलावृत एष भस्मसादभून्नु? नैवास्य कथाऽवगम्यते ॥

47. विलोचनं मे स्फुरितं तु दक्षिणम् मदीयदृष्टिस्तिमिरान्धतां गता ।
ममाङ्गकानि प्रदहन्ति भूयसा पित! र्भवान् पश्यतु दिव्यचक्षुषा ॥

48. स्वकन्ययैवं बहुशोऽर्थितः पिता समाधिमग्नोऽस्ति निमील्य चक्षुषी ।
क्षणादुदन्तः सकलो यथातथम् कचस्य, शुक्रस्य मनस्यभासत ॥

7

49. पिता तदावेद्य शुगार्तया तया मृतं कचं जीवयितुं मुहुर्मुहुः ।
कृतैर्विलापैः सदयः प्रयुक्तवान् कृतेऽस्य विद्यां मृतजीवनीं द्रुतम् ॥

50. स दीर्घनिद्रामपहाय विद्यया प्रबुध्य भिन्दंस्तिमिरं मुखेन्दुना ।
वनाद्विनिर्गत्य निजाश्रमं विशन् प्रफुल्लचित्ता नकृतेक्षणातुरान् ॥

51. अवेक्ष्य दैत्या उपलब्धजीवितम् कचं मृतं प्राप्तविपादविस्मयाः ।
गुरोः क्रियैषेति विचिन्त्य तं पुन र्जिघांसवोऽस्थुर्भुजगा इवोत्फणाः ॥

52. मृताङ्ग मस्थ्नः शकलं च तस्य चेद् भुवि स्थितं जीवति जीवनीबलात् ।
यथा न जीवेत्पुनरेषको हत स्तथा करिष्याम इति व्यचिन्तयन् ॥

53. पुनः कदाचिद्विपिने यथापुरं प्रचारयन्तं गुरुगोगणं, कचम् ।
द्विषद्गणः सप्रसमं शितासिभिर्विदार्य शीर्षं कृतवांश्च खण्डशः ॥

54. न तेन तृप्ताः प्रविदह्य तत्तनुम् चितारजोभस्मविमिश्रितां सुराम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

अपाययंस्ते गुरुदेवतां कविं प्रहृष्टचित्ता ननृतुः कृतोत्सवाः ॥

8

55. दिगन्तरालादुपसंहृतद्युती रविः प्रविष्टोऽप्यपराद्रिकन्दराम् ।
खगाः समायुर्नकुलायसञ्चयम् न गोगणस्तद्विपिनान्न्यवर्तत ॥

56. रुदन्ति वत्सा जननीभ्य आतुराः पतङ्गपोता विरुवन्ति विक्लबाः ।
अवालिपन् हन्त! तमांसि सूचिकाप्रभेदनीयानि समस्तमाश्रमम् ॥

57. न दीप्यते चन्द्रमसापि तारकैः नवीज्यते वा बत ! मातरिश्वना ।
गुरोर्गतैस्तैर्भवितव्यमाज्ञया गवेषणार्थं नु सुतस्य कुत्रचित् ॥

58. उदश्रुनेत्रा रुदती स्वलद्वचा उवाच कन्या पितरं कथं कचः? ।
अमूनि मे दुःशकुनानि सूचयन्त्यरिष्टमेनं पित! रात्मनेक्षताम् ॥

59. निबद्धवैरैरसुरैः खलैः पुनर्हतेन भाव्यं धिषणस्य सूनुना ।
न चेदमुष्मिन् समये कथन्तु ते नटन्ति नन्दन्ति यथा महोत्सवे ॥

60. न तावदश्नामि न यावदागतः कचो मृतश्चेन्म्रियते मयाऽपि च ।
बिलम्बनं नानुमृतेरहं सहे प्रसीद! तातास्य कथां निबोधय ॥

61. स चन्द्रमा मामकदृक्चकोरयो रसौ हृदो मे नवमन्मथः पितः ! ।
युवा च शिष्यो भवतश्च शीलवानयं स जामातृपदं तवार्हति ॥

62. विलापिनीमेवमनेकथा सुताम् पिता समाश्वास्य समाधिमास्थितः ।
चिरं समीक्ष्यापि न दृष्टवान् कचं न वा शरीरं न च वास्थि भूतले ॥

63. पुनः समाधाय मनः पिता चिराददर्शदात्मोदरसंस्थितं कचम् ।
अवेदसौ राक्षसकृत्यमादितो विषीदतानेन मुहूर्तमासितम् ॥

9

64. प्रयुज्य विद्यां मृतजीवनीममुं यदासुभिर्योजयते कविस्तदा ।
स्वगर्भमध्यादुपलब्धचेतनः कचो बभाषे भगवन्! नमोऽस्तु ते ॥

In Public domain. Digitization Muthulakshmi Research Academy

65. भवत्प्रसादादहमस्मि जीवितो न गन्तुमीशोऽस्मि बहिस्तवोदरात् ।
इतस्ततः सञ्चलितुं च न प्रभुः स्थितोऽस्म्यहं शृङ्खलयेव बन्धितः ॥

66. वचः समाकर्ण्य तदस्य भार्गवः कथं बहिर्यात्यय?मत्रचेत्स्थितः ।
कथंनिरुद्धश्वसितो बत ! ध्रियेे? मम प्रभिद्योदरमेत्ययं बहिः ॥

67. तथागतं मां क उपात्तजीवितम् प्रभृर्भवेत्कर्तु?मिति व्यचिन्तयत् ।
कचाय दातुं मृतजीवनीं तदा मनो दधौ नैव न दातुमप्यसौ ॥

68. तनुस्थितः संशृणुते कथं न मत् परोपदेष्टुर्मृतजीवनीं कचः? ।
परोपदेशाद्वरमन्तवासिनः कृतोपदेशो दुहितृप्रियस्य मे ॥

69. इति स्वचित्ते बहुधा परामृशन् कविः प्रवृद्धोदरपीडनासहः ।
उपायमन्यं न विदन्नुपादिशत् कचाय विद्यां मृतजीवनीं तदा ॥

70. तदा विदार्योदरमस्य निर्गतः सुधाकरोऽभ्रं प्रतिरोधिनं यथा ।
मृतं तमाचार्यमवाप्तविद्यया स जीवयन्नर्पितदक्षिणोऽभवत् ॥

71. हरेत्स विद्यां मृतजीवनीं गुरो रितीर्ष्यया तैरसुरैर्हतः कचः ।
तदेव तल्लाभकृते व्यजायत प्रकल्पते श्रेयस आपदुच्यते ॥

72. कचे पुनः सम्प्रतिलब्धजीविते व्यभात्सुधांशुर्दिवि तारकागणः, ।
अवात्समीरः पतगाश्च गोगणा निवृत्य तांस्तान् शिशुकानन्दयन् ॥

73. कचो गुरुं नार्थितवां स्तदर्थितोऽप्यसौ न विद्यां प्रददाति जीवनीम् ।
तथापि सोऽनन्यगतिः कविर्ददौ भवेत्कथञ्चिद्भवितव्यमुच्यते ॥

74. कचं समुज्जीवितमात्मजीवितं तमभ्यनन्दत्पितरं च कन्यका ।
परस्परोज्जीवनकारणे उभावभिष्टुवाना प्रणनाम पादयोः ॥

75. उपेयुषी शुक्रसुता कचं प्रियं परीक्षमाणावयवान्यवास्थित ।
पुरेव पूर्णावयवोऽस्त्ययं न वे त्यशङ्कि सम्प्राप्तपुनर्जनिस्तया ॥

76. तमाह कन्योशनसः कच ! प्रिय ! त्वया न किञ्चिद्विदितं मया तदा ।

In Public domain. Digitization Muthulakshmi Research Academy

शुगार्तया यत्र गवेषितं मुहुर्भवत्कृते यद्गदितं, कृतं च यत् ॥

77. तदाऽत्रपेऽसून् कच! दध्नुषी पुनर्हतेऽसुरैस्त्वय्यतिकर्कशात्मभिः ।
कथञ्चिदाश्वासितया मया स्थितं भवान् स्वपित्रा श्वसितीत्यपेक्षया ॥

78. न मे भवत्तः प्रियवस्तु विद्यते न मे सुहृत्त्व न्न च कोऽपि बान्धवः ।
न देवता वा भवतो विशिष्यते समर्चनीया कुसुमैर्दलैर्नवैः ॥

11

79. इति ब्रुवाणां प्रणयस्वरूपिणीं स देवयानीं तनयो बृहस्पतेः ।
अभाषद्व्रतायि! स्वस! रर्पयामि ते कृतज्ञतां स्निग्धहृदे मयीदृशे ॥

80. स्वस!र्मयि स्निग्धमनस्कया त्वया तवार्यमिश्रैः पितृभिश्च वत्सलैः ।
य आदरो, या प्रियता, स्वकीयता कृताऽधमर्णोऽस्मि नमामि तत्कृते ॥

81. भवत्पितुस्त्वं त्वदपि प्रियङ्करो भवत्पिता स्थः स्म विशिष्य मे स्वसः! ।
तथा भवद्भ्यां चरितं यथा मया नहि स्मृता मत्पितृमित्रबान्धवाः ॥

82. गतानि वर्षाणि बहूनि मे स्वसः! समायतस्ते पितुरर्चितुं पदे ।
सिषेविषोर्मत्पितृपादपङ्कजे ममानुजानीह्यधुना विनिर्गमम् ॥

83. प्रयातुकामोऽप्यहमेतदाश्रमा त्प्रसर्तुमीष्टे चरणं न मे पुनः ।
इहस्थगोवत्सगणः पतङ्गमा लताश्च वृक्षाश्च हरन्ति पृष्ठतः ॥

84. अधीतमत्राध्ययनीयमर्जितम् समस्तशास्त्रं कृतकृत्यतां गतः ।
न चास्ति किञ्चित्करणीयमत्र मे विसृज्यतां तेऽद्य सहोदरः कचः ॥

85. इति श्रुते तद्वचने सुता कवेर्निपत्य निर्घातहतेव मूर्छिता ।
कृतोपचारा प्रतिलब्धचेतना शनैः शनैः प्रक्रमतेस्म भाषितुम् ॥

12

86. मयाद्ययावद्विदितं न ते मनो ममेव सुस्निग्धमिति व्यपौहिषम् ।
तवाननाद्विप्रियमीदृशं वचो यथा सुधांशोर्गरलं विनिःसृतम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

87. यदङ्गलावण्यमवर्णयो मुहुर्विलासभङ्गीर्यदचित्रयो मम ।
कृतानि गीतान्यशृणोश्च यद्बहु प्रलोभ्य तद्दूरमनेष्ट मे मनः ॥

88. स्मितं परावृत्तमुखेन यत्त्वया मुहुश्च विद्धं यदपाङ्गकैः शितैः ।
हतं सुमैर्यन्मदनेन वा शरैस्तदेतदासीन्मृगतृष्णिका मम ॥

89. अनेकशस्त्वामवदं यथा भवत्तनुं स्पृशन्त्याः पुलका ममोदियुः ।
मुखेन्दुना ते हृदयोत्पलं च मे दिवापि फुल्लं भवतीति विस्मृतः?

90. भवन्तमध्यापयदागमान् पिता ग्रहीष्यसि त्वं मम पाणिपल्लवम् ।
इति प्रगाढेन मनोरथेन तत्प्रयात्यशोध्यैव गुरोर्ऋणं भवान् ॥

91. भवत्पिता गीष्पतिरप्यनर्पित स्वदेशिकर्णं कथमादरिष्यते? ।
गुरोर्विनाशीर्वचसा न लभ्यते कदापि विद्याफलमित्युदीर्यते ॥

92. कदाचन त्वामवचं कचासि मे प्रियस्ततो मास्मगमः पुनर्दिवम् ।
गमिष्यते चेद्भवताऽनुगम्यते मयेति चाङ्गीकृतमद्य विस्मृतः? ॥

93. पितावयोः संलपतोश्च खेलतोः परस्परं प्रश्नयतोः प्रहेलिकाः ।
विजित्य चोच्चैर्हसतोः प्रकुप्यतोरलीकमाशंसत पाणिपीडनम् ॥

94. अधीतसर्वागमसञ्चयो भवान् कुशाग्रबुद्धिर्मथितार्थजालकः ।
स्मितैरपाङ्गैर्वचनैश्च चेष्टितै र्मनोहरैर्मे हृदयं न ते स्फुटम् ॥

95. अचित्रितं कुड्यमवल्लरिस्तरुर्नलब्धविद्यश्च सुरूपशोभितः ।
विना युवत्या रमणीयया युवा कथं भवादृक् प्रविशोभते कच! ॥

13

96. स देवयानीं ब्रुवतीं सगद्गदम् कचो बभाषे भवती स्वसा मम ।
गुरोरसि त्वं दुहिताऽपरः पिता गुरुर्नधर्म्यस्तव मे करग्रहः ॥

97. असूत गर्भाद्भवतीं सुतां प्रसूः पिता स्वगर्भात् खलु मां सुतं स्वसः! ।
भवाव आवामिह भिन्नगर्भजौ कथं पिता नावुपयाममिच्छति ॥

In Public domain. Digitization Mumukshu Research Academy

98. न चेष्टितानां वचसां दृशां तथा मृदुस्मितानामवगूढता च ते ।
मयार्जुचित्तेन न बुध्यते स्वसः! शपामि पित्रोश्चरणद्वयेन नौ ॥

99. कृता मया या वनकेलिकास्त्वया कृताश्च गोष्ठ्यः परिहासपेशलाः ।
मनोज्ञलास्यानि समीक्षितानि या न्ययि! स्वसृस्नेहपराणि नान्यथा ॥

100. मया न दत्ता गुरुदक्षिणेति मां कृतापराधं बहुशो विगर्हसि ।
त्वया न तत्किं विदितं मया स्वसः! पिता प्रमीतः पुनरात्तजीवितः ॥

101. मया न वाचा, मनसा च, कर्मणा, गुरौ न च त्वय्यपराध्यता स्थितम् ।
विशिष्य तातान्मम तावकः पिता प्रदत्तविद्यो भगिनि! प्रसेवितः ॥

102. निवर्त्यतां ते हृदयं मनोरथा दवद्यभूताद्विबुधैर्विवेकिभिः ।
कथं प्रजाताऽपि महात्मनो मुनेरनार्यमार्गे तु पदं चिकीर्षसि ॥

14

103. इति ब्रुवाणं कचमाह कन्यका मया न धर्मेतरमार्ग आश्रितः ।
समस्तमेतन्मम धर्मवेदिना विमृश्य पित्रा कृत एव निश्चयः ॥

104. करग्रहेष्वष्टविधेषु शस्यते महीसुरैर्ब्राह्ममुखं चतुष्टयम् ।
परिग्रहो मे क्रियतां कच! त्वया चतुष्टये तेऽभिमतेन कर्मणा ॥

105. भवत्पिता देवगुरुर्बृहस्पतिः पिता च मे दैत्यगुरुर्गुणोत्तरः ।
कुलेन शीलेन सुरूपसम्पदा न किञ्चिदावामवहीनतां गतौ ॥

106. स देवयानीं ब्रुवतीं तथात्मजो बृहस्पतेराह पुरा त्वया यथा ।
मयापि लभ्या पितृदेवसम्मतिः स्वस! र्नमे हृत् प्रभु धर्मनिर्णये ॥

15

107. ततो मया गम्यत इत्युदीर्य तम् द्युलोकयानाय समुद्यतं कचम् ।
सुता कवेः प्राह मदर्थितः पिता ददावसूस्ते निहताय तत्स्मर ॥

108. असुप्रदात्र्यै प्रतिदीयते त्वया कृतज्ञ इत्येकपदं निरर्थकम् ।
निजोपकर्तुः प्रियकार्यकृज्जनो भवेत्कृतज्ञोऽनृणतां च गच्छति ॥

In Public domain. Digitization Muthulakshmi Research Academy

109. न केवलं त्वं प्रतिलब्धचेतनः प्रदत्तसञ्जीवनिरप्यभूः कच ! ।
तपोभिरिन्द्रप्रमुखैश्च दुर्लभां प्रियङ्करो मे जनकोऽददादमूम् ॥

110. यथा सविस्रम्भमहर्दिवं वसन् गृहे प्रभोर्हस्तकृतार्थसञ्चयः ।
भटस्तथा त्वं च गतः कृतार्थतां पलायितुम् धूर्ततया व्यवस्यसि ॥

111. मृषा पितुस्तेऽनुमतेरवाप्तये ब्रवीषि यामीति निवर्तसे न माम् ।
त्वया प्रमाणीक्रियते कथं न मे पितुर्वचो यस्तवचार्चितो गुरुः ॥

112. ऋजुप्रवृत्या न पितुर्ममार्चितुम् पदाम्बुजद्वन्द्वमिहत्वमागतः ।
प्रतार्य हर्तुं मृतजीवनीं यतः पलायसे तामुपलब्धवानितः ॥

113. प्रसज्यते कोऽपि न धर्मविप्लवे न शीर्यते वा कुलगौरवं तव ।
गुरोः स्म माभूः कच! विप्रियङ्करः समूलघातं तव हन्ति यच्छुभम् ॥

114. पिता न मे सन्निहितोऽस्ति तत्कच ! त्वमर्हसि स्थातुमहानि कानिचित् ।
स यावदायात्यकृताज्ञकः कथं व्रजस्यनामन्त्र्य गुरुं हितं च ते ॥

115. समाप्तविद्योऽर्पितदक्षिणो गुरोः प्रयाति शिष्यस्तदनुज्ञया गृहम् ।
उपेक्ष्य तातं नसमाप्तविद्यकः कुतो वद त्वं त्वरसे निवर्तितुम् ? ॥

16

116. स देवयान्या कच एवमार्तया गुरोर्दुहित्रा शतशः सहस्रशः ।
पुनः पुनः स्तम्भितबाष्पकण्ठया न्यरोध्यपीषन्नचचाल निश्चयात् ॥

117. न किञ्चिदुक्त्वा प्रतिभाषणं हृदि प्रणम्य भक्त्याश्रमदेवता गुरुम् ।
प्रतिष्ठमाने विमनायिता कचे स्थिता हताशार्पितबाष्पलोचना ॥

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

कादम्बरीसारः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Foreword

It is said that old age brings sloth and inactivity to a man. But this adage has been falsified in the case of vidwan Siromani Sri Sannidhanam Suryanaryana Sastri, whom Idleness or resignation have not touched at all. He is advancing towards eighty, but he still continues writing sanskrit works, throwing open the rich treasures of our languages to the readers. His recent publications like आन्ध्रदेश्यहास्यकथाः आन्ध्रभागवतानुवादः, आन्ध्रकाव्यकथाः have received wide approbation. His indefaiguable endeavour is further vouchsafed by this book कादम्बरीसारः

कादम्बरी a prose romance written by Bana, has a unique position in Sanskrit literature. It is a गद्यकाव्य, a prose work, endowed with the qualities of rich style of Sanskrit Kavya. Bana, the author of कादम्बरी, has received glowing tributes from ancient and modern critics, for his dexterous use of compounds, grand concepts, alankaras with the speciality of परिसङ्ख्या and विरोधाभास and engaging stories. The work is translated into many Indian and foreign, languages, indicating thereby its popularity among the scholars. Aptly it is said कादम्बरीरसज्ञानामाहारोऽपि न रोचते ।

I have however, noted a peculiar fact about Kadambari. Though the entire Kadambari is printed and is available in excellent get up, only a few students or teachers read the work till the end. They confine themselves to the textual portions prescribed for various exmainations. Many students and teachers read upto the narration of Mahasveta or the description of the Acchoda lake. The lengthy narrations, with their amboxment of stories, compel the readers to concentrate more on the stylistic peculiarities than on the systematic narrative details. Attractive as the stories are the majority of the readers is reluctant to read the

 In Public domain. Digitization Muthulakshmi Research Academy

book in its entirety. Only a few students of कादम्बरी can recollect the events of कादम्बरी in their sequence. This might have been due to the complications in the story which have arisen due to the curse element.

Some authors, conscious of this difficulty, have written Kadambari digests. कादम्बरीसार of Apte and कादम्बरीकथा by अभिनवभट्टबाण are famous. They have their's own merit, but they have gleaned sentences from the कादम्बरी itself and put them together.

Thus a reading of these books is also like reading the original कादम्बरी only. The writers of the digests have retained the same aura of difficult and verbose style of the original कादम्बरी

The present work, however, is certainly an exception to all the previous digests. Sri Suryanarayana Sastri wields a facile pen in all his writings and this work is no exception to it. In a short bari, incorporating all the narrations and sub narrations, without any omision or comission. Even though our desire for exalted style is satisfied even by reading a few papes of Kadambari, our longing for understanding the story may not be satisfied. All of us may not have patience to read even the digests, to say noting about the original Kadambari. This work, however satisfactorily fulfills our desire to understand the story. In this respect, this work written in prose is the first one. though we have a summary in verses written by the kashmirian poet, Abhinanda.

It is needless to repeat that Sastriji has written the work in a very simple homely style. He has however, used some expressions, which are the illustrations of certain typical rules of panini. Himself a renowned grammarian, Sastriji can coin expressions of his own, and thus introduce readers to certain important rules of panini.

Special uses of the expressions like अध्युष्यताम्, चारं चारम्, आयतीगवम्, मांसप्रति, बाष्पायमाणः, तस्मिंस्तिष्ठे नयनपर्वायमाणा, पुण्यरात्रं, अश्वोरसम् अधीतो वेदेषु कुशाग्रीयबुद्धिः मृषोद्यं, संचरते धर्ममार्गेण bear an eloquent testimony to the mastery of the author on grammar. He has

In Public domain. Digitization Muthulakshmi Research Academy

also used very delightful maximis like खाटकृत्य निष्ठेवनीयः, ममैव मम नेत्रं सूच्या विद्धम् । अन्यद् भुक्तमन्यद् वान्तम् । रत्नहारीतु पार्थिवः, अष्टमः सागरः सौन्दर्यस्य, ऋद्धिश्चित्तविकारिणी, निर्वहतु सप्तसन्तानान् etc. He has rendered many vernacular idioms is Sanskrit in his previous works also. The author has added gammatical notes in the end, quoting the relevant sutras of panini. This is an additional feature of the book, not often found in other books.

A bee collects honey from thousands of flowers and gives sweet honey to us. But sastriji has given us the honey of Kadambari only in eight drops (Bindus chapters). It cheers, but does not inebriate. Sastriji deserves high admiration for a useful work like this.

Dr.P.G.Lalye,M.A. Ph.d
Professor and Hormor Head,
Dept. of Sanskrit,
Hyderabad

In Public domain. Digitization Muthulakshmi Research Academy

Public domain. Digitization Muthulakshmi Research Academy

श्रीपरदेवतायै नमः

कादम्बरीसारः

प्रथमो बिन्दुः

आसीत् पुरा किल वेत्रवतीप्रतीरे विदिशा नाम नगरी। याऽभूदभूषणं भूदेव्याः। सदनञ्च सर्वसम्पदाम्। सर्वमहत्तया साऽपजहासेवामरावतीम्। किञ्च तन्नगरमगरं सुकृतिनाम्।

शास्ति स्म तद्वीरमातण्डिश्शूद्रको नाम राजा शुनासीर इव। जातोऽप्यसावष्टानां दिक्पतीनामंशैः प्रजानामत्यन्तमाह्लादकतया सम्भावितश्चन्द्र एवेति। विजित्यायं चतुस्समुद्रमुद्रितं भूमण्डलमारोप्य राज्यधुरां स्कन्धेषु सचिवानां धर्माविरुद्धानि विषयसुखान्युपभुञ्जान आस्ते। कुतोऽप्यस्यारूढयौवनस्यापि न बभूव मनः प्रसितं तृतीयपुरुषार्थे।

अथ कदाचन सभामण्डपासीनं राजानमुपसृज्य मूर्तीभूत इव विनयः प्रतीहारी व्यजिज्ञपत् - यथा - महाराज! समागता काचन मातङ्गकन्या कीरेण सह विचित्रेण। भवद्दर्शनलाभाय द्वारि स्थिता।

आकर्ण्य शूद्रकः क्षणं विचिन्त्य विलोक्य च मन्त्रिणां मुखान्यादिदेश "को दोषः? प्रवेश्यताम्" इति।

कन्या सा परिहरन्ती परस्पर्शं प्रविवेश सभामण्डपम्। वृद्धश्च कश्चन सूत्रमिव सूचीमनुससार तां गृहीतकनकपञ्जरः।

मातङ्गकन्यकामपि द्वितीयामिव सागरकन्यकां दृश्यमानां वीक्ष्य तां क्षितिपतिर्विस्मयमानो व्यचिचिन्तत् - "नैव खलु दृश्यतेऽग्रवर्णजातास्वपीदृशी भुवनमोहनमूर्तिः। किमुत मातङ्गकुलजातासु? चिन्तयतः प्रतिभाति मे त्ववतीर्णा कापि देवता मर्त्यलोके मातङ्गकन्यारूपेणे"ति।

एवं चिन्तयतस्तस्य कन्या सा प्रौढेव सविनयं प्रणनाम। वृद्धस्तु प्रणम्य पञ्जरं राज्ञः पुरतः कृत्वा प्राह - "देव! शुकोऽयं वैशम्पायननामा। इदं महदद्भूतं रत्नम्। "रत्नहारी तु पार्थिव" इति कृत्वा रत्नमिदं भवदन्तिकमानीतम्। रत्नमिदं स्वीकर्तुमर्हति भवानिति मम स्वामिदुहितैषाऽत्रभवते समर्पयत्युपायनम्" इति निवेद्य पुनः प्रणम्य

In Public domain. Digitization Muthulakshmi Research Academy

दूरमपासरत् ।

ततः प्रतीहार्या जानत्या भूपतेरिङ्गितं यावदुद्घाटितं पञ्जरं तावत्स कीरो बहिस्संकूर्द्य दक्षिणपादमुन्नम्य "जयतु महाराजः" इत्युदीर्य वेदमन्त्रैराशास्य श्लोकमिमं पपाठ -

***स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः ।**
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ।।

निशम्येदं नरपतिर्विस्मितः प्राह मन्त्रिशेखरं कुमारपालितनामानम् । यथा - "भोः! श्रुतं खलु त्वयापि । कुत्रापि लोके त्वया दृष्टं वा श्रुतं वाद्भुतमीदृशम् ?

दृश्यते विशेषो यो मानुषेष्वपि दुर्लभः कथमस्य कीरस्य वेदाध्ययनसंस्कारः? कथञ्च मातङ्गकुलवासः? कथं च लोकोत्तररामणीयकमस्या मातङ्गकन्यायाः? भवति किलैषाऽश्चर्यपरम्परा ।"

अमात्यः प्रत्यवदत् - "महाराज! सम्भवन्तीदृशा विशेषाः पूर्वजन्मसंस्कारेण प्रायेण प्राणिनाम् । किमत्र चित्रम् ? विचित्रा विधिसृष्टिः । विचित्रतरा कर्मवासना। विचित्रतमश्च कर्मविपाक" इति ।

एवं तयोस्संलपतोर्मध्याह्नकालपटहध्वनिरुच्चचार । किण्करमाह क्षितिपतिः । "अध्युष्यतामेषास्मत्सौधबाह्यागारम् । नीयतामयं शुकोभ्यन्तरगृहम्" इत्यादिश्य स्वासनाद्यावदुत्थितस्तावत्सभागताश्च तेन सह समुत्थाय तमापृच्छ्य गताः स्वमन्दिराणि।

ततः शूद्रकः कृत्वा लघुव्यायामं स्नात्वा समाप्य देवपूजां गृहीत्वा विप्राशिषः, भुङ्क्त्वा च प्रविश्य शय्यामन्दिरं स्मृतिगते शुके तमानयेति भटमादिशत् ।

ततः कञ्चुकिनानीतं शुकं कुशलप्रश्नपूर्वकं राजा पप्रच्छ यथा "वैशम्पायन! कस्त्वम्? कुत्र जातोऽसि? अद्य यावत् कुत्रोषितं त्वया? कथञ्च लब्धास्सर्वा विद्याः कलाश्च? प्रतिभासि मे जातिस्मरस्त्वमिति । केन वा कृतमेतन्नाम यद्विप्रजनोचितम्? न खलु श्रूयन्तेऽन्त्यकुलजातानामीदृशं नाम । कथं वा मातङ्गकुलसंपर्कस्तव? आवेद्यतामामूलाग्रं तवोदन्तः" ।

एवं सबहुमानं पृष्टः कीरो मुहूर्तं ध्यात्वा स्वकथां कथयामास राज्ञे । यथा - "देव! श्रुतचरमेव भवता विन्ध्याटवी नाम महारण्यम् । यतस्स्पृशति पूर्वापरसमुद्रतीरे। यस्यैकदेश एव दण्डकारण्यम् । तत्रैव दाशरथिस्सीतया लक्ष्मणेन च चक्रे प्रवासं

In Public domain. Digitization Muthulakshmi Research Academy

चतुर्दशवर्षाणि । तस्मिन्नेवागस्त्याश्रमः । अस्ति तस्यानतिदूरे पम्पासरश्च । तस्य पश्चिमे तीरेऽस्ति कश्चिच्छाल्मलीवृक्षः । स उच्छ्रयेण महता कबलयन्निवाकाशं, परिणाहेन परिमातीव च दिगन्तान् ।

कोटरान्तेषु शाखासन्धिषु चास्य निर्माय कुलायान्यकुतोभया अधिवसन्ति स्म पतङ्गा अगणेयाः । दिवा ते जीवयात्रायै दिक्षु चारश्चारमायतीगवं प्रत्यागत्य नयन्ति स्म निशां सुखसुप्तास्तत्र । तरौ तस्मिन्नेवोषितौ मम पितरौ च । तयोश्चिरमनपत्ययोः वार्धकेऽहमेक एव पुत्रः सञ्जातः । दुस्सहप्रसववेदनया हन्त दुर्विधिना मम जननी पञ्चत्वं गता ।

मम पिता तु कलत्रवियोगेन निष्टप्तचित्तोऽपि पुत्रस्नेहेन दूरीकृतदुःखभारो मां ररक्ष पक्ष्मेव लोचनम् । कुत्राप्यगच्छन्नाहारायाऽपि दिवारात्रं मामुरसिकृत्वा रक्षन्नास्ते। तस्य दयमानैः पतङ्गैस्तत्रत्यैर्दत्तानि फलादीनि प्रथमे मां प्राश्य भुक्तशेषाणि स भुङ्क्ते स्म ।

गच्छता कालेन जातपक्षोऽहमुत्पतितुमुत्सुकः स्थितः । एवं स्थिते दिने कस्मिँश्चन कानने तस्मिन्नतर्कितं समुत्थितः कर्णारुन्तुदोऽतिमहान् कोलाहली यमदुन्दुभेरिव । एकमुखेनात्युच्चैराक्रन्दन् वन्यमृगपक्षिसंघातः कान्दिशीकः प्रपलायितः । तदा स्थित एवाहं पितुरुरसि कण्ठमुन्नम्य कौतूहलेन प्रैरिरं दृशौ दिशाः । दृष्टो मया द्वितीय इव यमः कश्चनागच्छन् शबरनायको मृगयार्थी महता कितावबलेनानुसरता । गता इव मम प्राणाः । उन्मूलित इव स शाल्मलीवृक्षः । उच्छिन्नमिव सर्वमप्यरण्यम् । मुहूर्तादनन्तरं स किरातसंघो वन्यमृगान् निघ्नानो रक्तसिक्ताङ्गः सञ्चचार यथेच्छं कानने । ततस्स किरातनायकः श्रान्तो मृगयाक्रीडया किञ्चिदिव विश्रम्य पम्पासरश्शाद्वलेऽशित्वा मृणालखण्डानि पीत्वा सरोवरजलान्यनुचरैस्सह निर्गतः ।

ततः कोऽपि पापग्रहो व्याघ्रो भीषणाकृतिर्द्वितीय इव यमकिंकरोऽगतस्तैस्सह स्थितस्तत्रैव । यतस्तेन न लब्धं मांसप्रत्यपि । ततः स स्वपापदृष्टिं प्रसार्य शाल्मलीवृक्षे दुरारोहमपि तं निश्रेण्येवानायासेनारुरोह । तदाहं भयाविष्टः पुञ्जीभूताङ्गः पितृपक्षान्तरे व्याधात्तस्मान्निलीय स्थितः ।

स व्याधहतको वृक्षारूढः शिरांसि भङ्क्त्वा शुकान् कुलायेभ्योऽधः पातयन्

In Public domain. Digitization Muthulakshmi Research Academy

शाखाचङ्क्रमणेन क्रमश आगत्यास्मत्कुलायं मम जनकस्य कण्ठं भङ्क्त्वाऽधः पातयामास। पितृपक्षान्तर्गतोऽहमविदितस्तेन न मारितः । किं वच्मि तदातनं भयञ्च शोकं च मम? कथमपि पर्यवस्थाप्य हृदयं हतप्राणरक्षणलालसया पितृपक्षान्तरान्निर्गत्य प्रतिपदं त्रुटन्, त्रुटन्, उच्छ्वसन्, उच्छ्वसन्, शनैश्शनैर्गत्वा प्रविष्टोऽस्मि तत्तरुमूलगतपर्णराशिमध्ये । स मामविदित्वा हस्तिपत्रान्तरालस्थितं हतकीरवृन्दं राशीकृत्य सरोवरादानीतेषु नलिनीपत्रेषु बद्ध्वा शिरसोड्ढ्वा तं भारं द्रुतपदैर्गतसहचर-शबरमार्गमनुयातः ।

गते किराते सुदूरमुदियाय मनसि मम जीवामीति धृतिस्तदनु पिपासा च बलवती । ततोऽद्याप्यपटुतया संचारे मुहुर्मुहुस्स्खलन् स्थित्वा भृशमुच्छ्वसन्, पतन् कथमप्युत्तिष्ठैस्तस्य किरातस्य प्रत्यावृत्तिशङ्कयानुक्षणं दिशः पश्यन् हा तात इत्याक्रोशन् कण्ठगतप्राणः सरोवरमुपासरम् ।

अनतिदूरे तस्य कासारस्यास्ति तपोधनस्य जाबालेराश्रमः । यावदहं प्राप्तस्सरोवर तावदेव हारीतनामा मुनेस्तस्य तनयः स्नातुं तत्रागतः । प्रकृत्या मुनिजनोऽकारणबन्धुः। दृष्ट्वा मां तदवस्थां दयार्द्रचित्त उपसृत्य "हन्त! हन्त! शुकशिशुरयं केनापि व्याधहतकेन कुलायादधः पातितः । बत भृशं वेपते" इति सकरुणं वदन् गृहीत्वा मां कराभ्यां पाययित्वा जलकणान् मुखमारुतेन निर्वाण्य श्रमजलं स्नात्वा मां प्रापयामास स्वाश्रमम्।

सन्दृष्टेषु तत्र तस्य पितृपादेषु जाबालिमुनीन्द्रेषु मम हृदयमुच्छ्वसितमिवासीत्। मम पितैव जाबालिरूपेण प्रत्यक्ष इति मतिर्जाता । सत्यमेव जीवामीति धृतिस्समुत्थिता मनसि । ततो हारीत उपगृह्य पितृपादौ "तात! शुकशिशुरयं कुलायाद् भ्रष्टो लुठ्यन्नास्ते धूल्याम् । आगतोऽस्मीमं परिगृह्य । अनाथप्राणिरक्षण भवत्यस्मद्धर्मः" इति ब्रुवन् पुरस्तस्तस्य मामतिष्ठिपत् ।

भक्त्याहमपश्यं द्वितीयमिव परमेष्ठिनं जाबालिं यस्सेवितः शिष्यप्रायैर्बहुभि-र्वृद्धैस्तपस्विभिः । शिरस्तस्यास्ति पलितं रजतपात्रमिवाधोमुखम् । अपगतरक्तमांसेऽस्य शरीरे सर्वतश्शिरा लता इव दर्शयन्ते । महाभागस्स मयि प्रसार्य दृष्टिं ध्यात्वा मुहूर्तं किञ्चिदिव स्मयमान आचष्ट - अनेन स्वकर्मफलं भुज्यते इति । स महात्मा दिव्यदृष्ट्या जन्तूनां भूतभविष्यद्वर्तमानकथाः करतलामलकायमानाः पश्यति ।

In Public domain. Digitization Muthulakshmi Research Academy

आकर्ण्य वचस्तन्मुनयस्सर्वे कुतूहलायत्तचित्ताः प्रार्थयामासुः । "भगवन् कोऽसौ पूर्वस्मिन् जन्मनि ? किं कृतमनेन येन प्राप्तमिदं शुकजन्म?" इति । स आह "भो मुनयः अर्हन्त्यधुना भवन्त आचरितुमाह्निककृत्यानि । अवसितेषु सायन्तनकर्मसु वक्ष्यते मयास्य कथातिदीर्घा" इति ।

*****

द्वितीयो बिन्दुः

अथानुष्ठाय सायन्तनकर्माणि सर्वेऽप्याश्रमीया मम कथाकर्णनकुतूहला उपविष्टास्सम्मुखीना भगवतो जाबालेः । अहमपि शुश्रूषुर्मम पुरातनजनुर्वृत्तान्तमपगतचापल एकाग्रचित्तो मुनिमुखदत्तदृष्टिः स्थितोऽस्मि । तदा चन्द्रः स्वधवलकरसन्दोहेन क्षीराब्धितरङ्गजालेनेव निमज्जयन्नास्ते तमाश्रमम् । भगवान् जाबालिरासीनः कुशास्तरणे वक्तुमुपाक्रंस्त यथा -

"तपोधनाः श्रूयतां भवद्भिरवहितचित्तैरस्य कीरस्य पूर्वजन्मकथा । आसीदवन्तीषु-उज्ञयिनी नाम नगरी । आकरस्स सर्वसम्पदाम् । लोकोत्तरमहत्तां तस्या वक्तुमुचितमेकेन वाक्येन । जघन्ये तस्या अलकाचामरावती च, परमशिवस्तत्र महाकालनाम्रा चक्रे वसतिम् । शास्ति स्म तां नगरीं । सार्वभौमस्तारापीडः । यः कीर्तितो भरतभगीरथ-मान्धातृसम इति । परस्पराविरोधेन तत्र तत्र विप्रकीर्णा गुणास्तस्मिन् स्निग्धास्सन्ति कृतावासाः । अमात्यस्तस्य राजन्यस्य शुकनासो नाम बुद्धिवैभवेन धिक्कृतकाव्य-वाचस्पतिः । स राजा त्रिविक्रम इव विक्रमेण महताऽऽक्रम्य सर्वभूमण्डलं राज्यधुरां सचिवस्कन्धे आरोपयामास । सचिवस्स रक्षति स्म प्रजा यथा निरीतयस्सर्वसम्पन्ना हृष्यन्ति ।

अवतीर्णराज्यभारस्तारापीडो विषयासक्तोऽन्तःपुर एव नयति स्म दिवारात्रम्। नहि तत्सत्येतरं यन्न सन्ति तेनाननुभूता नर्मगोष्ठ्यः । अकृताः कामक्रीडाः निर्मग्नोऽप्ययमेवं विषयसुखेषु न भेजे पुत्रफलम् । अतीते वयस्येवमनपत्यताव्यथा दिने दिने वर्धते स्म ।

राज्ञस्तस्य महिषी विलासवती शुद्धान्ततरुणीनायकमणिः । राज्ञी सा कदाचित्पुत्रकाम्ययार्चितुं भगवन्तं गता भर्त्रनुज्ञाता देवमन्दिरम् । तत्र प्रवृत्तायां

In Public domain. Digitization Muthulakshmi Research Academy
पुराणगोष्ठ्यां कथाप्रसङ्गेन पौराणिकः "अपुत्रस्य गतिर्नास्ति" इति धर्मशास्त्रवचनं वाचयित्वा व्यवृणोत्तदर्थं विशिष्य। उक्त्या तया विलासवती सूच्येव विद्धा कर्णयोः। ततस्सा देवी प्रत्यागत्य गृहं विषण्णचित्ताऽवकुण्ठ्य मुखं चेलाञ्चलेन रुदत्यास्ते। सखीभिर्बहुधाऽनुनीताप्यविरम्यानशित्वा च विलपन्त्यास्ते सुचिरम्। श्रुतोदन्तः परिजनै राजा तारापीडस्तत्रागत्य तामाश्वासयामास। यथा "प्रिये कुत एवं शोचसि? कोऽपचारः कृतो मया? न कोऽपि धर्षत्यस्मदनुचरेष्वविनयमाचरितुं त्वयि ?" ॥

आश्वासिताप्येवं यावदनुत्तरा रोदिति तावत्तस्याः सखी कथयामास पुराणश्रवणवृत्तान्तम्। आकर्ण्य सोऽपि सन्तप्तः प्रियामुखमात्मनो वक्षसि कृत्वा बाष्पायमाणलोचनो निमेषादनन्तरं स्वयमाश्वस्य परिमृज्य बाष्पकणान् सगद्गदं सान्त्वयामास।

"देवि चिरादेष व्यथयति मामप्यप्रतीकारो व्याधिरिव। मम राज्यं श्रियः भोगाः किं बहुना जीवितञ्च व्यर्थं मन्ये निर्गन्धमिव कुसुमम्। नास्ति खलु मम त्वदुत्सङ्गे शिशुदर्शनभाग्यम्। स्खलितवचनैरर्धोक्तिभिश्च मां क्रीडनकानि याचमानस्य सस्मितं मम श्मश्रूणि गृहीत्वा कर्षतश्चान्दयितुः पुत्रस्य स्मितमुखसन्दर्शनभाग्यं कुत्र मम?" इति।

व्यतिकरेऽस्मिन् शुकनासस्तस्य सचिवस्तत्रागतः। अनपत्यश्चायमपि तपस्वी राजेव। तस्य दाराश्च विमनायमाना गृहेषु शोचन्ति। तथापि स्वशोकभारादपि गरीयान् नृपस्येति चिन्तयंस्तमाश्वासयामास यथा -

"महाराज धीरोऽत्रभवान् क्षुभ्यत्यन्य इव। किं भवादृशा धैर्यकुलाचला एवं विलपन्ति मुक्तकण्ठम्? प्रकृत्या स्त्रियोऽधीराः। ततश्शोचति राज्ञी। प्राज्ञोऽत्रभवान् नार्हत्येवं शोचितुम्। हस्तन्यस्तकरो भृशं निश्वसिति। आचरतु धर्मकार्याणि स भवान्। यैस्सर्वं सिध्यति। लभतामाशिषो विशिष्य निषेव्य वेदज्ञान्। अर्चतु देवान्। निर्वहतु सप्तसन्तानान्। नह्यस्ति पुरुषार्थो यो न सिध्यति धर्मक्रियाभिः"।

आरभ्य तस्माद्दिवसाद्राजदम्पती समाचरतां तीर्थयात्राः, उपवासव्रतानि, दानानि, यज्ञांश्च भक्त्या प्रगाढया।

कस्मिंश्चन पुण्यरात्रे तारापीडोऽदर्शत्स्वप्ने पूर्णचन्द्रं प्रविशन्तं राज्ञीमुखे। शुकनासश्च

In Public domain. Digitization Muthulakshmi Research Academy

स्वकलत्रस्योत्सङ्गे स्थितं प्रफुल्लं पुण्डरीकम्।

परेद्युः प्रातरेव शुकनासमाह्वाय्य नरपतिरावेदयामास स्वप्नदृश्यम्। स परं हृष्टः प्राह - "देव फलितस्ते मनोरथः अचिरेणैव राज्ञी प्रसविष्यते पुत्रं पूर्णचन्द्रमेव सर्वाकारेण" इति।

दिनेषु कतिपयेष्वतीतेषु दधार गर्भं राजदाराः। हृष्टो नृपोऽददादुपायनान्यनर्घ्याणि श्रवणपर्वायमाणतद्वार्ताहरेभ्यो दासीजनेभ्यः। चातके जलदमिव निरीक्षमाणे प्रसवदिनं वसुधेशे पूर्णेषु मासेषु प्रासुत पुत्रं राजमहिषी। न केवलं तारापीडो राष्ट्रीयाः प्रजाश्च सर्वा मुमुदिरे भृशमात्मनः पुत्रोदय इति। भूपतिना कल्पितं पूर्णपात्रमहमहमिकया जह्रुस्तस्य भटाः। अतटस्तस्यानन्दप्रवाहः। शुकनास आगत्य राजानमभ्यनन्दद् गाढाश्लेषेण। ततस्तावुभौ सूतिकागृहं गतौ शिशुं सन्द्रष्टुम्। बालचन्द्रमिव भास्वन्तं तं बालकं नयनपर्वायमाणं सुदीर्घं विलोक्यापि नैव ततृपतस्तौ। ततः शुकनासस्तस्यार्भकस्य निरीक्ष्य निपुणमेकैकमवयवं महता प्रमोदेन बभाषे। यथा -

"देव सूक्ष्मेक्षिकयाऽत्रभवान् समीक्षताम्" अदः शङ्खम्। तच्चक्रं, एषोर्णा भ्रुवोरन्तरे इदं कमलम्। सर्वाणीमानि चक्रवर्तिलक्षणानि। भविष्यत्यसौ बालश्चकवर्ती। अत्रभवता दृष्टः खलु पूर्णचन्द्रः प्रविशन् देवीमुखे। अनेन तेनैव भवितव्यम्। वचनैस्तैस्तारापीडस्तारापथमारूढः।

अत्रान्तरे भट आगत्य मन्त्रिगृहान्निवेदयामास राज्ञे शुकनासस्य पुत्रजन्मवार्ताम्। तारापीडः शुकनासमालिङ्ग्याभिनन्द्य जहार तस्योत्तरीयमेव पूर्णपात्रम्। ततस्स आह- "धन्यावावाम्। अनुपतत्युत्सवमुत्सवः। समकालमेव धातानुगृह्य पुत्रावावयोर्द्वयोः अपि धन्यौ चकार" इति।

कृतः पुत्रोत्सवाडम्बरोऽतिमहान् राजमन्दिरे। शुकनासगृहेऽपि स्वयंगतेन राज्ञा कारितो द्विगुणीभूतोत्सवः।

ततस्तारापीडो यथाविधि निर्वर्त्य जातकर्मकलापं शोभने मुहूर्ते स्वप्नदृश्यसमुचितं पुत्रस्य चन्द्रापीड इति नाम चकार। शुकनासश्च समाप्य जातकर्माणि विप्रजनोचितं चकार वैशम्पायन इति नाम।

राजपुत्रश्चन्द्रापीडो दिनदिनप्रवर्धमानो दुर्ललितैः पित्रोर्नेत्रोत्सवम्, वचोभिः

In Public domain. Digitization Muthulakshmi Research Academy

स्खलदक्षरैः श्रवणोत्सवं च कुर्वन्नास्ते । यावत्सप्तवर्षदेशीयश्चन्द्रापीडः पित्रा कृतोपनयनसंस्कारः प्रेषितो विद्यागृहं यन्निर्मितं तदर्थमेव नगरबाह्योद्याने । तत्र स बालकः शिक्षितः प्राचार्यैस्तर्कव्याकरणदण्डनीत्यादिविद्याः । शुकनासस्य सूनुरप्युपनीतः समुचिते काले नीतस्तदेव विद्यागृहम् । द्वावपि तौ तत्राधीयाते स्म परस्परेण स्पर्धमानौ। उच्यते खलु "स्पर्धया वर्धते विद्या" इति । मात्रा पुत्रदिदृक्षमाणया बहुशः प्रार्थितोऽपि राजा विद्याविघ्नभयेन तं नानयामास स्वमन्दिरम् ।

चन्द्रापीडोऽधुना षोडशवर्षजातीयः । कुशाग्रीयबुद्धिः। सोऽनतिकालेनैवाभूदधीती वेदेषु चतुर्षु, शास्त्रेषु षट्सु, कलासु चतुषष्टिषु च । ततोऽभ्यस्य व्यायामविद्यां श्लाघितो मल्लमार्ताण्ड इति । वैशम्पायनश्च सर्वेषु विषयेषु बभासे तस्य प्रतिबिम्बमेव।

विद्यासु निष्णातं पुत्रं तातस्तारापीडो विद्यागृहादानेतुमिन्द्रायुधनामकमश्वोरसं सेनान्या वलाहकनाम्ना राजपुत्रैश्च प्रैषिषत् । सेनापतिः पित्राज्ञां निवेद्य कुमाराय परिचाययामास राजपुत्रान् । तीर्णविद्यार्णवं चन्द्रापीडं तेऽभ्यनन्दन् जयारवैः ।

वलाहकस्तुरङ्गमं तस्य पुरतो नीत्वा न्यवेदयत् यथा - "राजपुत्र आरुह्यतामयं हयः । अयोनिजोऽसावुदितस्सागरगर्भात् । पारसीकपतिनायमुपायनमर्पितस्तव तातपादेभ्यः"।

श्रुत्वा दृष्ट्वा चाजानेयं कुतोऽनुप्राप्तविस्मयस्स स्वमाह प्रतिभाति मे नायं तुरग इति । "प्रतिभाति तु केनाप्यभाग्येन, तुरगरूपेण शप्तेन भवितव्यमिति । अस्यायोनिजत्वं विस्रम्भयति मां वितर्को मम न मृषेति । श्रुतं च मया रम्भा शापवशेन बडवा जातेति इति" ।

ततो धृत्वा वलाहकानीतानि पुष्पमालादुकूलाभरणानि, समर्प्य गुरुदक्षिणामामन्त्र्याचार्यान् लब्धविप्राशीरुच्चरत्सु वन्दिमागधानामालोकशब्देषूपसृत्येन्द्रायुधं प्रणम्य प्राह - "को नु भवान्? नमस्ते । क्षम्यतामयं जनस्त्वामारूढ इति मूकुलितकर आरुक्षत्तमश्वरत्नम् । वैशम्पायनश्च वाजिनमन्यमारुरोह । आरूढ इन्द्रायुधे चन्द्रापीडस्य प्रत्यभात्रिलोकं जितं स्वेन इति । तत श्चन्द्रापीडवैशम्पायनौ द्वावपि राजपुत्रैस्सह विविशतुर्नगरम् ।

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

अथ तृतीयो बिन्दुः

चन्द्रापीडोऽनुसृतो वैशम्पायनेन प्रविश्य राजधानीं सभामण्डपे सिंहासनाधिष्ठितान् पितृपादानभिवादयामास साष्टाङ्गम् । तातस्तं गाढमाश्लिष्य मूर्धानकाघ्राय उपवेशयितुकामो बभूव स्वोत्सङ्गे । चन्द्रापीडस्सविनयं पितृपादयोरन्तिक उपाविशद् भूतल एव। पश्यन्नपि तातस्तं बहुकृत्वो मृशन्नपि गात्रं शतकृत्वो नाभवत्सन्तृप्तः । जनकं संसेव्य कञ्चित्कालं तमामन्त्र्य जननीं द्रष्टुकामो गतः शुद्धान्तम् । सन्दृष्टे पुरतः पुत्रे मातुर्विलासवत्याः प्रस्नुतौ पयोधरौ । स प्रथमे मातरं ततो विमातृश्च प्रणम्य दिदृक्षुः शुकनासं यातः । तं ववन्दे तातमिव । समाश्लिष्टो शुकनासो राजपुत्रमार्पिपत् स्वासनम् । अनधिष्ठाय तत्र निषेवितुं देवीं मनोरमामन्तगृहं गतः । आशासितस्तया प्रत्यागतः । यावांश्चन्द्रापीडो लालितः, आदृतः, प्रीणितश्च तावान् वैशम्पायनोऽपि गृहद्वये लालितः, आदृतः, प्रीणितश्च । नहि विशेष ईषदपि तारापीडशुकनासयोः स्वस्वपुत्रविषये सन्दृष्टः ।

अधुनाधिवसन्नास्ते चन्द्रापीडः पितृपादैर्निर्मितं दिव्यं मन्दिरम् । स इन्द्रायुधमुपमन्दिरं मन्दुरामधिवास्य तमनन्यसाधारणेनादरेण शापग्रस्तमिव कञ्चन महात्मानं बहुमन्यते स्म ।

कदाचन जनन्या देव्या विलासवत्याः सकाशात्कञ्चुको कयाचिल्लावण्यवत्या समागत्य चन्द्रापीडाय दर्शयित्वा न्यवेदयन्! "राजपुत्र एषा कुलूताधिपतेः कन्या नाम्ना पत्रलेखा। दैवदुर्विपाकेन शैशव एव पितृमन्दिराद्भ्रष्टा । कथमपि भाग्यवशेन राज्ञया हस्तङ्गता । पोषितान्तःपुर एव । अर्हत्येषा विस्रम्भपात्रं भवत पार्श्वर्तिनी भवितुमिति देव्या भवदन्तिकं प्रापिता । क्रियतामात्मीया कुमारेण इत्यावेद्य तां तस्मै समर्पयामास।"

स तां स्वीकृत्य न्ययुङ्क्त ताम्बूलकरकवाहिनपदे । सौशील्येन सदाचारेण च सा श्लाघ्यमाना जनैः स्वनियोगेऽप्रमत्ता राजपुत्रं सेवमाना तस्थौ ।

गच्छति काले तारापीडस्तनयं यौवराज्यपदेऽभिषेक्तुकामः शुकनासेनाचीकरत् सन्नाहान् । पूर्वेद्युः पट्टाभिषेकदिवसस्य धर्मजिज्ञासयागतं चन्द्रापीडं धर्माननुपदिदेश शुकनासः । यथा -

In Public domain. Digitization Muthulakshmi Research Academy

"तात किमस्त्युपदेष्टव्यं मया कूलङ्कषाभ्यस्तसर्वशास्त्रस्य सदाचारसम्पन्नस्य, अचञ्चलचित्तस्य तव? तथापि त्वया विदितचरमेव पिष्टपेषणन्यायेन बोधयामि। श्रूयतां - श्रीरियं लोकोत्तरा। गात्रं तवाभिरामम्। नवञ्च वयः। हस्ते महीयानधिकारः। उच्यते ऋद्धिश्चित्तविकारिणीति। सन्ति कतिचिदेव लोके येषां बुद्धिर्न विक्रियते। विकारितचित्ता न पश्यन्त्यात्मानमन्यञ्च। नहि ददते कर्णं हिताहितयोः। न वयं प्रभवामश्चिन्तयितुं तेषां विकृताश्चेष्टाः। न विश्वसनीया श्रीरानुवंशिकीति। न सा निवसत्यद्य यत्र न्यवसत्पूर्वेद्युः। कण्टकक्षतमिव स्वचरणं न कुत्रापि न्यस्यति। सपत्नीमिव द्वेष्टि सा धर्मदृष्टिम्। धर्मान्धो राजापि पतत्येव कुत्रापि। विरला लोके प्रभूणां हितोपदेष्टारः। प्रविशति धूर्ताणामुपदेशा एव तेषां कर्णौ। आपातमधुरैर्वचोभिस्ते कुर्वन्ति जनान् विषयलग्नान् सततम्। धूर्तवञ्चितास्ते विषयासक्ता नश्यन्त्यन्ते किरातैरिव मृगाः। विषयेषु च सर्वेषु स्त्रीनामको विषयोऽतिदुःखकरः। नहि म्रियन्तेऽन्यविषयासक्ताः म्रियतेऽवश्यं स्त्रीविषयासक्तः सङ्क्रामन्ति सर्वश्रेयांसि तं योऽनिर्मग्नो विषयेषु सञ्चरते धर्ममार्गेण।

ततस्तात वर्ततां भवानपतितो धूर्तजालेषु। अदूरगश्च साधुजनानाम्। प्रकृत्यैव त्वं पण्डितः। पिता त्वां धर्मान् सर्वानशिशिक्षत्। हृष्टोऽस्मि तव गुणैरगणेयैः। न ह्यस्ति कार्यं तव ममोपदेशैः। भवान् ज्ञानवृद्धः। स्वयमुपदेष्टुमर्हत्यस्मान्। तथापि वयोवृद्धतया यत्किञ्चिद्विदितमेव त्वया पुनरुपादिशम्। उह्यतां भवता पित्रा तव स्कन्धेऽर्पिता राज्यधुरा। विजितमपीदं विश्वं तातेन पुनरपि विजयतां भवान् इत्युपदिश्य तूष्णीकस्तस्थौ। उपदेशैरेतैरमंस्तात्मानमलङ्कृतं चन्द्रापीडः।

शोभने मुहूर्ते पुत्रं तारापीडोऽभ्यषिञ्चद्यौवराज्ये चन्द्रापीडम्। तस्य जन्मदिनोत्सवादपि पट्टाभिषेकोत्सव आनन्दत्प्रजास्समधिकम्। दिशाभ्यश्चतसृभ्य आगता राजानस्समर्पयामासुरुपायनान्यनर्घ्याणि नैकानि। तारापीडः प्रीणयामास ब्राह्मणान् बहुभिर्धनैर्वस्त्रैरमूल्याभरणैश्च।

दिनेभ्यः पञ्चषेभ्योऽनन्तरं स प्रस्थितः पित्राज्ञया दिग्विजययात्रायै। इन्द्रायुधारूढस्स प्राकारस्य पूर्वद्वारेण निर्गतो नगरात्। वैशम्पायनः पत्रलेखा चाश्वावधिरुह्य तमन्वगच्छताम्। दिने तस्मिंस्ते प्रस्थाय क्षिप्रानदीतीरे व्यश्रमन्

In Public domain. Digitization Muthulakshmi Research Academy

पटकुटीरेषु ।

परेद्युश्चन्द्रापीडस्समधिकोत्साहः प्रस्थाय पृतनया महत्तरया मृदनन् पातालवासिनः आवृण्वन् धूल्या वियच्चरान्, नमयन्नुन्नतान्, उन्नमयन् नतान् उन्मूलयन् कण्टकान्, रक्षन्नभयदानेन शरणागतान्, समुद्धरन् जीर्णानि देवकुलानि, स्थापयश्च जयचिह्नानि तत्र तत्र त्रीणि सञ्चचार मान्धातेवासमुद्रभूमण्डलम् । प्रथमे प्राची ततो दक्षिणां पश्चात् पश्चिमामन्ते व्यजेष्ट दिशामुदीचीं च ।

ततस्स किरातजनपदं सुवर्णपुरमाक्रम्य विक्रमेणाग्रहीत्तेभ्योपराधम् । सुवर्णपुरं सीमा कैलासाद्रेः । आहृतस्तत्रत्येन रामणीयकेन चन्द्रापीडोऽतिश्रान्तो दिग्विजयान्यवसद्दिनानि कतिपयानि तत्र ।

तत्र स्थितस्स कदाचित्तुरङ्गमधिरुह्य मृगयाकुतूहलो गच्छन्ननतिदूरेऽदर्शत्किन्नरद्वन्द्वं विचित्रम् । यदश्वमुखं मनुष्यशरीरञ्च । पश्यतस्तस्य गृहीतस्याश्चर्येण गृह्णामि तद्द्वन्द्वम् इति मतिरजायत । ततस्स तुरगं प्रैरिरत् । किन्नरद्वन्द्वं तदपूर्वनरदर्शनाद्भिभ्यत्पलायाञ्चक्रे। अनुदधाव चन्द्रापीडः पार्ष्णिताडनैर्द्विगुणीकृतवेगेनाश्वेन । एवमन्वपतत्पञ्च योजनानि। अन्ते तत्किन्नरयुगलमारुरोह कैलासशृङ्गम् । विगताशश्चन्द्रापीडस्तदग्रहणाद्विरराम । न शशाक कोऽपि परिजनस्तमनुगन्तुम् । नहि गरुडोऽपीन्द्रायुधमनुगच्छति किमुतान्ये? ततः खलीनमपकृष्य स्वेदस्विन्नसर्वाङ्गमेकाकिनमात्मानं, अश्वं च नितान्तमुच्छ्रवसन्तं निरीक्ष्य विदितस्स प्रदेशोऽमानुषगोचर इत्यात्मानं हसित्वा पश्चात्तप्तश्चिन्तयामास ।

धिङ्मां मूर्खतमम् । कुतो मेऽविषयेऽभिनिवेशस्समजनि? बाल इव मामहमश्रमयम् । को लाभो गृहीतेन को वाऽलाभोऽगृहीतेन किन्नरयुगलेन कियान् मूर्खोऽहम्? पिशाचाविष्ट इवानुधावन् कियद्दूरमागतोऽस्मि? कथमत्र ज्ञायते मार्गः? कोऽत्र मे मार्गदर्शी? श्रुतं मया प्रदेशोऽयं सीमा भारतवर्षस्य । निकषा कैलासमिति। कथमायान्त्यत्र मानवाः? भवतु न मया शक्यते गन्तुमनुसृत्याश्वपादमुद्राः । दिशां दक्षिणाम् । अधुना मध्याह्नो जातः । जलपानेन श्रममपनीय गच्छामि ।

इति विचिन्त्य सलिलायेतस्ततः पर्यटतस्तस्यानतिदूरे गोचरीबभूव महत्तमं तरुषण्डम् । दिशां तां गच्छन्तमाह्लादयामास पद्मगन्धं वहन् शीतलमारुतः । अनुमाय तेन गन्धेन अस्ति "कासारोऽनतिदूर इति प्रस्थितः पुरतः । नातिदूर एव दृष्टस्तेन

In Public domain. Digitization Muthulakshmi Research Academy
सरोवरोऽतिगहनतरुषण्डमध्ये द्वितीयमिव सागरम् । दर्पणमिव च वनदेवतायाः ।

दृष्टे सरसि श्रमस्तस्यापासरदपनीतमिव हस्तेन । उपसृत्य सरोऽसौ हयादवरुह्यापनीय पल्ययनं तस्य पाययित्वा जलानि, बद्धवा वृक्षे, दत्त्वा तृणखण्डानि, स्वयं स्नात्वाऽशित्वा मृणालखण्डान्युत्तरीयमुपधाय शिश्ये शिलाफलके ।

मुहूर्तेन विश्रान्तिं कुर्वतश्चन्द्रापीडस्य सरोवरस्य तस्योत्तरे तीरेऽमानुषः कश्चन गीतालापः कर्णं प्रविष्टः । प्रथमे तं गीतमुन्नम्य कन्धरां स्तब्धकर्णः श्रृण्वन्नास्त इन्द्रायुधः । राजपुत्रः कुतोऽसौ विजनस्थले गीतालापः? इति कौतुकेन जिज्ञासुर्यावत्प्रस्थितस्तां दिशां तावत्तद्गीतश्रवणलालसैस्तां दिशामेव धावमानैर्हरिणैः अयाचितोपदर्शितमार्गः कियद्दूरं गत्वाऽपश्यत्किमपि शिलासौधम् । यदपहसतीव कैलासं स्वकीयया धवलया शोभया । ततस्स किञ्चिदिव पुरो गत्वा तत्र रत्नपीठे प्रतिष्ठितं भगवन्तं चतुर्मुखं महादेवं वीक्ष्य प्रणम्य तस्य दक्षिणभागेऽङ्के कृत्वा वीणां वादयन्तीं कन्यां च काञ्चन सन्ददर्श ।

साऽतिमात्रया शरीरस्य धवलच्छायया क्षीरसागरादुत्थिता लक्ष्मीरिव, नयनाग्निदग्धं पतिं सञ्जीवयितुं शिवमभ्यर्थयमाना रतिरिव, नवयौवन एव वैराग्येण धृतपाशुपतव्रतेव च सन्दृश्यमानास्ते । राजपुत्रस्तां विलोक्य विस्मितः कैषा? नहि मानुषकन्या, असंशयं निर्जरकन्यैव । तर्हि कुतो नान्तर्हिता वीक्ष्य मां मानुषम्? कुतो वा नोत्पतति दिवम्? इत्यात्मनि संशयानः स्तम्भान्तरितो गीतसमाप्तिं यावन्निरीक्षमाणः तस्थौ परिसमाप्य सा गीतं वीणामङ्कादवतार्य प्रणम्य साष्टाङ्गं परमशिवमब्रवीच्चन्द्रापीडम् अतिथे स्वागतं ते भद्र आगम्यतामिति ।

प्रमुदितस्तेन सम्मानेन चन्द्रापीडस्तां प्रणिपत्य साष्टाङ्गमनुसृत्य गतः । साऽनतिदूरस्थां प्रविश्याश्रमगुहामासीनां कृष्णाजिने तस्योपकल्प्य दर्भासनं पप्रच्छ तदीयं वृत्तान्तम् ।

ततस्स स्ववृत्तान्तमामूलाग्रं निवेदयामास । आकर्ण्य सा गृहीतभिक्षापात्रा गता तरूणामधस्पदम् । मुहूर्तेऽमृतगुलिकायमानानि फलानि स्वयं पतितानि । यान्यानीय सा समर्प्य चन्द्रापीडाय प्रार्थयामास भुज्यताम् इति । स तस्याः प्रार्थनामाज्ञामिव पर्यपालयत् । ततस्साप्यन्तिकगतं निर्झरीं गत्वा, भुक्त्वा फलानि निवृत्ता पुनरासीना

 In Public domain. Digitization Muthulakshmi Research Academy

मृगाजिने तारापीडं प्रत्युज्ययिनीं प्रति च पृच्छन्ती कालं कञ्चिन्निनाय ।

तदा चन्द्रापीडः यथाऽनया पृष्टोऽहं न्यवेदयमात्मवृत्तान्तं, किमेषापि प्रार्थितावेदयति स्ववृत्तान्तम् ? इति मनसि विचिन्त्य क्षणं परीक्ष्य तस्या मधुराकृतिं भावशुद्धिं, दाक्षिण्यं, चासंशयं कथयति स्वोदन्तमिति विश्वस्य प्रष्टुं मनश्चकार ।

* * * * *

अथ चतुर्थो बिन्दुः

अपृच्छच्चन्द्रापीडः । यथा - "देवि भवत्या मयि दर्शितोऽनुग्रहः प्रश्नचापल्यं जनयति मम । अम्ब! नहि खलु भवति भवती दृष्टिगोचरास्मादृशानाम् । कथयतु मयि प्रसन्ना । सिद्धसाध्यगन्धर्वविद्याधराणां वंशेषु को भवज्जन्मना लब्धप्रतिष्ठः । शरीरमिदं भवत्या यत् पञ्चभूतमयं कथमतिशयानं तिष्ठति धावल्येन दिग्दन्तिदन्त-कान्तिजालम्? पूर्णयौवना भवती कुतः कृतपदास्ति वैराग्ये यत्प्रायेण वार्धकोचितम्?

इति पृष्टमात्रोत्सृजन्ती बृहतो बाष्पबिन्दूनाच्छाद्य मुखकमलं वल्कलेन प्ररुदिता। विलोक्य तां चन्द्रापीडः क्षुब्धः स्वमाह हन्त कथमेषाप्येवं साधारणयुवतीव रोदिति" इति ।

ततस्सा कियच्चिरं विलप्य परिमृज्य बाष्पविन्दूञ्चेलाञ्चलेन निश्वस्य दीर्घमुष्णञ्च प्रोक्तवती -

"राजपुत्र किं कार्यं तव केवलशोकास्पदेन ममाभागिन्याः कृतमहापापाया वृत्तान्तेन श्रुतेन? यदि कुतूहलमाकर्ण्यताम् ।

भवतः श्रुतिगोचरमस्ति किल यत्स्वर्गलोकेऽप्सरसो नाम कन्यकास्सन्तीति । तासां वंशाश्चतुर्दश तेषु दक्षस्य पुत्रिकाभ्यां मुन्यरिष्टाभ्यां द्वौ वंशौ लब्धोदयौ । तयोर्मुन्याः पुत्रश्चित्ररथः । अरिष्टाया हंसः न केवलं तौ मातृष्वसेयौ । किन्तु गाढस्निग्धौ च । मन्यन्ते जनास्तयोः शरीरं भिन्नम् । प्राणस्त्वभिन्ना इति । अस्त्यत्रानतिदूरे हेमकूटो नाम शैलो रत्नोज्ज्वलः । यमधिवसतस्तौ द्वावपि । आश्रित्य तौ नैके गन्धर्वाश्च प्रतिवसन्त्यत्र ।

चन्द्रमसो जातोऽन्यस्मिन्नप्सरः कुले लब्धजन्मा गौरीनामा । उपायस्त तां हंसो गन्धर्वराजः । गार्हस्थ्ये वर्तमनयोस्तयोर्दम्पत्योर्नहि सुचिरेणापि सन्ततिः । कालाद्बहोरहं

In Public domain. Digitization Muthulakshmi Research Academy

जाता मन्दभाग्या कृतमहादुरिता केवलं शोकैकभाजनम् । पित्रा मम तावदनपत्यतया मम जन्म पुत्रजन्मेवाभिनन्द्य कृतो महानुत्सवः । चन्द्रवंशाज्ञाताया सर्वश्वेताया मम नाम चक्रे महाश्वेतेति । शैशवेऽहं बन्धुमित्राणामङ्केषु सञ्चरन्त्यासे वल्लकीव । क्रमशः कृतपदं यौवनं ममाङ्गेषु ।

एकदाहं वसन्तसमये सह मात्राऽत्रत्येऽच्छोदसरसि स्नातुं गता । अपूर्वमभिनवं तद्वनरामणीयकं पश्यन्ती सखीभिस्सह सञ्चरन्ती कञ्चित्कालमनयम् । तत्र तत्रैव सञ्चचरन्त्या मयाघ्रात्तं किमप्यनिदम्पूर्वं सौरभं यत् स्थगयत्यन्यपुष्पगन्धं यच्चानाघ्रातपूर्वम्। कस्यायं पुष्पस्य गन्धः? इति जिज्ञासयाऽटन्त्या मयाऽनतिदूरे दृष्टः कोऽपि मुनि-कुमारः। यश्चकास्ति स्म हरनेत्रानलसंस्पर्शदूर इव स्मरः । कलङ्कालिन इव कलानिधिः। अनर्हाण्यपि वल्कलानि तस्य शरीरस्य सन्दधते लोकोतरं रामणीयकम्। येन श्रवणे कृतः पुष्पगुच्छः । यस्यायं गन्धो लोकोत्तरः । आजिघ्रन्ती तत्सौरभं पश्यन्ती तं तदेकदृष्टिः पिबन्ती च तदीयं लावण्यामृतं स्थिताऽहम् । करोति कामः केवलं रूपे पक्षपातम् । नहि गुणदोषयोः प्रसारयति मतिम् । एवमहं तस्य वशगाऽभवम्। मुग्धाहमपसर्तुमना अपि प्रेरितेव केनाप्यविदितेन तमुपासरम् । वन्दनीयो मुनिजनः इति विचिन्त्य क्वणत्सु मम हस्तकङ्कणेषु दत्तदृष्टिरेव तस्य मुखेऽकरवमभिवादनम्। प्रणमन्त्यां मयि मनस्तस्यापि बभूव लोलायमानम् । दुस्तरा भवितव्यता । विदितया तस्य विकारं लब्धोऽवकाश इति मयाप्युपदिष्टयेव मन्मथेन तस्य वृत्तान्तमामूलं प्रष्टुं कृतं साहसम् ।

ततस्तमनुसरन्तं मुनिपुत्रमन्यं तुल्यतपोवेशमुपसृत्य प्रणम्य सविनयमपृच्छम् यथा आर्य कोऽसौ सुभगः? किं नामायम्? कुतोऽत्रागतः? किं पुष्पं यदनेन श्रवणे अलङ्कृतम्?।

उक्तं तेन यथा - अस्ति स्वर्गे श्वेतकेतुर्नाम महामुनिस्सुरासुरार्चितपदः । सोऽष्टमः सागरः सौन्दर्यस्य । कदाचनासौ गतः पुण्डरीकसरः स्नातुम् । तत्र सर्वकालवासिनी लक्ष्मीस्तं ददर्श । तथा दृष्टवत्यास्तस्याः पुत्रोऽजायत सद्यः । सा तमर्भकमानीय दर्शयित्वा मुनये कथयित्वा च "शिशोरस्यासि त्वं जनकः" इति तस्मै समर्पयामास । मुनिर्योगदृष्ट्या विज्ञाय सर्वं गृहीत्वा शिशुं पुण्डरीकवनजातस्य तस्य

 Public domain. Digitization Muthulakshmi Research Academy

चक्रे पुण्डरीक इति नाम ।

बाल्यमतिक्रम्य कौमारे कृतपदं नियुयुजे पिता तं तपश्चर्यायाम् । स पुण्डरीक एवायं सुभगः । श्रूयतां तदलङ्कृतायाः पुष्पमञ्जर्याः कथा ।

अद्य कृष्णचतुर्दशीति भगवन्तं परमशिवं सन्द्रष्टुं नन्दनवनमार्गेण गच्छन्तमिमं वनदेवतादरेण समुपसृज्य अयमुचितस्तव सौन्दर्यस्य इति ब्रुवाणा स्वयमवचित्य पुष्पगुच्छं पारिजाततरोर्ममेति वदतोऽप्यस्य श्रवणेऽलञ्चकार ।

एवं कथयतस्तस्य मुनिकुमारस्य वचनमाक्षिप्य स पुण्डरीक उपगम्य मां चपले कृतं प्रश्नेन । गृह्यतामिति ब्रुवाण एव स्वश्रवणादपनीय न्यास्थन्मम श्रवणे । कर्णे मम न्यस्यतस्तस्य करान्मद्गण्डस्पर्शजातेन कम्पेन स्रस्ताऽक्षमाला । या मया गृहीता यावन्न भूमौ पतति । न विदितमेतत्तेन विमनायमानचित्तेन । सुखसमयेऽस्मिन् मामुपस्सृत्याकथद्दासी "भर्तुदारिके स्नाताम्बा, निरीक्षते त्वामि"ति ।

मयि प्रवृत्तायां निर्गन्तुं तन्मित्रमवोचत पुण्डरीकम् । "कुतस्ते धीरं मनः क्षणेऽस्मिन् विलुलितम् ? न जानास्यनया दुष्टकन्ययाऽपहृतामक्षमालाम् । भवतु हृताप्यक्षमाला यथा नापहृतं हृदयं तथा स्थीयतां धीरेण भवता" इति ।

ततः पुण्डरीको मामुपगम्य कोपेन किल सभ्रूकुटिरब्रत "धूर्ते! कुत्र यासि ममापहृत्याक्षमालाम्"? इति । मयापि स्मयमानया गलादपनीय मुक्तावलिं गृह्यतामियं तवाक्षमाला" इति वदन्त्या तस्य हस्ते न्यस्ता । न सा दृष्टा तेन मम मुख एक दत्तदृष्टिना । अहो वत दृष्टं ममेदं चापलं सखीभिरिति लज्जानतानना गता सरस्तीरं यत्र मम जननी निरीक्षते माम् । कथञ्चन स्नाता ध्यायन्ती तद्गुणानेवानुगता मातरम्।

गृहं गत्वा शिरोव्यथार्त्तास्मीति तत्र निर्मक्षिकं कृत्वा मोहान्धचित्ता स्थिताहम् एकाकिनी । न विदिताऽस्मि तदा कुत्राहं गता? को दृष्टः? किं वृत्तम् ? कोऽसौ? काऽहमिति ।

समयेऽस्मिन् मम ताम्बूलकरङ्कवाहिनी तरलिका समागत्य आह यथा "भर्तृदारिके तव श्रवसि येनालङ्कृतः पुष्पगुच्छस्स त्वयि गतायां दूरं मामुपसृत्य त्वामन्तरेण पप्रच्छ। श्रुत्वा मम मुखात् स्ववल्कलाञ्चकं छित्वा विलिख्य किमपि "रहसि दीयतामिदं कन्यायै तस्यै" इत्यदान्मह्यम्" ।

In Public domain. Digitization Muthulakshmi Research Academy
सहसा गृहीत्वा लेखं तस्याः करादवाचयमिदं पद्यं

***दूरं मुक्तालतया बिससितया विप्रलोभ्यमानो मे ।**
हंस इव दर्शिताशो मानसजन्मा त्वया नीतः ।।

वाचयित्वा तं लेखमात्मन्येव तरलिकामपृच्छम् । "हला किञ्च स त्वां किं किं पप्रच्छ? कि प्रत्युक्तं त्वया? कियच्चिरं स्थितासि तत्र तेन सह" इति पृष्टमेव पुनः पुनः पृच्छन्ती कञ्चित्कालमनयम् ।

आलम्बमाने वियतोऽर्कबिम्बे प्रतीहार्यागत्य प्राह । यथा - "भर्तृदारिके त्वया वने सन्दृष्टयोर्मुनिकुमारयोरन्यतरः प्राप्तः । तिष्ठति द्वारे । मयोक्तं "प्रवेश्यतामसौ अविलम्बितमेवे"ति । आगतस्स मयाऽतिथिसत्कारैस्सभाजितः । मुहूर्त विश्रान्तः स वीक्ष्य तरलिकां वक्तुमुपक्रम्य पुनस्तूष्णीकः स्थितः । विदितया तत् कथ्यतामिति मया कृता प्रार्थना ।

स उवाच - "अहमस्मि कपिञ्जलः । पुण्डरीकश्चाहं च बालसखौ । शङ्के वक्तुम्। यतो नायं पन्थाः परिचितो मम । क्व मुनिजनः? क्व मोहकलापः? तथापि मित्रस्नेहबद्धेन मया कार्यमिदमवश्यं कर्तव्यं चिन्तितम् । श्रूयताम् - राजपुत्रि पूर्वेद्युस्त्वयि गतायां सह मात्रा प्राप्तः पुण्डरीको मां मुक्तावलिहस्तः । तं विलोक्याहमपाहसम् । अहो कुत्र लब्धेयमतिरमणीयाक्षमाला? इति । तदाहमुपादिशं शतानि सहस्राणि चोपदेशान् । न सन्त्यनुपदिष्टाः किं बहुना? तमाप्लावयं धर्मवर्षेण। वचनैर्मम व्रणितचित्तो नम्रशिराः किमप्यवदन् मां विहाय कुत्र नु गतः । हन्त कुत्र गतोऽसाविति विषादेन वने समन्ततोऽन्विष्य व्यलोकिषि कुत्रचिल्लताकुञ्जे । न मया वक्तुं शक्यं तदवस्था ।

दृष्ट्वा तस्य दशां दयनीयां नहि कार्यमुपदेशैरिति विचिन्त्य तस्य प्राणरक्षणाय बद्धपरिकरोऽस्मि । विरचिता तस्य जलरुहपत्रशय्या । विलिप्तश्चन्दनरसश्शरीरे । विकीर्णा कर्पूरधूलिः । अस्यामपि दशायां स लज्जयाऽपारयन् वक्तुं किमपि प्रसासरयामास दृष्टिं बाष्पमलिनां मयि । ततो राजपुत्रि इदमेव कालोचितमिति कृत्त्वा मित्रप्राणरक्षणायागतोऽस्मि । इतः परं यद्वाच्यं तन्न मे कण्ठाद् बहिर्निर्याति" इत्युवत्वा मूकस्तस्थौ ।

In Public domain. Digitization Muthulakshmi Research Academy

व्यतिकरेऽस्मिन् प्रविश्य कञ्चुकी प्राह - "भर्तृदारिके । त्वमस्वस्थ शरीरेति ज्ञात्वा मातायाता" इति । कपिञ्जलो जनसम्बाधमसहमानोऽलब्धप्रतिवचन एव निरगच्छत्।

अस्तङ्गतस्ततोऽहस्करः । उदितः कैरवबन्धुः कण्टकः पान्थानाम् । तदा विरहाग्निदग्धाऽब्रवं तरलिकाम् । यथा - "अयि अहं किं नु वा भवेयम्? स तपस्वी किन्नु स्यात्? एकतः शास्त्रं कुलाचारः लज्जा गुरुजनभयम् । अन्यत्र मदनवसन्तः विरहमरणभयम् । किं नु कुर्यामद्य? मनो मम किं कर्तव्यतामूढमस्ति" । "न मां न स्पृशेद् ब्राह्मणहत्यादोषः" इति रुदती मूर्छितासम् ।

तरलिका स्वकृतशीतलोपचारैर्लब्धसंज्ञाया मम पादयोः पतिता प्राह । भर्तृदारिके क्व शास्त्रम् ? क्व गुरवः? क्व लज्जा? क्व कुलाचारः? रक्ष्यतां स युवा सर्वथा । उच्यते हि गान्धर्वो विवाहः । यस्मिन् वधूवरौ स्वच्छन्दमनुरक्तौ मिथः परिणयतः। ततो गम्यतामविलम्बितं भवत्या इति ।

वचसा तस्याः प्राप्तधृतिरभिसरणोचितं धृत्वा वेषं पुरस्कृत्य तामविदितान्यैर्निर्गता गृहात् । स्फुरितं बत दक्षिणं नेत्र मम । तेन शङ्कमाना प्रधाविता । तावदश्रृणवं यावदहं न प्रविष्टाश्रमम् । "हा पुण्डरीक कुत्र गतोऽसि? त्वया विना त्रिलोकं शून्यमिव । मन्दभाग्योऽस्मि । किं करोम्यहम्? गत्वा भगवते श्वेतकेतवे निवेदयामि? पापे महाश्वेते! असन्तृप्ताक्षमालयाऽपहृतवती मम प्रियस्य प्राणानपि । सखे देहि मे प्रतिवचनम् नाहं ध्रियें त्वया विना" इति रुदतः कपिञ्जलस्य कण्ठस्वरम् । ततोऽतिमात्रं कम्पमाना प्रस्खलन्ती केनापि क्षिप्तेवात्र पतितास्मि । ततो यावदुपसृज्य वीक्षितस्तावन्मृतः स भूमौ पतितोऽस्ति । "कुतस्त्वयेयान् विलम्ब कृत" इति कुप्यन्निव मह्यं दृष्टः ।

एवमुक्त्वा महाश्वेता मोहमुपगता कथयन्तीव तदाहमेवं गृहीतास्मि मूर्छया इति । चन्द्रापीडस्तु तां वीक्ष्य श्रोतुं तस्या वृत्तान्तं प्रार्थितवन्तमात्मानमपराद्धं मत्वा वीजयित्वा कदलीदलेन, निषिच्य शीतजलानि, चकार लब्धसंज्ञाम् । ततस्सा स्मृत्वा स्वदुःखमाचुक्रेशोच्चैः । करुणरुदितेन तेन दलितानि शैलानां हृदयानि व्यरुदंश्च दिशोऽपि प्रतिरवव्याजेन । तप्तश्चन्द्रापीडः पर्यश्रुनेत्रः प्राह -

"देवि नहि शक्यमितः परं तवापि ममाप्युपरि कथां वक्तुं श्रोतुं च ।

In Public domain. Digitization Muthulakshmi Research Academy

विरम्यतामि''ति। सा परिमृजती बाष्पकणान् क्षणमात्रं विरम्य शोकादवदत् - ''नह्यस्तीतः परं वक्तव्यं वा श्रोतव्यं वा । किन्तु राजपुत्र श्रूयतां तदातन आश्चर्यवृत्तान्तः । येनाशालवेनाहं प्राणान् धारयामि ।

तदा मरणमेव प्रतीकारो मम दुःखस्येति निश्चित्य तस्य सन्नाद्धाऽभवम् । श्रूयतां प्रवृत्तमाश्चर्यम् । क्षणे तस्मिंश्चन्द्रमण्डलादवतीर्य कोऽपि सर्वश्वेतो दिव्यपुरुषो भूमण्डलं मृतं पुण्डरीकमूढ्वा स्कन्धेन गगनमुत्पतितः । उत्पतन् पितेव मां सान्त्वयामास जाते विरम मरणव्यवसायात् पुनस्ते स्यात् प्रियेण सङ्गम'' इति ।

आकर्ण्य सान्त्वनवचनं विस्मिताऽपृच्छं कपिञ्जलं किमेतदिति । स त्वददान एव प्रतिवचनं रे कस्त्वं? रे कुत्र यास्यपहृत्य मम प्रियमित्रमिति विकटमुच्चै रटन् कृतभ्रूकुटिः पश्यन्नूर्ध्वमनुसृत्य तं नभ उत्पपात ।

मयि पश्यन्त्यामेव त्रयस्ते प्रविष्टाश्चन्द्रमण्डलम् । दिव्यपुरुषस्य वचनेषु विश्वस्य मरणव्यवसायाद्धृतव्रता निवसाम्यत्र निमिषात्तस्मात्प्रभृति ।

श्रुत्वा ममेमं व्यतिकरं तातोऽत्रागत्य गृहप्रत्यागमनाय ययाचे शतकृत्वः । अन्वनयच्च सहस्रकृत्वः । अशिथिलव्रतां मां विज्ञाय विफलयत्न उषित्वाऽत्र दिनानि कतिचित् प्रतिनिवृत्तः ।

* * * * *

अथ पञ्चमो बिन्दुः

कथयित्वैवं स्वकथां निशश्वास महाश्वेता । चन्द्रापीडश्च निशम्य, विस्मयेन, कम्पेन च गृहीतात्माश्वासयंस्तामब्रवीत् । ''अविदितपरिणामेन गृहीतचापलेन मया तव हृदयव्रणे विद्धवा नवीकृतः पुराणः शोकः । कल्याणि माशोचीरितः परम् । यतस्त्वां भगवांश्चन्द्र एवाश्वासयामास । कोऽन्यस्तस्माच्चन्द्रमण्डलाद्वहिर्निर्गत्यपुनस्तत्र प्रविशति श्रृण्मश्चित्राः कथा देवतानाम् । वरः, शापः, तपः इत्यादिनिमित्तैः श्रूयन्तेऽद्भुताः कथाः । अपरो ब्रह्मा श्वेतकेतुरस्य तातः । नास्त्यसाध्यं तपसाम् ।'' इत्याद्युक्तिभिश्चेतिहासवचनैश्च तामशश्वसन्महाश्वेताम् ।

पुनराह चन्द्रापीडः ''देवि! कुत्र सा तरलिका तव विसम्भपात्रम्? न कदापि सा त्वामेकाकिनीं विहाय तिष्ठति किल दूरे'' इति । साऽब्रूत ''महाभाग कुत्र गच्छति

In Public domain. Digitization Muthulakshmi Research Academy

सा? मयैव प्रहिता केनापि कारणेन। श्रूयतां कारणञ्च तत्।

उक्तः किल मया गन्धर्वराजश्चित्ररथः। तेनैवात्र कृता शिवप्रतिष्ठा। अमुनैवात्र खानितमच्छोपसरश्च। इदं चैत्ररथवनमप्यवरोपितमनेनैव। राज्ञी तस्य मदिरादेवी। या प्रियतरा स्वप्राणेभ्योऽप्यस्य। तयोर्दुहितास्ति नाम्ना कादम्बरी। नहि मृषोद्यं तद्यत्साऽपहसति रूपलावण्यविभ्रमैर्लक्ष्मीमिति। आवयोराशैशवाद्गाढः स्नेहः। मन्यन्ते लोका आवयोरसवोऽभिन्नाः। गात्रमेव भिन्नमिति। अनेन मम दुर्विपाकेन सन्तप्तचित्तानुनीताऽपि बहुधा पितृभ्यां बन्धुभिश्चादत्त्वा श्रुतिं तद्वचसां प्रत्यजानात्। यथा न मया परिणीयते यावन्महाश्वेता दुःखान्तं न याति।

आरूढयौवनायास्तस्याः प्रतिज्ञेयं पितुर्हृदयशल्यायमाना बाधते। ततस्तस्यास्तातो मां सन्दिदेश। जाते अत्रागतया त्वया तव सोदर्याः प्रतिज्ञा शिथिलीकर्तव्या इति ततस्तरलिकया तस्यै प्रहितः सन्देशः। आगमिष्यति श्वः" इति।

सर्वञ्च तदहश्चन्द्रापीडो महाश्वेताश्रमे नीत्वा तत्सम्बन्धिकथाभिः सायाह्ने समर्प्य सन्ध्याञ्जलिमानीयेन्द्रायुधं बद्ध्वा वृक्षे महाश्वेतया दर्शिते शिलाफलके पर्णैः कृतायां शय्यायामशेत। किन्तु मुहुर्मुहुः स्मृतिगतेन महाश्वेताचरित्रेणाश्चर्यावहेन, चिन्तया च स्वसैन्यस्य वैशम्पायनस्य पत्रलेखायाश्च रजन्यां तस्यां नैव सुप्तः। नापि प्रबुद्धश्च। स्वकथाकथयन्त्यां महाश्वेतायां प्रत्यभिजान्निद्रायुध उत्सृजन्नश्रूणि पश्यंश्च तस्या मुखं दीनदीनमश्वोऽपि मनुष्य इव प्रववृते।

प्रभातायां रजन्यां समाप्य काल्यकृत्यानि चन्द्रापीडो यावद्गतो महाश्वेतादर्शनाय तावत्तरलिकापि सह केनचिद् गन्धर्वकुमारेण तत्रागता प्रणम्योपविष्टा तदन्तिके। पृष्टा महाश्वेतया। "किं कृतकृत्यासि?" इति। प्राह सा "अम्ब श्रुत्वा तव सन्देशं तया प्रहितः प्रतिसन्देशः केयूरकेण श्रूयताम्" इति।

अब्रवीत्केयूरकः - "किं न विदितं तव मम हृदयम्? किं चिन्तयसि परीक्षितुं मम हृदयम्? अथवा गर्हयसि मां गृहेऽवस्थितां त्वय्युषितायां तपोवने? तरलिकामुखेन त्वया प्रहितस्य सन्देशस्यायमेव प्रतिसन्देशो मम" इति।

निशम्य तन्महाश्वेता मुहूर्तमनिमिषलोचना चित्रलिखितेव चिन्तयित्वा किं नु वा मनसि बभाषे चन्द्रापीडम्। यथा -

In Public domain. Digitization Muthulakshmi Research Academy

"राजपुत्र तव सौम्याकारस्सदाचारश्च मधुरः । आकर्णितानि खलु भवतापि केयूरकेणोक्तानि वचांसि हृदयस्पर्शीनि । मयावश्यं गन्तव्यम् । नास्त्यन्यः प्रतीकारः। अस्त्यनतिदूर एव गन्धर्वराजधानी । अद्य तां विलोक्य श्वस्तव स्कन्धावारं गन्तुमर्हसि। उदात्तमधुराकृतिं दृष्ट्वा भवन्तं लब्धं महदुपायनमिति हृष्यन्ति गन्धर्वाः ।"

निशम्य वचस्तच्चन्द्रापीडोऽवोचत । "देवि किं बहुना । वचस्ते शासनमनतिक्रमणीयं मुनीनामपि" इत्युक्त्वा तामनुससार पादचारेणैव । आज्ञया तस्याः केयूरक आनयति स्मेन्द्रायुधम् । अग्रतो गत्वा केयूरको निवेदयामास कादम्बर्यै चन्द्रापीडस्यागमनं तस्याकारं गुणगणञ्च ।

अनतिदूरं गच्छतस्तस्य दृशोरपतद् गन्धर्वराजधानी । या द्वितीयेवामरावती । उपसृत्य तामतीत्य सप्तप्राकारान् केयूरकेण दर्शिताध्वा प्रविश्य कन्यकान्तःपुरमदर्शत्तत्र श्रीमण्डपे मणिस्तम्भरमणीये समुपविष्टां लावण्यराशिं रतिमपि सम्मोहयन्तीं कादम्बरीम्।

आलोक्य स्वमाह अहो अस्यास्सुन्दर्यास्सर्वाङ्गरामणीयकम् । "नहि खल्ववधिः स्रष्टुः सृष्टेः । नाद्य यावन्मया दृष्टेदृशी लावण्यमूर्तिः । न केवलं मया । किन्तु मन्ये नावलोकिता हरिणापि हरेणापि च । यद्यद्रक्ष्यत हरिणा नैवाधरिष्यत वक्षसि लक्ष्मीः। हरेण च पार्वती निजार्धाङ्गे । किञ्च वृथैव नेत्राणि सहस्राण्यपि शक्रस्य । यैर्नवीक्षितैषा नयनपर्वायमाणा" ।

एवं चिन्तयति चन्द्रापीडे सभाजयामास महाश्वेता कादम्बरी । महाश्वेता तां गाढमाश्लिष्टा दर्शयित्वा चन्द्रापीडमाह ।

"अयं भारतवर्षे सार्वभौमस्य तारापीडस्य तनयश्चन्द्रापीडः । असौ दिग्विजययात्रया पर्यटन् यदृच्छयागतो मदीयाश्रमम् । सन्दृश्यैनं नेत्रोत्सवमश्नुतां गन्धर्वलोक इति मयानीतोऽत्र ।"

ततः कादम्बरी पस्पर्श तमपाङ्गालोकैः । मदनो यः प्रतीक्षतेऽवकाशं सद्यः प्रविष्टस्तस्या हृदयं तेनैव मार्गेण । आसीनश्चन्द्रापीडो रत्नपीठे । कादम्बरीमहाश्वेते तस्याभिमुख्यां निषेदतू रत्नकम्बले ।

ततो महाश्वेता लज्जावनताननां कादम्बरीमवोचत । "हला वरिवस्यतु भवती चन्द्रापीडम्" इति । ततो मदलेखा कादम्बर्याः सखी प्रक्षालयामास तस्य चरणौ ।

In Public domain. Digitization Muthulakshmi Research Academy

कादम्बरी स्विन्नेन कम्पमानेन च करेण ताम्बूलव्याजेनात्मानं समर्पयामास तस्मै । समयेऽस्मिस्तदङ्गुलिस्पर्शेन विमनायिता सा नाज्ञासीत्करस्त्रस्तमपि रत्नवलयम् । चन्द्रापीडश्च तस्याः करस्पर्शसुखसम्पदा मेने स्वात्मानं त्रिलोकाधीशम् ।

व्यतिकरेऽस्मिन् प्रवृत्तः शुकसारिकयोः प्रणयकलहप्रसङ्गः तदा तस्य युगलस्य कलहवर्धनैश्चन्द्रापीडवचनैः प्रहसितास्तत्रत्याः कन्यकाः सर्वाः ।

वचांसि तान्युद्दीपयामासुः कादम्बरीहृदयगतं मदनं मुहूर्ते तस्मिंस्तत्रागत्य कञ्चुकी बभाण - "भर्तृदारिके देवी युवां दिदृक्षते" इति ।

स्वक्रीडाशैलमन्दिरं चन्द्रापीडस्य विश्रान्तिभवनमुपकल्प्य ते उभे गते देवीदर्शनाय। केयूरकप्रभृतिभटवर्गस्तर्दिङ्गितज्ञस्सेवते सर्वधा प्रवृत्ते सायाह्ने कादम्बरी मदलेखयाधिरुह्य स्वसौधाग्रं क्रीडाशैलमन्दिरगतं चन्द्रापीडं मुहुर्मुहुः पश्यन्त्यास्ते । तस्य लावण्यामृतमास्वादमानाऽभणन्मदलेखाम् ।

"सखि न मया श्रुतः कथास्वपीदृशस्सुभगोऽस्ति सृष्ट्यामिति । मन्ये मदनश्चन्द्रापीडरूपेण साक्षाद्भूत" इति । अकथितं कथ्यत एव महाश्वेतया "कुतोऽसावत्रानीतः । तयाद्य मम विकारेण विदितेन भवितव्यम् । यतस्तयापीदृशो विकारोऽनुभूत एव । अद्यापि दृढं निविष्टास्यपसर्त्तुं हृदयान्मम व्रतस्य विरुद्धं विकारम् । आस्तां तत् । पश्यात्र । शेषहारोऽयं तस्य कण्ठमर्हति । तत्र गत्वाऽनिच्छतोऽपि तस्य कण्ठोऽलङ्क्रियतामनेन" इति ।

आज्ञप्ता मदलेखा कादम्बर्या गृहीतहारा चन्द्रापीडमुपसृत्य यथासौ न निषिध्यति तथा चतुरं भाषित्वालञ्चकार तस्य कण्ठसीमाम् । हारेण तेन मनोहरेण चकाशे चन्द्रापीडो नक्षत्रमालयेव चन्द्रः। कादम्बरी प्रसिता तेन वीक्ष्य शेषहारालङ्कृतं चन्द्रापीडं सौधादवरुरोह। ततश्चन्द्रापीडो निर्वर्त्य सायन्तनानि कृत्यानि शयितस्तल्पे स्वमाह - अहो गन्धर्वकन्याया रूपविभ्रमविलासाः । किमेते प्रकृतिजाः? अथवा विकृतिजाः? आपाङ्गस्तस्या दूतीव प्रवृत्तः । किन्नरमिथुनमनुसृत्याऽयातस्य ममागमोऽधुना पुष्पितः। न जाने कथं नु वा फलिष्यन्त्यन्ते । अथवा यौवनदर्पेण कामी स्वतां पश्यति इति वचनानुरोधेन किं मां लक्ष्यं कुर्वे तस्या विलासानाम्? न चेत् क्व मनुष्यः? क्व वा गन्धर्वकन्यासङ्गतिः? चिन्तयन्नित्यं निद्रया गृहीतः सुष्वाप।

In Public domain. Digitization Muthulakshmi Research Academy

परेद्यवि कृतप्रातस्तनकृत्यः सन्दृश्य कादम्बरीमहाश्वेते लब्धानुज्ञ आरुढेन्द्रायुधः प्रययौ स्कन्धावारम् । अनुगम्यात्मानं कृच्छ्रेणागत्याऽच्छोदसरस्तीरे विश्रान्तं प्राप्तः स्कन्धावारम् । तत आत्मानं सन्द्रष्टुमागतान् राजपुत्रानादृत्य वैशम्पायनाय पत्रलेखायै चाकथयत् स्ववृत्तान्तं रहसि ।

परेद्युः यावत्प्रबुद्धः स स्वापात्तावत्केयूरक आगत्य हेमकूटात्प्राह देव! "अस्वस्था कादम्बरी भवन्निर्गमनक्षणात् । अत्रभवन्तं सा दिदृक्षते । किञ्चायं शेषहारो भवता विस्मृतः पर्यङ्के" इति ।

आकर्ण्य चन्द्रापीडः सद्यः प्रतस्थे पत्रलेखया हेमकूटम् । मार्गे महाश्वेतां सन्दृश्याभिनन्दितस्तया आतुरचित्तो गत्वा समदर्शत् कादम्बरीम् । या सरोवरतीरोद्याने हिमगृहे शयितास्ति कदलीदलशय्यायाम् । यावदसौ सन्दृष्टस्तावदभूत्स्वस्था । शय्यायाः प्रोत्थितवतीं निवारयामास तां चन्द्रापीडः । ततस्तौ परस्परकुशलप्रश्नेन निन्यतुः कञ्चित्कालम् । तदा विदिते मिथस्तयोर्हृदये । ततो मयावश्यं गन्तव्यः स्कन्धावार इत्यावेद्य कादम्बरीं तस्याः प्रार्थनया पत्रलेखां विसृज्य तत्र प्रस्थितस्सह केयूरकेण । स्कन्धावारं प्राप्तस्य तस्य परेद्यव्यायातो लेखः पितुस्तारापीडात् । वाचयित्वा स्वयं लेखं तं यत्र "महान् कालस्तव निर्गतस्य । त्वया क्षिप्रमागम्यतामि"ति दत्वा तं लेखकं केयूरकाय मन्त्रयित्वा वैशम्पायनेन कर्तव्यं व्यसृजत्सन्देशं कादम्बर्यै । "सत्यं ब्रवीमि। अत्यन्तमुत्सहते मम मनस्तव सन्दर्शनाय । नेच्छति मम मनस्तव विश्लेषम्। तथाप्यनुल्लङ्घनीया गुरूणामाज्ञा। माकुपद्रवती मह्यम् । पुनस्सन्द्रक्ष्याम्यनतिकालेनैव"। सन्दिश्यैवं व्यसृजत्केयूरकम्। ततः प्राह वैशम्पायनम्। आगम्यतां त्वया स्कन्धावारेण सह पश्चात्। मयाद्यैव गम्यते इत्यादिश्य सन्नद्धः प्रस्थाय प्राप्त उज्ञयिनीमेकाहेनैव।

* * * * *

अथ षष्ठो बिन्दुः

नगरं प्रविशन्नेव चन्द्रापीडः पितरौ प्रणम्य शुकनासञ्च निषेव्य गतः कुमारसौधम्। सर्वदा कादम्बरीध्याननिर्मग्नचेतसे तस्मै नाहारो रुरुचे । दूरे रसविभेदज्ञानम् । नहि प्रीणयन्ति स्म दुकूलानि चन्दनलेपः, भूषणानि च । स आस, प्रेयसीवियुक्तः पान्थः। करिणीदूरः करी च । दिवा रात्री रात्रिर्दिवाचास्तव्यस्ता गोचराऽभूत् । सर्वदासावुत्तरां

In Public domain. Digitization Muthulakshmi Research Academy

दिशमीक्षमाणस्तस्थौ पर्यश्रुनेत्रः चिन्तयंश्च केयूरकमुखान्मम निर्गमनवार्ता श्रुत्वा किन्वभूत्कादम्बरी? किन्नु बभाषे पत्रलेखामिति कथमपि कालं नयति स्म। पितृभ्यां स्वमनो विकारो यथा न विदितस्तथावहितेन चित्तेन वर्तते स्म।

गतेषु कतिषुचिद्दिवसेषु समागता पत्रलेखा सह बलाहकेन। चन्द्रापीडस्तदागमनेन किञ्चिदिवोच्छ्वस्य पप्रच्छ विस्रब्धं "पत्रलेखे कथ्यतां कादम्बरीवृत्तान्तः। किं स्मरत्यसौ मम? तथा निर्गताय मह्यं कुपितास्ति?" इति। असूयन्ती पत्रलेखा तस्मै वीक्ष्याब्रवीत् "कुतस्तेऽयं वितर्कः? आराधय कुलदेवता गुरूँश्च। त्वयि प्रसन्नमस्ति तस्या हृदयम्। लक्ष्मी नारायणमिव सा त्वां कामयते। कोमलां लतामिव दावानले विक्षिपसि तां विरहानले। श्रुत्वा तव निर्गमनं केयूरकेणाशनिहतेव शालिमञ्जरी सा चकम्पे। मां विलोक्याब्रूत पत्रलेखे किमिदं युज्यते? नैव प्रवर्तन्ते राक्षसा अप्येवम् इति। ततः प्रभृति दिनदिनप्रवर्धमानया विरहव्यथया कृशा क्रमशः क्रशीयसी क्रशिष्ठा चास्त्यद्य। नैव संस्कुरुते कैश्यम्। न लिम्पत्यञ्जनं नयने। रोदित्यविरतं पतन्ति यथा बाष्पधारा गण्डाभ्यां वक्षोजयोः। निरन्तरस्मरणेन त्वां प्रत्यक्षेऽनतिदूरे विलोक्याश्लेष्टुं प्रसारितबाहुर्धावित्वा पतति धरायाम्। ध्यायति त्वामेव सततम्। पृच्छति तव सम्बन्धिनीरेव कथाः। किमिति कथयामि तस्या विरहव्यथाम्। कदाचन मन्दं मन्दं सर्पन्ती मामुपगम्य विन्यस्य स्वमुखं ममोत्सङ्गे ब्रूते - "सखि उत्थीयताम्। गम्यतां यदि त्वं स्पृहयसि मम प्राणेभ्योऽविलम्बेन तमानय। नाहं प्रभवामि गन्तुं तावद्दूरम्। आयाह्यत्र स्थितेव। यदि विलम्बसे त्रिस्सत्यं नास्ति ते सखी" इति। श्रुत्वैतानि वचांसि दयनीयानि तस्या अवधीयताम् इति रुदती विरराम।"

वचांस्याकर्ण्य तानि मुहूर्तं स्तब्धश्चन्द्रापीडश्चिन्तयन्नास्ते गन्तुं कारणम्। अतीतेषु दिनेषु कतिपयेष्वागतः केयूरको ददर्श चन्द्रापीडं योऽस्ति चक्रवाक इव चक्रवाक्या वियुक्तो विरहक्लिशित शयितस्तल्पे पत्रलेखया वीज्यमानस्तालवृन्तेन। केयूरकः तमभिवाद्य पृष्टस्तेन कादम्बरीवृत्तान्तं पश्यन् पत्रलेखामुखं बभाण सङ्ग्रहेण। यथा - "पत्रलेखया भवते सर्वेण निवेदितेन भवितव्यम्। निवेदितेनाप्यत्रभवतात्रैव स्थितम्। श्रुत्वापि मम मुखाद् भवतात्रैव यदि स्थीयते वृथैव ममागमः" इति।

चन्द्रापीडः प्राह - "ब्रूहि सन्देशं तस्याः" इति। अचकथत्केयूरकः। "युष्मासु

In Public domain. Digitization Muthulakshmi Research Academy

जीवत्सु सर्वेषु म्रियेऽहं विरहव्यथयाभिभूयमाना इति । साकूतदृष्ट्या मां प्रहिण्वती। न तु सन्देशेन । किं बहुना । शङ्केऽहं किमेषा प्राणान् धारयति यावदहं प्रतिनिवृत्तः" इति।

ततश्चन्द्रापीडः नाहं राक्षसः । नहि चण्डालः । नापि वा किरातः । अवश्यं धृतपक्षो निपतिष्याम्यच्छोदसरस्तीरे श्वः इति । प्रतिसन्देशेन पत्रलेखया सह व्यसृजत्केयूरकम् ।

पुनः प्रयाणस्य समुचितं कारणमन्विच्छतस्तस्य स्कन्धावारः प्राप्तः इत्युदन्तः श्रुतिपथमगात् । ततस्स वृत्तान्तममुं वैशम्पायनमावेद्य मन्त्रयित्वा तेन तस्मिंस्तिष्ठे इति निश्चित्य पित्रनुज्ञया प्रत्युत्थाय तमानेतुं गत्वानतिदूरेऽभिमुखमायान्तं सेनान्यं दृष्ट्वा पप्रच्छ कुत्र वैशम्पायनः? इति । सोऽवमूर्धा लिखन् भूमिं पादाङ्गुष्ठेन, पश्यन्नधस्सगद्गदं प्राह - "नात्र वैशम्पायन इति । चन्द्रापीडस्सद्योऽवतीर्य तुरगात्तस्यानिष्टमाशंक्यं हा सखे इति प्ररुदितः । सेनानीस्तस्य पादयोः पतितोऽवदत् देव भवान् मास्मरुदत् । स जीवत्येव" इति । चन्द्रापीडस्तु "न न, यद्यजीविष्यत्स न्यवर्त्स्यत्" इत्युदित्वा प्ररुदित उच्चैः । सेनापतिस्तं विलपन्तमवोचत । "देव आकर्ण्यतां तस्य वृत्तान्तः । तथात्र भवति निर्गतेऽस्मानादिश्य, स मां प्रयाणसन्नाहायादिश्य प्रतिनिवृत्य शिबिरं तत्रैव स्थितः । परेद्युः प्रगे कृतकालकृत्यस्तत्र वने विहरस्तं प्रदेशं चिरपरिचितमिव पश्यन् प्रत्यभिजानन्निव, अन्विष्यन्निवापहृतं वस्तु चरन्नास्ते चञ्चलदृष्टिः। तदा सायाह्नस्सञ्जातः । वयमब्रूम "देव प्रयाणसन्नाहः कृतः" इति । स कुप्यन्नस्मभ्यं बभाण । "निर्गम्यतां युष्माभिस्सर्वैरपि । न मयानुगम्यते । स्थीयतेऽत्रैव मया यावज्जीवम्" इति । ततोऽस्माभिः कतिचिद्दिनान्युषितैस्तत्र कृताः प्रयत्नाः शतशस्तस्य मनः परिवृत्यै । किन्तु न वयं कृतार्थाः । उक्तोऽपि राजचक्रेण - "प्रायोपविष्टैरस्माभिरप्यत्रैव त्वया साकं स्थीयते इति न शिथिलयामास स्वाग्रहम् । अकृतर्था वयं तस्य निवर्तने निवृत्ताः स्म । श्रुत्वा देवः प्रमाणम्" इति ।

निशम्य तच्चन्द्रापीडो मूको विषण्णस्तत्रैव निषसाद वृक्षमूले । व्यतिकरेऽस्मिन तारापीडः श्रुत तद्वृत्तान्तस्सह शुकनासेन तत्रागतः । बलाहकेन निशम्य वैशम्पायनकथाम- दूदुषच्चन्द्रापीडम् । "त्वया केनाप्यपचारेण कृतेन भवितव्यं वैशम्पायने। कारणेन

In Public domain. Digitization Muthulakshmi Research Academy

तेनैव विरक्तेन तेन गतेन भवितव्यम् ।" इतः पुरा न स्थितं युवाभ्यां वियुक्ताभ्याम्। किं वृत्तमद्य? त्वं गृहे स वने। विना केनापि महत्तरेण निमित्तेन कुतो जायतेऽकस्मात्पितृबन्धुमित्रत्यागरूपो विरागस्तस्य ?" इति।

एवं पुत्रं प्रणिन्दन्तं तारापीडं शुकनासः पुत्रशोकार्त्तोऽपि पर्यवष्टभ्य हृदयमाह "देव नैतत्सङ्गच्छते यद् भवता वस्तुतत्त्वमविमृशता प्राज्ञेनाप्यपचारशङ्कया गर्ह्यते पुत्रः। किं पतत्यग्निश्चन्द्रात्? किमशनिः पतति शारदमेघात्? किं निस्सरति परुषवचनं कुमारमुखात् । स एव गर्हणीयः । पठिता विद्यास्तेन कीरेणेव । पीतेऽमृते मुखान्निस्ससारेव कालकूटः । उच्यते किलान्यभ्दुक्तमन्यद्वान्तमिति तात चन्द्रापीड त्वमेवास्य भूमण्डलस्य भवस्येकजीवितम् । माशोचीस्तस्मै दुर्वृत्ताय" इति ।

सद्यश्चन्द्रापीडः पितृपादयोः पतितः कृताञ्जलिर्बाष्पक्लिन्नलोचनो रुदन् बभाषे- "तात भवताहमपराधे स्थापितः । इदमेव मम महत्तमं प्रायश्चित्तम् । मया सद्य एव गतेन सोऽन्विष्यानेष्यते । अनुजानातु भवान् । जानीतां मम गुणदोषौ तस्मादानीतादत्र। शपामि भवत्पादाभ्यां नाहं प्रतिनिवर्ते विना तेन । प्रतिजानामि" इति ।

एवं कृतप्रतिज्ञे चन्द्रापीडे तात उत्सृजन्नश्रूण्यपश्यन्मुखं शुकनासस्य । स नैकधा निषिषेध । निवारयामास च । तारपीडश्च शतधा सहस्रधा च सान्त्वयामास । किन्त्वसौ नाश्लथयत्कठोरां प्रतिज्ञामात्मनः ।

शुकनासस्य दारा मनोरमा या रूपान्तरं स्वजनन्या बाष्पधाराभिश्चन्द्रापीडस्य शिरस्सिञ्चन्ती दीनदीनं विलपन्तीचाह चन्द्रापीडम् । "तात चन्द्रापीड त्वयि स्थितेऽत्र चिन्तयामि मम पुत्रं मदुत्सङ्गे स्थितमिव । त्वय्यपि गते ममान्धतमसमेव" इति ।

विलपन्त्यामपि जनयां विलासवत्यामेवमेव न तेन बिभिदे प्रतिज्ञा । कथमपि पित्रानुज्ञातो लब्धाशीः प्रणम्य वृद्धान् निवार्यानुचरानेकाकी प्रतस्थे । वारितोऽपि वलाहकस्तमनुगतः । चन्द्रापीडः कामयमानः प्रियादर्शनो शैलानारोहन्, अवरोहन् नदीनदानुत्तरन् प्रयाय दिवारात्रमनिलवेगेन प्राप्तोऽच्छोदसरस्तीरम् ।

स तत्रापनीय राजवेषं विनीतवेषेण सन्द्रष्टुं महाश्वेतां प्रविष्टस्तदाश्रमम् । सा स्वकृतक्रूरकर्मणा तस्मै मुखमदर्शयित्वा नितरां सकुचिताङ्गी नतमुखी लज्जाभिभूता रुदत्यास्त । चन्द्रापीडोऽविदितरुदितकारणः प्रष्टुं शङ्कमानस्तां पश्यन्नवतस्थे ।

In Public domain. Digitization Muthulakshmi Research Academy

मुहूर्तादनन्तरं शनैश्शनैर्मुखमुन्नमय्य गद्गदकण्ठी साभणत् यथा "पित्राज्ञया त्वं नगरं प्रस्थितोऽसीति केयूरकेण गृहीतार्था कतिपयदिनानि नीत्वा कादम्बरीमन्दिरे पुनर्निवृत्तास्मि। द्वित्रेभ्यो दिनेभ्यः परं विप्रः कश्चन किमपि वनेऽन्विष्यन्निव पर्यटन् प्रविश्याश्रमान्तर्दृष्ट्वा मां शिरः कम्पयन्नुपसृत्य स्प्रष्टुमुद्यतः। वारं वारं तर्जितोऽपि भर्जितोऽप्यविरमन्नवव्ययन्माम्। निशायां कस्याञ्चन सुप्तामेकाकिनीं सन्निधाय निर्लज्जो निश्शङ्कश्च प्रसारयामास बाहू मामालिङ्गितुम्। तदाहमुग्रम्पश्या गृहीत्वा कमण्डलूदकानि ध्यात्वा देवतास्तमशाप्सम्। यथा - "रे सर्वापि तव विद्या। शुकविद्या स इव मुखरागेण रटसि। धिक् त्वाम्। अपसर दूरम्! दुर्विनीत! भव त्वं शुक एव" इति।

अनुक्षणमेव स मम शापेन वा स्वजन्मान्तरपापेन वा प्राणानुत्सृज्य पपात भूम्याम्। तथा मृतं तं वीक्ष्य विलपद्भिः परिजनैर्विदितं मया स तव मित्रं शुकनासस्य पुत्र इति धिङ्मां तव प्रियमित्रघातिनीम्।

वचसा तेनाशनिनेव हतश्चन्द्रापीडः "हा, कादम्बरि न त्वामीक्षेऽस्मिन् जन्मनि" इत्युच्चैर्विलपन् दीर्णहृदयः पपात तत्रैव। महाश्वेताचेमं विपरिणामं विलोक्य सम्भ्रान्तमनास्तस्थौ।

* * * * *

अथ सप्तमो बिन्दुः

तत्र कादम्बरी विदिता पत्रलेखाकेयूरकाभ्यामद्य चन्द्रापीड आयात्यच्छोदसरस्तीरमिति तं प्रत्युस्थानेन सभाजयितुं महाश्वेताश्रमं गन्तुमना आसीत्। एवंस्थिते निशम्य प्रियमित्रस्य वैशम्पायनस्य मरणोदन्तं "किं न्वत्याहितं कुर्याच्चन्द्रापीड इति विशङ्क्य महाश्वेता तमाश्वासयितुं विना कादम्बरीं नान्यः प्रभवति। इति निश्चित्य तामानेतुं व्यसृजत्तरलिकाम्। तरलिकया चन्द्रापीडोऽद्य मदाश्रममायास्यती"ति महाश्वेता-सन्देशमाकर्ण्य कादम्बरी निर्भरानन्दमग्नानुगतैः पत्रलेखामदलेखाकेयूरकैस्तदा आश्रमं प्रस्थिता। द्रुतपदैः प्रयन्ती बत! निम्नोन्नते मार्गे बहुशश्चस्खाल। स्फुरितं च दक्षिणं नेत्रम्। दुर्निमित्तानि चान्यानि दृष्टानि तया मार्गे गच्छन्त्या सायाह्ने यावत्साश्रमपरिसरं प्राप्ता तावच्छुश्राव कुतोऽप्याक्रन्दनारावम्। आश्रमान्तः प्रविशन्त्या स कण्ठध्वनिः महाश्वेताया इत्यवगतः। ततोऽत्यातुरचित्तया प्रविष्टयाश्रमान्तः ददृशाते विजीवितः

In Public domain. Digitization Muthulakshmi Research Academy

पतिर्विलपन्ती च महाश्वेता ।

हन्त! तपस्विनी कादम्बरी वीक्ष्य सोरस्ताडम् "अविधा! अविधा!" इत्युच्चैराक्रन्दन्ती मुमूर्छ । पत्रलेखा च निरीक्ष्य चन्द्रापीडं मृतं निश्चेष्टा मृतप्राया पपात शिलातले क्षणेभ्यः कतिपयेभ्योऽनन्तरं कादम्बरीषदिव प्रबुद्धा पप्रच्छ तरलिकां चन्द्रापीडस्य मरणकारणम् । अचकथत्सा यथावृत्तम् ।

ततः कादम्बरी दूरीकृत्य हृदयाद्वनिताजनस्य सहजं वैक्लव्यमवदन् महाश्वेतां मदलेखाञ्च । "श्रान्तास्मि रुदित्वा रुदित्वा । इतः परं न रोदिमि । अनुगच्छामि पतिं मम । अरुदन्नेव मित्रवियोगेन श्रुतमात्रेण पतिर्ममासूनत्यजन् ममाप्ययमेव धर्मः । त्वं जीवितुमर्हसि । यतस्ते भर्तृसङ्गमप्रत्याशा कल्पिता भगवता चन्द्रेण । सर्वधाहमस्य-भागिनी भग्नमनोरथा । किं प्रयोजनं मया जीवन्त्या हताशया? मदलेखे त्वयाऽवहितया भवितव्यं यथा मद्वियोगतप्ताभ्यामम्बया तातेन च न किमप्यत्याहितं क्रियते । अधिवस त्वं मम वासभवनम् । अस्ति तत्र मया लिखितं भर्तृचित्रम् । अवकुण्ठय तद्यथा धूलिधूसरं न भवति । पल्यङ्के मयावलम्बितः कामदेवपटः । स वृथा मयार्चितः । अपनीयतां सः । उषितः कञ्चित्कालं क्रीडाशैले मम प्रियः । दीयतां स कस्मैचिन्मुनये प्रशान्तविषयाय । नार्हत्येषोऽन्यं जनम् । सन्ति राजहंसा आरामवापीषु। तेषां दयमाना भव । निकषा तां वापीमस्ति लीलावनं यद्वर्धितं स्वयं मया दत्तजलसेचनैः। अस्ति च तस्मिन् वने परिणीतो वकुलवृक्षो मालत्या । नाद्य यावत्कृतं कङ्कणविसर्जनम् । तत्त्वया क्रियताम् । तत्रैवास्ति मम पुत्रकृतकोऽशोकः पुषाण तं जलदानेन । तत्र बालहरिणी मामनालोक्य शोचति । कालय! तामटवीम् । पश्य यथा न कलहायेतेऽनुक्षणं मम परिहासनामा शुकःकालिन्दीनाम्नी शारिका च । सततं मदुत्सङ्गे सङ्क्रीडमानं नकुलशिशुं क्रीडय । त्वदुत्सङ्गे" इत्युक्त्वा किञ्चिदिव स्थित्वा पुनराह। यथा ।

"कुतश्चिन्ता ममैषां विषये ? किमपि वा भवतु मम परोक्षे । केयूरक! रचय चितामविलम्बितम् । कुतः पश्यसि मां दीनदीनम् । गच्छ सन्धुक्षय चिताग्निम् । हा! कथं दहत्यग्निर्मम लावण्याम्बुमयं शरीरमिदम्? किं पताम्यच्छोदसरस्सलिलेषु पत्या सह? मृते मम प्रिये मित्रमरणश्रवणसमकालमेव जिह्वेमीयन्तं कालं जीवितास्मि

In Public domain. Digitization Muthulakshmi Research Academy

पतिमरणं श्रुत्वापीति । स पित्राज्ञया मां विहाय प्रतिगच्छन्नाह । कदा त्वं पुनर्दर्शयसे? इति । स मन्यतेऽधुना इयं विलम्बते" इति । एवं वदन्तीं मरणव्यवसितां कादम्बरीं प्रेक्ष्य कोऽपि दिव्यपुरुषो मेघगम्भीरस्वरेण बभाण यथा ।

"वत्से । महाश्वेते पुरा मयाश्वासितासीः । अद्याप्यस्ति तव प्रेयान् मम सकाशे। न मृतः । कादम्बरीप्रियश्चन्द्रापीडः कश्चित्कालं मृतः किल लक्ष्यते । माभैष्टम् । पुनर्जीविष्यति । लप्स्यते कादम्बरी तेन सङ्गममवश्यम् । अतो विश्रब्धा भवतु कादम्बरी" ।

एवमुक्त्वा सोऽन्तर्दधौ । तदाकर्ण्य सर्वासु तत्रस्थास्वाश्चर्यचकितासु पश्यन्तीषु पत्रलेखा या मृतप्रायास्ति पतिता शिलातलेऽद्ययावदुत्थाय हठात्प्रधाव्य गृहीत्वा केसरेष्विन्द्रायुधमाकर्षन्ती गत्वाऽच्छोदसरस्सलिलेषु पतिता निर्मग्नासीन्मुहूर्त्तेन तेन साकम् ।

तथा धावमानां प्रेक्ष्य पत्रलेखां शङ्कमाना तरलिका तामन्वगच्छत् । मुहूर्ते चित्रं जलादुत्थितः कपिञ्जलः । चित्रमिदं विलोक्य गत्वा सद्य आवेदयामास कादम्बरीमहाश्वेते तयोर्विस्मयमानयोः कपिञ्जलः स्रवत्सु सलिलकणेषु जटाजूटादार्द्रवल्कलः साक्षाद्भूतः पुरतः । स आह "कादम्बरीमहाश्वेते किं मां युवां प्रत्यभिजानीथः ? अहमस्मि कपिञ्जलो मित्रं पुण्डरीकस्य महाश्वेतायाः प्रियस्य । निन्द्योऽस्मि कृतेन विलम्बनेन दीर्घेण । श्रुतं किल युवाभ्यां यदुक्तं चन्द्रेण दिव्यपुरषेण । श्रृणुतं युवामद्य वृत्तान्तं मम ।"

"पुरतस्ते तथा बलादपहृत्य तव प्रियमूढ्वा प्रसभेन नभसा गच्छन्तं तं दिव्यपुरुषमन्वगच्छमहं दूराद्दूरतरम् । तथा गत्वान्ते स प्रविष्टश्चन्द्रमण्डलम् । तमनुप्रविशन्तं मां स आह "कपिञ्जल अहमस्मि चन्द्रः । शप्तोऽस्मि तव वयस्येन विना कारणेन । मया लोकपालेन निर्वर्त्यो यथाकालं मम विधिः । ततः किरणाः प्रसार्यन्ते मया सर्वत्र । करैर्ममावृधत्तस्य मदनतापः । दुस्सहसन्तापेन तेन शप्तोऽस्मि" यथा - "रे चन्द्र मां विरहार्तं मारयसि करैः । चन्द्र! त्वमप्यहमिव जन्मनि जन्मनि विरहार्तो मरिष्यसि" इति ।

"ततोऽनपराद्धं मामयं कुतोऽशपदिति क्रुद्धेन मया स प्रतिशप्तः । यथा -

In Public domain. Digitization Muthulakshmi Research Academy

"अहमिव त्वं मरिष्यसि" मुहूर्तेन शान्तक्रोधोऽनुशयतप्तोऽस्मि । एष जामाता मे महाश्वेतासम्बन्धेन । महामुनिस्तस्य तातो भगवान् श्वेतकेतुः प्रतिकर्तुं प्रभवति । ततश्शरीरमस्य रक्षाम्यमृतरश्मिषु इति चिन्तयित्वानयम् । त्वं गत्वा क्षिप्रं गृहीतार्थं कुरु श्वेतकेतुम् ।"

एवमनुनीतश्चन्द्रेण तूर्णं तूर्णं गच्छन् पुरः प्रयान्तं वैमानिकमतीत्य गतोऽस्मि । येन कुपितः शशाप माम् । "रे तपोबलदर्पेणाश्व इव धावन्नतीत्य मां गतोऽसि । ततस्त्वमश्वो भव" इति ।

ततोऽनुशयतप्तेन मया तस्य पादयोः प्रणमताऽभ्यर्थितः । यथा - "देव मित्रव्यसनेन शून्यहृदयेन भवतोऽपराद्धोऽस्मि न तु तपोदर्पेण । ततः प्रसन्नेन मयि शापोऽयमुपसंह्रियतां भवता" । स मम दयमान आह न मे शापश्शक्यमुपसंहर्त्तुम् शुणृ। उज्ञयिनीपतिस्तारापीडस्तपस्यति पुत्रार्थी । तस्य चन्द्रः पुत्रीभविष्यति । तस्य सचिवस्य शुकनासस्य पुण्डरीकः पुत्रो भविष्यति । सेव्यतां चन्द्रस्स त्वया वाहनभूतेन कञ्चित्कालम् । मृते तस्मिन् मुक्तो भविष्यसि शापात्" इति ।

ततः शापमूर्छितस्सागरे पतितः सद्योऽयोनिजोऽश्वोऽहमुत्थितः । न मे नष्टा दिष्ट्या प्राग्जन्मस्मृतिरश्वरूपस्यापि किन्नरमिथुनमनुपतन्नयं मयैवात्रानीतः। द्वयोरप्यनयोर्जन्मद्वयमनुभोग्यमस्ति । अद्येमौ प्राप्नुतो द्वितीयं जन्म । निवेद्येमं वृत्तान्तं भगवते श्वेतकेतवे विजाने कुत्र जनिष्येते उभौ इति ।

कपिञ्जलेन कथितया कथयात्मना शप्तो वैशम्पायनः स्वप्रियः पुण्डरीक एवेति विदिता महाश्वेता भृशं सन्तप्ता "हन्त मयैव क्रूरया शप्तो द्वितीयस्मिन् जन्मन्यपि मय्यनुरक्तः प्रियः । धिक्कष्टम् । मयैव मम नेत्रं सूच्या विद्धम्" इति वदन्ती प्ररुदिता ।

कपिञ्जलस्तथा विलपन्तीं महाश्वेतामाश्वासयामास, यथा - "देवि मारोदीः अस्ति तव प्रियस्य शापावधिरनतिदूरे । दूरीभविष्यति तव दुःखभारः । आश्वसिहि अचिरेणैव पुण्डरीकस्य हस्तं ग्रहीप्यसि । कादम्बरी च चन्द्रापीडस्य मधुरभाषणानि कर्णभूषणानि करिष्यति" इति ।

ततः कादम्बरी पप्रच्छ । का कथा पत्रलेखायाः? इति न मया विदितास्तीत्युक्त्वा

In Public domain. Digitization Muthulakshmi Research Academy

स दिवमुदपतत् । गते तस्मिन् कादम्बरीमहाश्वेते शोकविस्मयाभ्यां गृहीते अत्यवाहयतां यामिनीं ताम् । कपिञ्जलवचनेन ते निरीक्षेते शापावधिं प्रिययोः ।

अन्येद्युश्चन्द्रापीडस्य शरीरं कादम्बरी स्फटिकशिलाफलके प्रतिष्ठाप्य स्नपयित्वा हिमजलेन कर्पूरमिश्रेण विलिप्य चन्दनरसमर्चयामास । भगवता चन्द्रेण कृत आश्वासश्चेद्यथार्थः कल्याणं भविष्यति । अन्यथा मरणं मम हस्त एवास्ति इति कृतनिश्चयासीत् ।

ततः कादम्बरी विलोक्य महाश्वेतां "हला अद्य नाहं शङ्के सखि इति त्वां सम्बोधयितुम् । यत आवामुभे च समदुःखभागिन्यौ स्वः । विधिरावामुभे च समदुःखभागिन्यौ कृत्वा करोत्यावयोश्चिरमैत्री यथा न दूषिता" इति ।

तदारभ्य कादम्बरी चन्द्रमौलिमिव चन्द्रपीडमर्चयन्त्यास्ते रात्रिन्दिवम् । दिनेषु गच्छत्स्वप्यविकृतं दृष्ट्वा चन्द्रापीडशरीरमासीत्सा विस्रब्धा स जीविष्यत्येवेति । ततस्सा सेनान्यं वलाहकमाहूयाह यथा -

"त्वया ज्ञात एवाश्चर्यावह एष वृत्तान्त आमूलम् । विस्रब्धास्मि जीवेदयमिति। यतो नांशोऽपि शरीरे दृश्यते विकारः । आश्वास्यतां तारापीडस्त्वया गतेनोज्जयिनीम्।"

स जगाद "देवि तत्र प्रहिणोम्यन्यम्। न मे पादौ चलतः प्रयातुं विहाय युवराजम्" इत्युक्त्वा लेखं दत्वा व्यसृजद्भटं त्वरितकनामानम् । स वायुवेगेन गत्वा कथयामास वृत्तान्तमामूलाग्रम् । आकर्ण्य तारापीडो मृतप्रायवृत्तान्तं प्रथमकथितं न श्रद्दधे पश्चादुक्तेऽपि पुनर्जीवनवृत्तान्ते । उच्यते हि "अतिस्नेहः पापशङ्की"ति ।

तदा शुकनासोऽब्रवीत् - "देव भवान् जानाति कर्मवैचित्र्यम् । प्राज्ञो भवति शास्त्रेतिहासादिषु । कुतस्ते शङ्का? कति न सन्ति कथाः पुराणेषु मनुष्यदेहधारिणां देवानामृषीणाञ्च । भवतः पुत्रस्य लोकोत्तरं रामणीयकं कथयत्यनुक्तमसौ चन्द्रस्यावतार एवेति ।

नहि साधारणेषु तादृशी कलासम्पतिः । किञ्च त्वया दृष्टा स्वप्ने देवीमुखं प्रविशंश्चन्द्रः । मयापि दृष्टं पुण्डरीकं ब्राह्मण्या उत्सङ्गे । स शापोऽस्तु तयोः। आवयोस्तु वरः । यतो देवते जाते आवयोः पुत्रौ । किं मिथ्या कपिञ्जलस्य तुरगरूपम्? यदि मिथ्यां क्व दृष्टस्तादृशस्तुरङ्गमः ? किं चाद्ययावददृष्टा वा कुत्रापि मृतस्य शरीरस्य पञ्चभूतात्मकस्य निर्विकारता लोके? अथवा श्रुता वा? किमपवदते

In Public domain. Digitization Muthulakshmi Research Academy

त्वरितकः? किं लिखति वलाहकोऽभूतविषयम्? किं न विद्मो वयमस्मद्भटा मिथ्यावादिनस्सत्यवादिनो वा? अचिरेणैव राहुमुखादिव चन्द्रं शापान्मुक्तं द्रक्ष्यति चन्द्रापीडमत्रभवान्" इति।

उक्तोऽप्येवं पुत्रस्नेहेन स विकलचित्तः स्थितः। उक्तं किल "अतिस्नेहः पापशङ्की"ति। ततो राजा परिवारेणानुगतोऽरण्यं प्रतस्थे यत्र चन्द्रापीडः। तदा राज्ञा वियुक्ता विदिशानगरी दृष्टाऽयोध्येव रामेण।

राज्ञी राजा च वीक्ष्य विजीर्वितं पुत्रं मुक्तकण्ठं व्यलपताम्। निश्चिकाय तारापीडस्त्यक्तराज्यस्तत्रैव निवसितुं वल्कलधरः।

इत्युदित्वा जाबालिः कृतजृम्भः किञ्चिदिव विरम्य पुनरकथयत्। "महाश्वेतया शप्तो वैशम्पायनः पूर्वकर्मानुरूपेण शुकोऽभवत्। किं च जनकेन यत्कुपितेनोक्तं शुकेनेवानेन पठिता विद्याः इति तदपि परिणतं शापरूपेण" इत्युक्त्वा विरराम।

कथां तां दीर्घां श्रुत्वा विस्मयमानास्तपोधनाः पप्रच्छुर्जाबालिम् "भगवन् पुण्डरीको मुनिः कथं तथा कामपरतन्त्र आसीत्"? इति। जाबालिरवदत् "अस्य पूर्वजन्मकर्मानुसारेण स्त्रीस्वभावः प्राप्तः" इति।

कथायां समाप्तायां प्रभातासीद्रजनी मुनयस्सर्वे प्रातस्तनकर्माण्याचरितुं गताः।

* * * * *

अथाष्टमो बिन्दुः

यावत् श्रुता जाबालिना मम कथा तावज्ञाता मम प्राग्जनुस्मृतिः। हन्त! प्रथमोऽहं भगवतः श्वेतकेतोः पुत्रः ततश्शुकनासस्य। धिङ्माम्। अद्य पतगस्य। प्राक्तनजन्मस्मृत्या समकालमेवाशिश्रियन् विद्यास्सर्वाश्च मम रसनाम्। तदैव महाश्वेतानुरागेण सह वासनाश्चान्याः प्रबुद्धाः। ततः परिपोषितो हारीतेन वत्सलेन क्रमशः सञ्जातपक्षश्शनैरभूवमुत्पतनपटुश्च। गच्छत्सु दिनेषु लब्धयौवनो महाश्वेतायामनुरक्तस्तदाश्रमं गन्तुमना अभवम्। अचिन्तयं मा लभतां पक्षिणो मम तस्यास्समागमः। पश्यंस्तां तदाश्रमवृक्षकोटरे निवसन् जीवितमतिवाहयामि इति।

दिने कस्मिंश्चन मित्रवत्सलः कपिञ्जलो मम पित्राज्ञयागत्य जाबालेराश्रमं पप्रच्छ हारीतम्। "कुत्र वैशंपायनशुकः" इति। प्रत्यभिज्ञाय तमब्रवम् "सखे

In Public domain. Digitization Muthulakshmi Research Academy

अयमहमत्रास्मि" इति । ततस्स मां नीत्वा स्ववक्षस्सुचिरं विललाप । "अविधा! अविधा! कीदृशी दारुणा दुर्दशा मम सुहृदः पुण्डरीकस्य?" इति । मयाप्यवशेन रुदितम् । रुदन्नेवावोचम् - "कुतस्त्वं रोदिषि? त्वदर्थे मया रोदितव्यम् । यतो मदर्थे भवानपि प्राप्तो दुर्दशाम् । क्व स जपः? क्व च हेषाः? क्व तद् वल्कलम्? क्व च पल्ययनम् ? क्व तदुपवीतम्? क्व च खलीनम्? क्व तन्मुनिरूपम्? क्व च तुरङ्गरूपम्?" इति ।

स स्थित्वा मुहूर्ते त्वरमाणो निर्गन्तुमचकथन्मम पितृसन्देशं सङ्ग्रहेण सन्दिशन्ति पितृपादास्त्वामेवम् । "वत्स नास्ति तव दोषः । इयं तव दुर्दशा प्राक्तनजन्मफलम्। न मया कृता प्रतिक्रिया तव जातमात्रस्य जानताप्यल्पायुस्त्वमिति । अप्रतिक्रिया ममैव दोषः । अद्यारब्ध आयुष्कामयागः । तस्य समाप्तिं यावदितस्त्वया न गन्तव्यं कुत्रापि स्थीयतामत्रैव" इति । अभिलषितं मया निवसितुं त्वया सहात्र । किन्तु तातपादैर्नियुक्तोऽस्मि याग कर्मण्यारब्धे तव कृते इति ।

इति वदन् गाढमाश्लिष्य "मा मा विस्मर पितृपादानां सन्देशमि"ति मुहुर्मुहुः उपदिश्य मुनींस्तत्रत्यानामन्त्र्य दिवमुदपतत् । स्मरन्नपि पितृसन्देशमनुक्षणं दुर्दान्तेन महाश्वेतामोहेन गृहीतस्तस्या वियोगमसहमानः प्रतिज्ञां दुर्विधिना तृणीकृत्य महाश्वेताश्रमं यातुं मनोऽकरवम् ।

दिवसे कस्मिंश्चन जाबालिमहर्षेराश्रमवास्तव्यास्सर्वे गताः कुत्रापि । निर्मक्षिकमासीदाश्रमम् । अयमेव सुमुहूर्त इत्युत्तरां दिशां प्रयातः । अप्रभुतया दीर्घं प्रयातुं श्रान्तोऽस्म्यनतिदूरेणैव । अभवं पिपासार्तश्च । श्रमापनयनाय प्रविष्टोऽस्मि कुत्रचिद् वृक्षकोटरम् । प्रविष्टमात्रस्य मम मनो बबन्ध गाढनिद्रा शरीरं च पाशः । प्रबुध्य मयि पश्यति दिशोऽनतिदूरे गोचरीभूतः कश्चन मातङ्गबालकः । स मां बद्धवन्तमात्मानं धन्यं मन्यत इव दृष्टः । आकारेण कर्मणा च स मांसार्थीति निश्चित्य हनिष्यति मामयमिति गत्वा प्रार्थयममुम् ।

"भद्र! त्वं दृश्यसे प्रसन्नमुखः । न त्वं मांसार्थीव च लक्ष्यसे । कुतो बध्नासि माम्? मुञ्च माम् गच्छामि यथेच्छम् । को लाभस्ते मया बद्धेन? का वा हानिस्ते मया मुक्तेन?" इति ।

In Public domain. Digitization Muthulakshmi Research Academy

स आह - "शुक! न मया बद्धस्त्वं मदर्थे विदितं यत् त्वया जाबाल्याश्रमे चिरमुषितोऽसि" इति। विदितास्ति मम स्वामिनो दुहिता तव कथाम्। बद्धस्त्वं तदाज्ञया। कथमहं मुञ्चामि? इति।

उक्तं पुनर्मया "सौम्य युवासि त्वमपि। त्वयापि ज्ञायत एव यूनां विरहार्त्तानां कथा मुञ्च मां प्रियासन्दर्शनाय गच्छन्तम्।"

स आह - "मया यूनापि जानतापि विप्रलम्भप्रभावं भृत्येन सता स्वामिशासन-मुल्लङ्घितुं न शक्यम्। ततः कथं मुञ्चेयम्?" इति। पुनः पुनश्चोक्तं मया दीनदीनम् "अयि अहं जातिस्मरो मुनिरस्मि। हतविधिना शप्तः शुकोऽस्मि। मुञ्च मां पुण्येन युज्यसे। कल्पाणं भूयात्ते। मम प्रियङ्करो भव क्षेमङ्करश्च" इति।

स "त्वं किं नु मुनिः ? किं नु राक्षसः? किं नु वा पिशाचः? मम किं तेन? अस्मद्वाटिकां नयामि" इति वदंश्चण्डालवाटिकायां मातङ्गकन्याया गृहं निनाय माम्।

गृहं तन्नितान्तं जुगुप्साकरमस्ति। तथाहि - एकत्रास्थ्नां सञ्चयः। अन्यत्र पूतिगन्धिः कृमितुन्दिलो मांसराशिः। यो विदारयति नासापुटे। परत्र रक्तस्रावाः, मक्षिकाः, मशकाः, कीटाश्चोत्पतन्ति विषमुखाः। खाट्कृत्य निष्ठेवनीयः स प्रदेशः। पश्यस्तद् गृहं गता इव मम प्राणाः।

ततस्स बालको मां दर्शयित्वा मातङ्गकन्यायै न्यवेदयत् अम्ब! "अत्रायं वैशम्पायनशुकः। त्वदाज्ञामनुसृत्य गृहीतोऽयम्" इति। सा मां वीक्ष्य स्निग्धाभ्यां बाष्पपूर्णनेत्राभ्यां मुहूर्तं वक्षसि कृत्वा ततो बबन्ध पञ्जरे। तदाऽजनि मम हृदि महान् शोकः। हन्त! मुनिरप्यहं मातङ्गकन्याया अद्य क्रीडाशुकोऽस्मि। प्राक्तनजन्मस्मृतिदानेन जाबालिर्मय्यपराद्ध इति मन्ये। धिक्कष्टम्। ब्राह्मणेन मया चण्डालवाटिकायां वस्तव्यं भवति। भवतु। निरशनव्रतेन मया त्यज्यन्ते प्राणाः। न भुञ्जे निहतोऽपि न व्याददामि मुखम्। एवं कृते व्यथिता सा कदापि मारयेद्वा मुञ्चेद्वा माम्। अस्त्वन्यतरत्। उभयमपि मम प्रियम्। इति निश्चित्य स्थितं मयाऽनश्नताऽपिबता च जलम्।

तदा सा चण्डालकन्यका प्रियवचनैर्मां सान्त्वयन्ती बभाषे। यथा - "भुङ्क्ष्वेमानि

In Public domain. Digitization Muthulakshmi Research Academy

फलानि । पिब सलिलानीमानि । कुत एवमीक्षसे माम्? कुतोऽवलम्बसे मौनं भङ्क्त्वापि मौनिव्रतम् । अस्तु तद्यत्त्वं जातिस्मरो मुनिः । अद्य त्वमर्हसि तिर्यग्जात्युचितमेवाहारम् । कुतस्ते भक्ष्याभक्ष्यनियमः?

आपदि नास्ति खलु तादृशो नियमः । विश्वामित्रेणाशितं श्वमांसमस्मज्ञात्यानां हस्तात् । अनश्नन् द्वित्रैर्दिनैरुपोषितः कृशितो मुमूर्षुरसि । वत्स! शृणु मम वचनम्। अशान फलानीमानि । पिब मधुराणि जलान्यमूनि ।"

एवं चण्डालजनोचितेतराणि स्त्रीजनोचितानि वचांसि तस्याः श्रुत्वा साश्चर्यमचिन्तयम् "नैषा मातङ्गकन्या । मयेवानयाप्यत्र केनापि पापकर्मणा लब्धजन्मना भवितव्यम् । अथवा मदर्थमेव किं नु जाता? जननीव मामुरसि सन्धत्ते । पश्यति चक्षुषा स्निग्धेन । एवं सान्त्वयति मुहुर्मुहुर्वत्सला । अतोऽनुसराम्यस्या वचनम्" इति।

विचिन्त्यैवं मया भुक्तानि फलानि । पीतानि चाम्बूनि तया दत्तानि । प्रत्यहमेवमेव सान्त्वयन्ती सा मां भोजयन्त्यास्ते । वेत्तुं तस्या याथार्थ्यं प्रार्थिता मया । किन्तु नैव प्रकाशितं तया । चिन्तयस्तां मम मातरमेव पोषितस्तया कालमनयम् ।

कदाचन प्रातः प्रबुद्ध्य मम पश्यतस्सा चण्डालवाटिकाग्रहार इव दृष्टा । स्थितोऽहं कनकपञ्जरे । अत्रानीतोऽस्मि । सैषा भवतः पुरतोऽस्ति । न मया ज्ञायते कैषा? कुतो मामियन्तं कालं पुष्णाति स्म? कुतोऽद्य मामत्रानीतवती इति ।

वैशम्पायनशुकेनोक्तमाकर्ण्य कथां शूद्रकः शय्यामन्दिरात् प्राङ्गणमागत्याह्वाययामास मातङ्गकन्याम् । आगत्य प्रसारयन्ती स्वतेजसा चन्द्रिकां दिशास्वधरीकृतवीणानादेन स्वरेण सा बभाषे ।

"रोहिणीरमण! कलानिधे! चन्द्र! त्वमसि कादम्बरीलावण्यमुग्धस्त्यक्तशरीरश्चन्द्रापीडः । कामिति मां चिन्तयसे? अस्य दुर्विनीतस्य जननी श्रीः । एनं दृष्टवतस्तव प्रबुद्धा स्यात् प्राक्स्मृतिरित्यानीतोऽत्र । एनं स्वाज्ञामुल्लङ्घ्य मोहपारवश्येन पलायमानं ज्ञात्वा दिव्यचक्षुषा श्वेतकेतुर्विशंक्येतोऽप्यस्य दुर्दशां सन्दिदेश माम् । तदनुज्ञया चण्डालकन्यकारूपिण्या मया चण्डालदारकेण ग्राहितोऽयम् । यावद् भुक्तं गुरुशासनोल्लङ्घनफलं तावन्मदधीनः स्थितः । समाप्तेऽस्य पित्रा क्रियमाण आयुष्कामयागे द्वावपि युवां शापान्मुक्तौ भवतः । अद्ययावत्तदर्थे निरीक्षेऽहम् । स समाप्तोऽद्य ।

In Public domain. Digitization Muthulakshmi Research Academy

तदाज्ञयैव तव विदितं कृतं पूर्ववृत्तम् । अद्य युवां द्वावपि त्यक्त्वा सद्यः कृतके मलिने इमे शरीरे लब्ध्वा सहजे मनोज्ञे पूर्वशरीरे सङ्गच्छेथां प्रियाभ्यां स्वीयाभ्याम्।

इत्युक्त्वा देवी सा सहसोत्पत्य क्षणं विद्युदिव द्योतमानान्तर्दधे । विलोक्य तां विस्मिताः सर्वे ।

सद्यः शूद्रकस्य मनस्युदस्थान्मोहप्रभञ्जनः । येन राज्यकार्य पराङ्मुखः स्मरानलदग्धः कतिपयैर्दिनैः प्राणैर्वियुक्तः । तदैव शरीरं विससर्ज वैशम्पायनशुकश्च। मृतस्य शूद्रकस्य शरीरस्थं जीवात्मकं ज्योतिर्गत्वा सद्यः प्रविवेश चन्द्रापीडशरीरम् ।

एवं स्थितेऽत्र तत्राच्छोदसरस्तीरे कादम्बर्या सेव्यमाने चन्द्रापीडशरीरे वसन्तोऽवततार । तदा विलिप्य चन्दनरसेन भर्तृः शरीरमलञ्चकार कण्ठं पुष्पहारेण। तापसवृत्तिरपि सा तथालङ्कृतपतिदर्शनेन मोहवशा तस्य प्रदेशस्यैकान्ततयाश्लिष्टा गाढम् । प्रविष्टं जीवजोतिस्तत्समकालमेव चन्द्रापीडशरीरम् ।

तदा चन्द्रापीडस्त्यक्त्वा शिलाशय्यां प्रबुद्ध इव स्वापात् जृम्भित्वा विस्फार्य नेत्रे सञ्चाल्प शरीरावयवानि विलोक्य कादम्बरीं स्मयमानो मृदुमधुरमभाषत ।

"प्रिये! त्वं खलु जाता सुधाब्धिसम्भूतेऽप्सरः कुले । ततो हि तव करस्पर्शेन जीवितोऽस्मि । पुण्डरीकशाप एव कारणमस्या दुर्दशायाः । तव विरहादेव हेतोरद्य शूद्रकशरीरत्यागोऽपि । इतः प्रभृति शाधि! त्वं मम चन्द्रलोकमिमं लोकञ्च ।

पश्यात्र । प्रियसख्यास्तव महाश्वेतायाः प्रियः पुण्डरीकः पितुस्तपोमहिम्ना लब्धपूर्वशरीरः कपिञ्जलस्य हस्तं गृहीत्वावतरति मदीयाल्लोकात् । मया सह चन्द्रलोकं गतायास्तव नयनोत्सवं करिष्यति पत्रलेखा । कां नु चिन्तयसि ताम्? सा चन्द्रलोकादवतीर्णा मम सहचरी रोहिणी । मा चिन्तां कुरु तदर्थे इति ।

वचोभिस्तस्य कादम्बरी महतानन्देन गत्वा द्रुतपदैराश्लिष्य महाश्वेतां दर्शयित्वा गगनादवतरन्तं पुण्डरीकं तामभिननन्द । अवतीर्णो नभसः पुण्डरीकः स्मितमुखः उपासरत्प्रियां महाश्वेताम् ।

ततः कादम्बरी विरज्य तपोवने मुनिवृत्तिमाश्रिताभ्यां विलासवतीतारपीडाभ्यां स्वपितृभ्यां च व्यसृजद्भटांस्तेन शुभोदन्तेन । वृद्धौ पितरौ समागत्य पुत्रामाशिश्लिषतुः प्रीत्या । चन्द्रापीडो जानन्नप्यात्मानं चन्द्रमेव प्रणनाम तौ भक्त्या पुत्रभावेन । तथैव

In Public domain. Digitization Muthulakshmi Research Academy

प्रणिपपात च शुकनासस्य चरणौ च ।

किमेषा माया ब्रह्मणः? अथवा तपः प्रभावः श्वेतकेतोः? आत्मानमुपसरन्तं पुण्डरीकं साभिलाषं पश्यन्त्यां महाश्वेतायां शुकनासस्तं निजपुत्रं वैशम्पायनमेव पश्यन् मुमुदे । पुण्डरीको यद्यपि मुनिर्मनसि शुकनासस्य पुत्रोऽहमिति विचिन्तयन् प्रथमे तमभिवाद्य ततो मातरं मनोरमां च ववन्दे ।

आत्मानं प्रणमन्तं चन्द्रापीडं तातस्तारापीडो गाढमाश्लिष्य हर्षाश्रुभिस्तं सिक्त्वाऽब्रूत "तत्सत्यमेवास्तु यत्त्वं शापवशान्मद्गर्भाज्ञातः त्रिस्सत्यमिदं त्वं लोकपालोऽसि" इति वदन् विप्रतीपं गृहीत्वा तस्य पादौ मामेति प्रतिषिध्यतेऽपि समर्प्य तस्मै चन्द्रापीडाय राज्यं प्रयातस्तपोवनमेव ।

हेमकूटान्महाश्वेताकादम्बर्योः पितरावागत्य सपरिवारमतिवैभवेन तयोर्द्वयोर्युगलयोश्चक्रतुः पाणिग्रहणमङ्गलोत्सवम् ।

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

श्रीवेङ्कटेश्वरवचनशतकम्

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्रीवेङ्कटेश्वरवचनशतकम्

1

भगवन् ! श्रीवेङ्कटेश्वर ! मम देहस्तव मन्दिरम् । मदीयं ज्ञानं तत्र दीपः। नमस्कारायोत्थितौ हस्तौ मम ते मन्दिरमकरतोरणम् । मम भक्तिरेव सिंहासनम् । मम कटाक्षास्ते पुष्पमालाः । मम स्तोत्राक्षरारवास्तव भेरीघण्ठारावाः । मम पुण्यराशिरेव तव नैवेद्यताम्बूलादिकम् । मदीयः सात्विकगुण एव ते धूपः ।

त्वं देवः । अहमर्चकः । प्रीतो ममार्चनैर्मां पाहि ॥

2

देव ! जेजीयन्तां भवदायुधाः । शुभं भूयात्ते वाहनस्य । भद्रमस्तु तव परिवारस्य । जयन्तु तव कल्याणगुणाः । कल्याणमस्तु ते देवीनाम् । पुष्पाञ्जलिस्ते मूर्ध्नः । शिरोऽञ्जलिस्ते मूर्तेः । नमो नमस्ते श्रीवत्सकौस्तुभादिभ्यः । प्रणिपातास्ते पादपद्मयोः । जीवातुर्भवांश्चतुर्युगधर्माणां सकलजन्तूनां ब्रह्मादिदेवतानाञ्च । तोष्टूये भुजाबलं तव । शाश्लाघ्ये ते महिमानम् ॥

3

भगवन् ! दिदृक्षते हृदयपद्मं मम रविमण्डलमध्यवर्तिनं भवन्तम्। स्पृहयतो मम नयनकैरवे भवद्दिव्यमुखचन्द्रदर्शनाय । जरीहृष्यते मनोमयूरो मे त्वां नीलमेघच्छायं दृष्ट्वा । उन्मुखीभवति वदनशुक्तिर्मम ते पादतीर्थस्वातिवर्षजलाय । लालसे श्रुती मम तव कथायै सर्पाविव गीताय ।

त्वं परात्परः । अहं प्राकृतः । मावादीः कथं योग इति । चैतन्यमसि प्रकृतेस्त्वम् । प्राहुः "अजानदप्यक्षि जानाति स्नेहं स्वगर्भः" इति । स्नेहेनानेन त्वय्यनुरक्तानि ममाङ्गानि सर्वाणि ॥

4

नारायण ! श्रीवेङ्कटेश्वर ! सिद्धो मे सर्वतीर्थाभिषेकस्तव पुष्करिणीस्नानेन। सेवितास्ते मूर्तिसेवयैवा*ष्टोत्तरशतं तिरुपतिमूर्तयः । लब्धं तुलादानसुवर्णदानफलं भवते समर्पितया वराटिकया । आचरितानि यज्ञादिकर्माणि सर्वाणि भवत्पादार्चनेन। चरितं बहुविधं मन्त्रानुष्ठानं भवन्मन्त्रपारायणेन । अधीता आम्नाया भवन्नामसङ्कीर्तनेन।

In Public domain. Digitization Muthulakshmi Research Academy

प्राप्ता तपस्सिद्धिर्वैष्णवाचारैः । वहाम्यहं मुद्रा भवदीयाः। अधिवससि मम हृदयम् । किमस्त्यन्यदपेक्ष्यम् ? ॥

5

भगवन् ! नाहमसेविषि भवन्तं दृढाभक्तिः । धृता विनोदायोर्ध्वपुण्ड्राः। लब्धं मया परस्य गीतस्यानुकुर्वता तव सङ्कीर्तनम् । सकृद् दृष्टा मूर्तिस्ते देवकुलेऽतर्कितं गत्वा मित्रैस्साकम् । भुक्तस्तवप्रसादो रुचिजिज्ञासया ।

घुणाक्षरन्यायेनेमानि कर्माणि भूतानि तव दास्यानि । त्वमकारणबन्धुः। कृतोऽहं तव पादभक्तः धन्योऽस्मि ॥

6

देव ! कल्पते मोक्षाय तव निरन्तरध्यानम् । ध्यानाय प्रशान्तं मनः। प्रशान्तमनसे पञ्चेन्द्रियनिग्रहः । निग्रहाय शरीरशोषणं तपः । तपसे वैराग्यम् । वैराग्याय निस्सङ्गः।

कलियुगे कति वा सिध्यन्त्येतेषु सर्वेषु? दयसे हि शरणागतस्य तव नामसङ्कीर्तयतो जनस्य ॥

7

भगवन् ! अगदङ्कारो भवानार्त्तानां, गरुडध्वजसंसारसर्पदष्टानां, सूर्यनारायणोऽज्ञानतिमिरस्थानां, चक्रायुधः पापग्राहग्रस्तानां, गङ्गाजनको दारिध्र्यदावानलदग्धानां, वज्रकवचो विपदशानिघातानां, प्राङ्गणनिधिर्भक्तानाम् ।

कत्येवं गणयामस्तव कल्याणगुणान्? किं गणेयानि तारकाण्याकाशे? तरङ्गाः समुद्रे? रत्नानि मेरुशैल? सिकताकणाः पुलिने? यथाशक्ति गणयामः कतिचिदेव। प्रसीद ॥7॥

8

देव ! किमिति कथयामि तव प्रभावं लोकोत्तरम्? जातो हि विधाता तव नाभिकमले । यः प्रभवति नैव किल वेदितुं तव महिमानम् । ब्रुवते किल वेदास्सर्वे तव महत्ताम् । न जानन्ति ये तव मूर्त्यवधिम् । रविचन्द्रौ नेत्रे ते । ये न प्रभू दिव्यं ते तेजः सन्दुष्टम् । वर्णयन्ति शतमुखैर्भवन्तं मुनयः । न तेऽपि निर्यान्ति मायाजालात्ते।

In Public domain. Digitization Muthulakshmi Research Academy

चराचरं जगद् भवत्सृष्टम् । नैतत्स्वरूपं तव कथयति । कियती मे शक्तिः? कियानहम्?
शरणं तव चरणम् !!! भगवन् ! प्रसीद । ।।

9

भगवन् ! अध्यास्ते भवान् सर्वं जगत् । अतस्तेऽहं सन्निहित एव सन्ततं यत्र कुत्रचित् सञ्चरन्नपि । भजाम्येव भवन्तमश्रान्तम् । यतस्त्वं भवसि सर्वलोकनाथः । अनवरतमहं निषेव एव भवन्तम् । यतस्सर्वाणि रूपाणि भवानेव । ध्यायाम्येवाविरतं भवन्तम् । यतस्त्वमन्तरात्माऽसि मम। सततमहं तव प्रसादभोक्तैव । यतो भवद्दत्त एव सर्व आहारः । भवत्पूजनमेव मत्कृता गोरक्षावाणिज्यादयोऽपि । यतस्तेऽपि कल्पन्ते भवतस्सेवायै । भवेयमुत्तीर्णो यतस्त्वं मामजीजनः । अपि च भवान् विश्वपिता ।

मा मा विस्मरेममर्थं । भवान् सूत्रधारः । अहमस्मि तव हस्तगतां *वर्ध्रिका। गण्यतां ममैका निवेदना यथा दशसहस्राणि ।।

10

भगवन् ! सिध्यति सालोक्यं ममास्मिन्नेव लोके, सामीप्यं हृदयकुहरे सारूप्यं ध्याने, सायुज्यं निद्रायाम् । अकृथाश्शरणागतं मां निर्मुक्तपापम् । येन जीवन्मुक्तोऽस्मि। अविरहस्थित्यावयोरपरोक्षानुभूतिश्च लब्धा । कृतार्थोऽस्मि ।।

11

भगवन् ! किमस्त्यन्यत्त्वत्तः? त्वय्येव मूर्तित्रयं, द्वादशादित्याः, एकादशरुद्राः, नवब्रह्माणः एकोनपञ्चाशन्मरुतः अष्टौ वसवः, अष्टदिक्पालकाः, मुनयः, सिद्धगन्धर्वकिन्नरादयः, अणिमाद्यैश्वर्याणि, चतुर्दश भुवनानि, सप्तकुलाचलाः, अष्ट दिग्गजाः, सिन्धुगङ्गादिदिव्यतीर्थानि । परमं पदम् ।

त्वं यत्र सर्वं तत्र । भजतस्त्वां मम सर्वं सम्पन्नम् ।।

12

भगवन् ! "आणोरणीयांस्त्वं महतो महीयांश्च" । मूलमसि मूर्तित्रयस्य। साक्षी चराचराणाम् । त्वमेक एव किन्तु बहुरूपः बहुनामा च । सगुणो निर्गुणाश्च। नैवास्माभिस्साक्षाद् दृश्योऽसि ।

प्रार्थयामि कृपया साक्षाद्भूयास्मानुद्धर ! ।।

In Public domain. Digitization Muthulakshmi Research Academy

13

देव ! विद्यन्ते लोके बहुविधा विद्याः । न तास्समास्तव सङ्कीर्तनेन । अस्ति योगः । न स त्वयि भक्त्या तुल्यः । सन्ति मन्त्राश्च बहवः । न ते यच्छन्ति फलं यथा ते तिरुमन्त्रः । वर्तन्ते देवास्त्रयस्त्रिंशत्कोटिः । न ते प्रभवन्ति यथा भवान् ।

न त्वया दत्तो वरो भवन्ति विफलः । ध्रुवाणि पदानि त्वत्पदकिङ्कराणाम् । भक्तिमार्ग एक एव भवत्साक्षात्काराय । अन्ये तु मृगतृष्णावारीणि । खद्योतरोचींषि। शुक्तिरजताः ।

अपसृत्य मार्गानन्यान् समाश्रयन्ते ये तव श्रीपादौ धन्यास्ते ॥

14

भगवन् ! केशवः, नारायणः, माधवः, गोविन्दः, विष्णुः, मधुसूदनः, त्रिविक्रमः, वामनः, श्रीधरः, हृषीकेशः, पद्मनाभः, दामोदरः, सङ्कर्षणः, वासुदेवः, प्रद्युम्नः, अनिरुद्धः, पुरुषोत्तमः, अधोऽक्षजः, नारसिंहः, अच्युतः, जनार्दनः, उपेन्द्रः, हरिः, श्रीकृष्णः, इत्येतानि चतुर्विंशतिर्नामानि पापाटवीकुठाराः, ज्ञानिनां सिद्धिमन्त्राः, भक्तरसनाभूषणानि, अर्थिनामभ्युदयकारणानि, इहपरलोकयोः कल्पवृक्षकाम-धेनुचिन्तामणयः ॥

15

श्रीनिवास ! वितरसि बदरीनारायणादिसर्वमहाक्षेत्रसन्दर्शनफलं भवद्दास-पादवन्दनमात्रेण । ददासि वेदशास्त्रपुराणाध्ययनप्राप्यफलं नारायणनामस्मरणेन । यच्छसि नानायज्ञाचरणलभ्यफलं भवत्पादयोस्तुलसी-दलार्पणेन । ददासि सर्वदानफलं दासोऽहमिति प्रणमते भक्ताय ।

एवं भक्तसुलभो भवान् । न ते भक्तो भवत्यवहीनः । उक्तं भवता यथा "न मे भक्तः प्रणश्यति" ॥

16

श्रीजनार्दन ! श्रीभूनीलासमेत ! शङ्खचक्रगदाशार्ङ्गायुध ! चतुर्भुज! श्रीकौस्तुभश्रीवत्सशोभितवक्षः ! पीताम्बर ! मणिकिरीटकुण्डलाभरण ! वैजयन्ती-वनमालालङ्कृत ! पुण्डरीकाक्ष ! अनेकबाहूदरशिरः पाणिपादोरुजङ्घावयव!

In Public domain. Digitization Muthulakshmi Research Academy

विश्वरूप! अनन्तगरुडविष्वक्सेनादिनायक ! सनकसनन्दनसनत्कुमारसनत्सुजातसंलाप! नारदगानप्रिय ! नीलमेघश्यामल ! चतुराननजननाभीसरोज ! गङ्गानदीकारण-पादपद्म! भक्तवत्सल ! वेदोद्धारक ! वैकुण्ठालय ! असुरशिक्षक ! अमररक्षक ! जगन्नाथ ! जय !!! जय !!! मुहुर्मुहुरभिवादये, प्रणमामि, नौमि । अवधारय वेङ्कटेश्वर ! अवधारय ! ॥

17

भगवन् ! आशासे जनान् वन्दमानान्मामाश्रयति भवान् निश्चप्रचं मम रसनामिति । नाहमीशे तत्फलदानस्य । अभिवाद्ये परैरहमध्यास्ते भवान् मम हृदयमिति हेतोः । न तु महानुभाव इति । चरामि तव दासानां मध्येऽन्यतमः । न तु तपसाधिक इति ।

अकिञ्चित्करोऽहं विना त्वया । दीयतां करावलम्बः । उद्धियताम्। ॥

18

देव ! ध्यायामि बहुशस्ते मूर्तिम् । स्तवीमि पुनः पुनर्वाचा । प्रणमामि मुहुर्मुहुः पाणिभ्याम् । प्रदक्षणीकरोमि शतं वारान् पादाभ्याम् । जानाम्येतानेवोपायान्।

नाहं शक्नोमि प्रीणयितुं बहुविधैः श्रौतैः कर्मभिर्भवन्तम्, नाऽपि स्मार्तैश्चान्द्रायणादिव्रतैः, नाऽपि च पौराणिकैस्तीर्थयात्रादिभिः, तथाप्यभिलषामि बृहत्फलं त्वत्तः ।

अस्मि "प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः" । प्रसीद मयि भगवन्!॥

19

भगवन् ! देवकुलेषु सदनेषु च सर्वेषां दारुलोहमृण्मयमूर्तिधरो यथाशक्त्यर्चितो ददास्यभीष्टानि भक्तेभ्यः । कियांस्त्वं भक्तानां सुलभः? किमेष प्रकारस्तवोदार-गुणविलासः? किमेषा ते प्रकृतिः? दीनरक्षणाय बद्धकङ्कणोऽसि? बाढं ! बाढं ! सफलानि जन्मान्यस्माकम् । पूर्णा मनोरथाः ॥

20

रामनाथ ! अभूवं विमुखस्तेऽहं प्रथमे । मूर्खतमोऽहम् । अनुकम्पया-ऽहैतुकार्षीस्त्वं मां त्वदभिमुखम् । पुराऽतितामसः । सात्विकोऽस्यधुना । पुराऽतिकोपनः।

In Public domain. Digitization Muthulakshmi Research Academy

अस्म्यधुना शान्तः । सरागः पुरा । विरागोऽस्मीदानीम् । पूर्वे केवलैहिकभोगपरः । अद्यामुत्रिकभोगपरस्तव भक्तोऽस्मि । अविदन्नेवाहमित्थम्भूतोऽस्मि । यदर्थे जनास्त्वां प्रार्थयन्ति तदनायासेन लब्धं भवदनुग्रहेण मम । किमन्यदस्ति प्रार्थनीयम् ॥

21

श्रीवेङ्कटेश्वर ! छिन्द्यां पापानि भवन्नामोच्चारणेन मां चेत्परिवृणीयुः। निगूहेयमात्मानं भवत्पादयुगान्तरे विषयाश्चेत् पीडयेयुः । दूरीकुर्यां पुराकृतदुष्कर्मफलान्याक्रोश्योच्चैर्भवदीयोऽहमिति । भीषयेय यमकिङ्करान् सैन्दर्श्य मम भुजाङ्कितशङ्खचक्रलाञ्छनानि । विच्छेदयेयं संसारपाशांस्तव कथाऽसिपत्रेण । प्रपद्ये शरणं तव चरणं मां चेद् भ्रमयेन्माया ।

पाहि मां प्रपन्नं भगवन् ! ॥

22

परमेश्वर ! यदि रिरक्षिषुर्भवानकिञ्चित्करो ब्रह्मशापः । कृतो भवता दीर्घायुर्ध्रुवः। नहि प्रभवति हन्तुं ब्रह्मास्त्रम् । परीक्षिद्रक्षितः । नेष्टे सम्मोहस्य ब्रह्ममायाऽपि । गोंपायिता भवता गोवत्सा गोपालकाश्च । न शक्नोति मृत्युश्च । प्रत्यानीतो गुरोः सान्दीपिनः पुत्रो यमहस्तात् न कल्पते दुःखाय पापमपि अनुगृहीतोऽजामिलः ।

भवसि बलवत्तरस्सर्वेभ्यश्च । अकुतोभयास्ते भक्ताः ॥

23

श्रीमाधव ! प्राहुर्बुधा यथा यान्ति स्वर्गमजा, मूढाः स्वपालकैस्सह समर्पिता यज्ञेषु देवताभ्यः । राज्यलोभेन व्यतिहत्य युद्धेषु मृता वीरास्सूर्यमण्डलं भित्त्वा व्रजन्ति दिव्यपदम् । गच्छन्ति स्वर्गं पुरन्ध्र्यः कामहता आश्लिष्य पत्युः शरीरं प्रविश्य चिताग्निम् ।

किं कथयामि भाग्यं तेषां ये ज्ञानसम्पन्नाः, भवदीयशङ्खचक्रमुद्राङ्किता, भवत्तुलसीदलोपेतश्रीपादतीर्थपानेन क्षालितपङ्काः, भवत्प्रसादं भुञ्जानाः, तिरुमन्त्रस्य, जपितारः, श्वेतमृत्तिकाश्रीचूर्णधारिणः, धृततुलसीमालाः, भवत्पूजातत्पराः, श्रीवैष्णवाः? ॥

In Public domain. Digitization Muthulakshmi Research Academy

24

हृषीकेश ! त्वमसि भर्ता । कलत्रं तव श्रीवैष्णवः । शुल्कधनं तस्य त्वदीयोऽनुग्रहः । हस्तकङ्कणं तस्य नन्तुं भवते समुन्नतयोः करयोर्नमस्कारः । मङ्गलसूत्रं तस्य श्रीचूर्णोर्ध्वपुण्ड्रः । पातिव्रत्यं तस्यानन्यभक्त्या त्वत्सेवनम् । कुलाचारस्तव दासानुदासैस्सहवासः । गार्हस्थ्यं तस्य तव कैङ्कर्यम् । सुखानुभवस्तव मूर्तेस्सेवनम् । सौन्दर्यं तस्य तव मुद्राधारणम् । आचार्योपदेशास्तस्य सम्पदः ॥

25

श्रीगोविन्द ! कथं जगति प्राणिनः प्रभवन्ति जेतुं रागद्वेषौ ? श्रूयते किल युधिष्ठिरस्सशरीरं स्वर्गं प्राप्तोऽसूयति स्म तत्रत्येभ्यो दुर्योधनादिभ्यो भुञ्जानेभ्यो दिव्यान् भोगान् । कियानहम् ? विपाश्यास्मत्पञ्चेन्द्रियाश्वान् दुर्विषयेषु भ्रमयतस्तव क ईष्टे?

शरणागतस्त्वां कीर्तयामि । प्रसीद ! ॥

26

पुण्डरीकाक्ष ! निधाय भवतस्सर्वलोकरक्षासमुद्यतस्य दिव्यमूर्तिहृदयकुहरे निर्विशाम्येकान्ते भवता संलापगोष्ठीम् । शङ्के कल्पत इदं तव कार्यान्तरायायेति । नैवान्तरायः । यतस्त्वं विश्वतोमुखः । चतुरोऽसि संलापं कर्तुं सर्वैस्समकाले । परिपूर्णोऽसि । अधिवससि सर्वत्र समकाले । अमेयमहिमाऽसि । अनन्तशक्तिरसि। प्रणमामि मूर्ध्ना भवते महते ॥

27

चक्रपाणे ! नाहं चिन्तयामि त्वां बहुशः । किमिति विचिन्तयसीति। नाहं क्लिश्नाम्यात्मानं तपसान्तर्यामिनस्ते पीडेति । नाहमसकृदाकारयामि भवन्तम् । विसृज्य लोकक्षेमङ्कराणि कार्याणि सर्वाणि ससम्भ्रममागच्छसीति। नाहं शृणोमि बहुकृत्वस्तव कथाः । रहस्यानि तव प्रकाशेरन्निति । नाहं सिषेविषेऽश्रान्तं भवत्पादौ । अतिपरिचयादवज्ञेति ।

विदित्वैतत्सर्वं भगवन् ! मयि प्रसीद ।

In Public domain. Digitization Muthulakshmi Research Academy

28

पद्मनाभ ! प्रपन्नानां भवद्दासश्रीपादतीर्थाभिषेक एव पुण्यनदीस्नानम् । कालत्रय आचार्यवन्दनान्येव सन्ध्यावन्दनानि । अभ्यागतश्रीवैष्णवोपचार एव गायत्रीमन्त्रजपः। पूर्वाचार्योवतस्वरूपग्रन्थानुसन्धानमेव वेदाध्ययनम् । आर्तानां श्रीवैष्णवमार्गोपदेश एवातिथिसत्कारः । भवदाराधनमेव यज्ञः ।

इत्थं वेदोक्तकर्मानुष्ठानं सिद्धम् ।

29

जगत्प्रभो! मूर्तिं तव दिध्यासोर्मम हृदयं प्रविशन्ति शुनकास्सूकराः खराः कान्ताश्च । विरम्य ध्यानान्मम पठितिनः पुराणेषु मुखे लुठन्ति । मुहुर्मुहुस्ताटका, शूर्पणखा, विराध, कबन्ध रावणकुम्भकर्णादिनामानि । उपरम्य पुराणपाठाञ्जपनिविष्टस्य मानसं ममाविशन्ति जृम्भा, निद्रा जडिमा च । विसृज्य जपं चरन्तं तीर्थयात्रया मार्गेऽभियन्ति चोरव्याघ्रादयः । हतोऽस्म्यन्तरायपरम्परया । कथं केन योगेन करोमि त्वां मदधीनम्? आवेद्यतां निरुपप्लवो मार्गः ॥

30

दामोदर! विचार्यमाणे कस्य कः स्याद् बन्धुः? ऋणसम्बन्धेन पुत्रमित्रकलत्राण्युत्तमर्णाः कतिचिदधमर्णाश्च भवन्ति । ऐहिकभोगसाधनान्येतानि । स्वामिन्! दासास्ते मोक्षबन्धवः । उत्तारयन्ति येऽस्मान् संसारसागरम् ॥

31

कमलाक्ष ! नाहं त्यक्तव्यो जड इति । पाषाणः काष्ठञ्च त्वष्ट्रा देवतामूर्तिः कृतमर्च्यते सर्वैः । शुकश्शिक्षितः स्फुटं भाषते । जडो वृक्षो दोहदेन फलपुष्पसमृद्धः स्यात् ।

भगवन् यदि मयि प्रसीदसि प्राज्ञः स्याम् । प्रभवेयं तव दास्याय ॥

32

त्रिविक्रम! मया समुत्तीर्णशैशवेन यूना "महतोऽस्य जगतः कर्त्रा केन भवितव्य"मिति विचिन्त्य विज्ञाय पुराणैस्तव वैभवं तत्र तत्र गवेषितः। नहि सन्दृष्टस्त्वं कुत्रापि । तत आरुह्य वेङ्कटाचलं निकषा गारुडस्तम्भं विलोक्य वराणां

In Public domain. Digitization Muthulakshmi Research Academy

दातारं, भक्तेभ्यो, दृष्ट्वा च प्रत्यक्षं पापनाशनतीर्थे स्नातानां क्षालितैः पापैः पङ्किलानि जलानि निरीक्ष्यनिर्विपांस्तद्गिरिचरान् वृश्चिकसर्पप्रमुखजन्तूंश्च चित्रीयमाणो विस्रब्धोऽस्मि भवान् शैलमेनमध्यास्त इति ॥

33

वैकुण्ठालय ! अवधीर्य भवन्तमन्तर्यामिनं विधिनिषधावुपदिशन्तं भूत्वा गृहमेधी वत ! पतितोऽस्मि संसारकूपे । कृतानि प्रभोस्ते पुरत एव महान्त्यवद्यानि पापानि । अजानन् गोप्तारं भवन्तं चरन्तं मम पुरतः पश्चात् पार्श्वयोश्च चकितोऽस्म्येकाकीति ।

अपराद्धोऽस्मि भवतः । प्रणामान्ताः खल्वपराधा दासानाम् । मर्षय ! भगवन् ! मर्षय ! ॥

34

जगत्पते ! मायया ते विवेकभ्रष्टं व्यसनासक्तं मां कुरु भगवन् ! मुक्तं "किङ्करोऽसौ तपस्वी मदीय" इति । आशापाशैराकृष्यमाणं भ्रमन्तं परितः "परिचितचरो ममेति" विपाशय । पौनः पुन्येनाभिहन्यमानमरिषड्वर्गेण यच्छ ! शरणं "मम मुद्राधरोऽसाविति" । पुराकृतकर्मफलैर्पीडितं विमोचय "मम मङ्गलपाठकोऽय" मिति ।

निवेद्यते पुनः पुनर्विदित्वापि त्वामनाथनाथम्, आर्तशरण्यं, दयासमुद्रं, अव्याजबन्धुं ! त्वं ! मदीयः । अहं त्वदीयः ॥

35

जगन्नाथ! पुरा भवान् पार्थाय भगवद्गीतामुपदिश्याददर्शद् विश्वरूपम् अदास्तस्मै दिव्यं चक्षुस्त्वम् । तस्मिंस्तव पक्षपातः । यतस्स ते भगिनीपतिः । कथमस्माभिर्लभ्यते तद्विश्वरूपसन्दर्शनम् ? कथं सम्पादयामस्तवानुग्रहम् ? आम् । ज्ञातं पुरा किल जातः किरातो महर्षी रामनामस्मरणेन । शोकान्मुक्तश्शरणमापन्नो विभीषणः ।

अस्माकमप्ययमेव मार्गः ॥

In Public domain. Digitization Muthulakshmi Research Academy

36

श्रीकेशव ! नास्त्यकृतं पापं मया । नैव निर्यातितानि देवर्षिपितृणानि अभिनिविष्टोऽस्मि दुरारम्भेषु । न जाने चित्रगुप्तेन किं किं लिख्यते । न वेद्मि यमकिङ्करैः किं कर्तुं व्यवसितम् । नावगच्छामि दण्डः कीदृशः कालेन विधास्यये ।

बिभेम्येभ्यः स्मृतमात्रेभ्यः । भगवन् ! सर्वथाऽपराद्धोऽस्मि । शरणं ते चरणम् । शाधि मां त्वां प्रपन्नम् ॥

37

श्रीधर दुष्टे पापपुरुषे मामनुपदं धावमाने ते शरणं प्रपन्नोऽस्मि। सद्यस्तेऽभयदानपुरुषस्तमभियातः । अभूद्रणो दारुणस्तयोरुभयोः ।

पपातारिषड्वर्गतारागणः । तापत्रयाशनयश्च क्षुब्धाश्चिन्तासागराः। चलिता दुर्गुणादिशाः । दुराशाशैला निलीनाः । पलायाञ्चक्रे पापपुरुषः । व्यजेष्टाभयदानपुरुषः।

शुभोदन्तमिमं निवेदयितुं समागतोऽस्मि ॥

38

श्रीहरे ! देवराज ! चारोऽहं तव । किमपि निवेदयितुमागतोऽस्मि। अस्ति शरीरं नाम नगरं किमपि । राजा यस्याहङ्कारः । मन्त्री छलः । करितुरङ्गा विषयाः । वीरभटाः पाप्मानः । मनोरथाः पौराः । भोगा भाण्डारः ।

प्रेषितो भवता सह ज्ञानरूपेण तेऽमात्येन विवेकवैराग्यशमदमरूपैर्योधैर्गत्वा तं विजित्य राजानं कुर्यां तव पाददासम् । प्रहिणोतु मां भवान् ।

39

अच्युत ! श्रूयते चित्रगुप्तैर्लिख्यन्ते पापपुण्यानि कृतानि जीवकोटिभिः। न जानामि तैः किं लिख्यते मदीयम् । समर्पितानि भवते पुण्यानि मामकानि । निहितानि मयेन्द्रियाणि यैः कृतं पापं तव पादसन्निधाने। निक्षिप्तं मनश्च त्वयि । उपायनीकृता ते मम भक्तिः । अहमधुना श्रीवैष्णवधर्मा साश्रितोऽस्मि भवद्दासान् । न मेऽवशिष्टा अपराधाः । न किमप्यस्ति लेख्यं चित्रगुप्तैः । भवानेव साक्षी । निवेदितं सकलं यन्निवेदयितव्यम् । पाहि माम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

40

लक्ष्मीधर ! भवता बलवता कृताश्शैलाः प्लुताः सलिलेष्विति । अचीकरद् भवान् कौशलेन वानरै राज्यमिति, अचेतनः पाषाणः कृतस्सचेतन औदार्येणेति । छत्रीकृतो महाशैलस्सत्त्वसम्पदेति । रक्षितोऽभूदार्तो गज इति । अदयथाः सस्या मानभङ्गभिया विलपन्त्या इति, निरवीवहश्च त्वं प्रतिज्ञां प्रह्लादस्येति शरणं भजामि भवन्तम् । तरामि भवसागरम् । नृत्याम्यानन्देन ॥

41

श्रीनाथ ! अक्षैर्दीव्यन् देव्या रुक्मिण्या श्रुतिगतेऽतर्कितं "हा ! कृष्णे" त्याक्रन्दने द्रौपद्या आर्ताया, सद्योऽपास्याक्षान् न किमपि कथयित्वा तस्यै, दधाव भवांस्तत्र तद्रक्षातुरः । आकर्ण्य गजविलापं विहाय नर्मकेलीं श्रीदेव्यास्तत्र गतः । निशम्य प्रार्थना प्रह्लादस्य विदार्य मण्टपशिलास्तम्भमाविरासीत् ।

प्रियतरो भक्तस्सर्वेभ्यस्ते । अहञ्च भवदागमनमपेक्षमाण आसे तथा। अवहितोऽस्मि भवतः पादध्वनिं श्रोतुम् ॥

42

मुकुन्द! बभार त्वां गर्भे देवकी ब्रह्माण्डकोटिगर्भम् । समाशिश्लिषुर्विश्वरूपं गोपिका भवन्तम् । प्रणिनिंसे यशोदा भवन्तं विश्वतोमुखम् । निर्ममे विश्वकर्मा द्वारकानगरं परब्रह्मणस्ते । दारुकस्तव सूतो रथस्य विश्वव्यापकस्य । गर्गश्चकार नाम सहस्रनाम्नस्तव । विद्यागुरुः किल तव सान्दीपो वेदान्तवेद्यस्य ।

कियन्महदद्भुतमिदम् ! मन्ये समुद्दिधीर्षुस्तांस्तान् भवानभूत्तत्तदनुकूलः ॥

43

भगवन् ! दूषितो भवान् बहुशो मया भग्नाशेन क्रुद्धेन । नावतीर्णं वाहनात् सम्पन्मदान्धेन पुरतस्ते देवकुलस्य । चर्वितमविवेकिना ताम्बूलं तव सन्निधाने । अज्ञेन बाल्येऽशिक्षितेन कौमारे, दृप्तेन यौवने, न प्रणिपतिता ते मूर्तिः । अपहसिता आचार्याः, न स्मृतिमायान्त्यपराधाः कृताः । कृतवता भवितव्यं मयाऽनन्तानेवापराधान्।

कथमप्यधुना लब्धः पुण्येन तिरुमन्त्रोपदेशः । धन्योऽस्मि । निर्मृष्टपङ्कोऽस्मि। प्रणिपतामि साष्टाङ्गमाचार्यदेवं मन्त्रोपदेष्टारम् । वहामि शिरसा पादुके तव दासानाम्।

In Public domain. Digitization Muthulakshmi Research Academy

सेवे तव दासदासान् । संवाहयामि तव दासदासीजनपादान् । मृष्यतां मम पापं मृष्यताम् ॥

44

कल्याणमूर्ते ! लब्धं मया भवद्रूपनिधानमञ्जनेन वैष्णवज्ञानरूपेण। किञ्चोदतारिषं संसारसमुद्रं भवद्भक्तिरूपया नावाऽदत्वा भवते शुल्कं वैराग्यरूपम्। हृतश्च मयाऽजरामरपदं त्वत्पादतुलसीमालिकया ।

त्वं प्रभुः । अहं किङ्करः । यावन्मां न त्वमपराधे स्थापयिष्यसि तावद् यथार्थं निवेदयामि । कुरु यद्रोचते भवते ॥

45

कमलाक्ष ! बिभर्ति तल्पभूतस्ते शेषो ब्रह्मण्डम् । जहारामृतं वीर्येण वाहनं ते गरुत्मान् । अध्यास्ते भर्तृशिरस्तव दुहिता मन्दाकिनी । अत्यक्रमीद् ब्रह्मलोकं ध्रुवस्तव भक्तः । नित्यमुक्तोऽभून्नारदः । बभूव वैयासकिर्वैराग्यस्य मूर्तिः ।

तव दासास्त्वत्तोऽप्यधिकाः ॥

46

परमपुरुष ! ममौ किल भवान् पदेनैकेन भुवमन्येन दिवञ्च । किमिति कथयामि तव मूर्तिम्? स्तुवन्ति हि श्रुतयो भवन्तम् । कतीति गणयामि कल्याणगुणांस्तव? वसत्यजाण्डकोटिस्तव रोमकूपेषु । किमिति वर्णयामि ? भवसि त्वं सार्वदेशिकः सार्वकालिकः परिपूर्णश्च । कथं वेद्मि महिमानं तव? अपि च पुराणपुरुषः । कथं जानाम्याद्यन्तौ तव?

जिज्ञासुरीदृशं भवन्तं मातेवाकाशस्य हास्यभाजनमस्मि । कृपया प्रसन्नो भव ॥

47

पुरुषोत्तम ! कदाचिदहं तव दास्यरूपगजारूढः । कदाचन त्वं मदीयोऽसीति विश्वासरूपहयारूढः । कदापि त्वत्कथाश्रवणजातानन्दरूपरथारूढः । अन्यदा तव विधेयः पदातिश्च ।

एवं सेवे चतुरङ्गबलरूपः । क्षन्तव्या ममापराधाः ॥

In Public domain. Digitization Muthulakshmi Research Academy

48

इन्दिरारमण ! सन्दृश्य भवन्तं किमपि दित्सुरुपायनं गवेषयमाणोऽज्ञासिषं तद्वस्तु कामक्रोधविरहितं प्रशान्तं मन इति । यदमूल्यम् । नहि तुलादानहिरण्यादिदानानि तेन तुलामर्हन्ति । यत्कल्पतेऽष्टाङ्गयोगाय । येन सिध्यति तपः ।

उपायनेनानेन हृष्यसि त्वमित्यर्पयामि ॥

49

परन्धामन् ! मम कुटुम्बकथा निवेद्यते । आकर्ण्यताम् । अस्ति मे वृत्तिस्सुसमृद्धा पूर्वाचार्योक्तग्रन्थावलिरूपा । कर्षं कर्षं गुरूपदेशरूपहलैस्तामुप्त्वा तव दास्यरूपबीजानि, पालयामि भागवतधर्मरूपपशुवृन्दं च । सुखितोऽस्मि ।

इतः परं लप्स्येऽवश्यं तव सारूप्यरूपं धनं महत् ॥

50

रमाकान्त ! द्यूतफलकं मम देहः । अक्षास्तत्वानि पञ्चविंशतिः । पणस्तु मम जीवितम् । दीव्यंश्चिरादेतैर्भवता भवन्मायया पुनः पुनः पराजितोऽस्मि न जानामि कदाऽपि विजयं नाम ।

भवान् मम गुरुदेवः । "शिष्यादिच्छेत्पराजयम्" इति न्यायेन करोतु भवान् जेतारं माम् । न मे जयेन तेऽपयशः ॥

51

कृपासिन्धो ! जानामि नरकाय पापम्, स्वर्गाय पुण्यम्, दुःखायानृतम्, सुखाय सूनृतमिति । तथापि भवामि पश्चिमबुद्धिस्तव माययाऽचरणकाले ।

अतीतानि जन्मानि मम शतसहस्राणि । नैकमपि समर्पितं भवतः पादसेवायै। अनुशोचामि निरन्तरम् । नाहमीशे तव मायायाः । शरणागतोऽस्मि । दयस्व मम ते दासस्य ।

उध्ध्रियतां मायाकूपात् तव दासः ॥

52

शार्ङ्गपाणे ! भवन्ति क्षेत्राणि तव सर्वजन्तूनां शरीराणि । भवति भवान् क्षेत्रस्वामी । जीवाः कृषीवलाः । इन्द्रियाणि लाङ्गलानि । ऐहिकामुष्मिकसुखानि

In Public domain. Digitization Muthulakshmi Research Academy

कृषिफलानि ।

भविष्यदर्थे हृदयेषु सर्वेषां करोतु भवान् भक्तिज्ञानवैराग्याणां बीजावापम्।

53

गदाधर ! मया विवेकविधुरेण यौवनदृप्तेन मुक्ता नानाभोगाः । फलेन येषां पुण्यपापरूपेण बद्धो न प्रभुरात्मानं मोचयितुं यथा पशुर्बन्दीबद्धः, मर्कटो जालपतितः, सर्पो जाङ्गुलिकगृहीतः । शरणागतोऽस्मि त्वां लोकेश्वरं दयासिन्धुम् । परिगृह्य मां किङ्करं मुद्रयाऽमुद्रयस्त्वं । हृष्टःस्तवीमि, नौमि, नमामि, वन्दे, कीर्तयामि, श्लाघे सततं भवन्तम् ।।

54

श्रीवल्लभ ! श्रुतं मया यथा तपस्यतां महात्मनां तपस्विनां जटाजूटेषु, श्रवणेषु करसन्धिषु कुलायानि कुर्वन्ति पतङ्गा इति । नाहमलं तुप्तुं निष्ठया तादृश्या।

केवलं प्रणमामि हस्ताभ्याम् । प्रणिपतामि साष्टाङ्गम् । उपस्पृशामि तव पादपद्मौ ।

पुरा भवतो धृतरामकृष्णाद्यवतारस्य चरतो वने पादस्पर्शेन कृताः पूताः किल पाषाणतरुगुल्मलतादयः । न श्रुतं तैस्तादृशी तपोनिष्ठा निर्व्यूढेति । अतः कृतं तपोनिष्ठया । गतिर्मे भवतः श्रीपादपद्मद्वयम् ।।

55

दैत्यारे ! इदं द्वितीयं परार्थं ब्रह्मणः । अस्यैकस्मिन् दिवसे शासति किल स्वर्गं चतुर्दशेन्द्राः । अधुना शास्ति सप्तम इन्द्रः । न जाने महति काले गते कति वा गृहीतानि जन्मानि मया । अजनिषि कासु वा योनिषु?

अद्यत्वे ममानुगृह्य ब्राह्मणजन्म कृतवान् श्रीवैष्णवम् । न मया नवान्येन वा विज्ञप्तो भवान् । कृपया निर्व्याजयाऽकृथाः पूतं माम् । अधमर्णोऽस्मि ।।

56

भगवन् ! कथं सुलभो मे भविष्यसि यस्त्वं ब्रह्मादीनामपि दुर्लभः। कथं प्रीणयेषं भवन्तम् ? कथं भवेयं ते कृपापात्रम् ? कथं वसेयं निकषा त्वाम्? इत्यस्मि चिन्ताकुलः । त्वमस्य कारणबन्धुर्यथा मेघश्चातकस्य, भानुः पङ्कजस्य, चन्द्रस्सागरस्य,

In Public domain. Digitization Muthulakshmi Research Academy

चन्द्रिका चन्द्रकान्तस्य च ।

स्मृत्वैतस्सौहृदं विस्रब्धोऽस्मि ॥

57

विश्वेश्वर ! कदा साक्षात्करोषि मम पुरतः ? विरहिणीव प्रियं स्तनन्धय इव मातरं, वत्स इव धेनुं प्रतिपालयामि सन्तप्तचित्तो बाष्पप्लुतलोचनः । कदा साक्षात्करोषि? न सहे विलम्बम् । न सहे न सहे; नार्हस्युपेक्षितुमनन्यगतिकं पादपतितं, शरणागतं प्रपन्नं माम् ॥

58

पद्मावतीप्राणवल्लभ ! नामग्राहं गृहीत्वा भवन्तमावाह्य मम मन्दिरे पीठे संस्थाप्य पूजयामि । पाद्यं समुद्रस्येव, अलङ्कारान् मेरोरिव, गन्धं मलयाद्रेरिव, पुष्पाणि वसन्तस्येव, दीपं सहस्ररश्मेरिव, अमृतनैवेद्यमृतांशोरिव समर्पयामि ।

जिह्रेमि कुर्वन्नेतानि कर्माणि । शङ्के दृष्ट्वा मामन्तर्हससीति । किं नार्पिपद् भवते गन्धान् कुब्जा? पुष्पमाला मालाकारः, विदुरश्च सजग्धिम्?

स्मृतिगतैरेतैस्ते भक्तानुगृहयालुतां विज्ञाय वीतशोको हृष्टोऽस्मि ॥

59

शेषशायिन् ! न शक्नोम्यटितुं दुर्गमानि पुण्यक्षेत्राणि । नमस्तेऽष्टोत्तरशताय तिरुपतिभ्यः । नमस्ते मूर्तिभ्यस्तत्रत्याभ्यः । नमस्ते तल्पभूताय शेषाचलाय । नमस्ते विश्वरूपाय । नमस्ते विश्वस्रष्टे । नमस्ते परमकारणाय ।

गङ्गेव पङ्गुं कृपया सन्निधत्तां मां भवान् ॥

60

घनश्याम ! दृप्तोऽभूवं पुरा कुलविद्यावित्तैस्सर्वमहानिति । तृणायाऽमंस्यन्यान्। व्यचिन्तयं तान् खरशुनककीटकांस्तुच्छान् । एवमात्मसम्भावना परां कोटिमारूढा ।

कालेन गच्छता बोधैराचार्याणामुन्मीलितनेत्रः प्राप्तस्तव पादसन्निधिम् अधुनाहं मां जानाम्यधमाधमम् ।

मम प्रपन्नस्य दयस्व ! भगवन् ! ॥

 In Public domain. Digitization Muthulakshmi Research Academy

61

भक्तमन्दार ! नमो नमो भवते महते । यस्य रोम्णः प्रजातानि ब्रह्माण्डानि यस्य च नाभीकमलादजायत पितामहो जगत्स्रष्टाः, यस्य च नाम्ना प्रवर्तते सङ्कल्पः श्रीमहाविष्णोराज्ञयेति । यं च ब्रुवन्ति पुराणपुरुषम्। यश्चाददादमृतं सुरेभ्यस्सागरं निर्मथ्य । यस्य च पददासाः प्रह्लादनारदादयः। यस्य च नेत्रे सूर्याचन्द्रमसौ । यस्य च देवी लक्ष्मीः । यश्च सर्वगोप्ता यज्ञकर्त्ता, यज्ञभोक्ता, मोक्षदाता च ।

नमो नमो भवते महते ॥

62

तिरुमलदेव ! प्रारब्धे शास्त्राध्ययने पुङ्खानुपुङ्खमुत्तिष्ठन्ते संशयाः। नोदेति। खलु ज्ञानमनध्ययनेन । गवेषयितुं भवन्तमुद्यतस्य नेत्रयोर्मम त्वदन्यद् भवति प्रत्यक्षं न तु त्वम् । निमीलितयोर्नेत्रयोस्सतोरुद्यच्छन्ति नानावासनाः । सङ्कल्पितं पुण्यकर्मभिर्द्रष्टव्यस्त्वमिति । बन्धकानि तानीति विद्मः । यदि न कृतं पुण्यं मया नास्तिक इति गर्हन्ति लोकाः ।

कथं भवान् द्रष्टव्यः? स्मारिता तव गीतासूक्तिर्यथा ।

“सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ! अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः” ॥

63

नलिनाक्ष ! कथं संश्लिष्येन्मम चित्तं तव मूर्तिम् ? यतो मम संश्लेषः कान्तया । नियमोऽन्नपानयोः । नित्यकर्माणि केवलैहिकसुखपराणि । व्रतानि धनार्जनानि, धर्माश्शरीरभोगाः । वेदपाठः परदूषणम्, पञ्चयज्ञाः पञ्चेन्द्रियव्यापाराः । एभिः संश्लिष्टं मनः कथं शक्यं विश्लेषयितुम् ? यदि प्रसीदसि सर्वं सम्पद्यते ॥

64

विश्वमूर्ते ! सिध्यामि कथं मौननिष्ठायाम् ? यतः प्रकृत्या मम वदनं वाचाटं, कर्णौ सर्पस्येव स्वल्पिष्ठतममपि शब्दं शृणुतः, निमीलिते अपि नेत्रे पश्यतः सर्वमपि रसना भृशं लालसा रुचिग्रहणाय चञ्चूर्यतेऽवशंवदा नासा गन्धाघ्राणाय तत्र तत्र ।

In Public domain. Digitization Muthulakshmi Research Academy

नाहं जितेन्द्रियः इन्द्रियजितः । मदधीनौ स्वः करचरणौ । चरणाभ्यां प्रदक्षिणीकृत्य ते मूर्तिं प्रणोमि कराभ्यां पादपतितः ॥

65

श्रीहरे ! प्रणमामि कराभ्यां भवन्तम्, शङ्के यथाविध्याचरामि वेति । जपाम्यनुदिनं तिरुमन्त्रं शङ्के निर्दोषं पठामि वेति । बिभेम्यविज्ञाय कालाकालौ रमादेव्या विहरन्तं त्वामाह्वयामि मदन्तिकमिति शङ्के शिलादारुमूर्तीस्तव दृष्ट्वा नैता रविकोभासमाना इति ।

इत्थमपराद्धंमन्योऽस्मि । यदि मेऽपराधा मृष्यन्ताम् । यद्यनपराद्धो धन्योऽस्मि।

66

श्रीवेङ्कटरमण ! पदं करोम्यतिसाहसे कर्मणि । मनः कामयते निराकारं द्रष्टुं त्वाम् । ईहते रसना प्रसादमशितुं तव । नयने कामयेते दिव्यज्योतिस्ते विलोकितुम्। करौ पापपङ्क्लािवभिलषतस्तव पादौ स्प्रष्टुम्। चरणौ च त्वां विश्वरूपं प्रदक्षिणीकर्तुम्। किमिति निवेदयामि मम चापलम्? ॥

67

भुजगशयन ! आदिशद् भवानस्मान् सालग्राम-चक्रपाणिदेवपूजा-अश्वत्थतुलसीसेवा-गोब्राह्मणवन्दन-तीर्थस्नान-वेदपाठ-तपोयज्ञैकादशीव्रत-दान-सङ्कीर्तनादिभिरात्मानं कृतार्थयतेति । केचिदेतास्ते सगुणमूर्तीरनुपास्य स्पृहयन्ति निर्गुणाकाराय । साक्षाद् दृष्टां सगुणमूर्तिं ते प्रथमं सेवेत जनः। क्रमशस्त्वमेव दर्शयिष्यसि निर्गुणस्वरूपञ्च। भवान् सगुणो निर्गुणश्च ।

धिगेतामातुरताम् । मह्यं रोचते सगुणमूर्तेस्ते सेवैव ॥

68

पीताम्बर ! नाहं श्रान्तो मुहुर्मुहुर्निर्गच्छन्नपि चतुरशीतेर्लक्षेभ्यो जन्तुगर्भेभ्यः। किन्तु शोचाम्यन्तर्यामितया मामनुगच्छतस्तव श्रीपादौ कियद् व्यथेते इति । विषीदामि चान्द्रायणादिव्रतैः कृच्छ्रैस्तपोभिश्च सोढ्वा शीतोष्णं क्रशयतश्शरीरं ममान्तर्यामी भवान् कियत् क्लिश्यत इति । शङ्के नितान्तमावाह्य नैवेद्यं समर्पयन् किमेतद् रोचते भवते नवेति । सन्तप्ये महतो महीयास्त्वं पुञ्जीभूतस्सूक्ष्मरूपेण हृदये मम कियन्तं

In Public domain. Digitization Muthulakshmi Research Academy

सम्बाधमनुभवसीति ।

69

चतुर्भुज ! ज्ञानरूपं मम प्रमदवनं कामक्रोधरूपौ वराहौ द्वावुत्खायोन्मूलयतः। शमदमरूपयोरवपातयोस्तौ निपातयितुकामं मामभिजिघांसन्ति । भल्लूका मत्प्रतिबन्धक-कर्मरूपाः । पाशेन त्वयि भक्तिरूपेण वधान भल्लूकांस्तान् ।

निवेदयामि पुरा भवान् मृगयुरिव मायामृगमविध्यदिति ।।

70

देवदेव! सकृदर्चितो वा ध्यातो वा भवानुत्तारयति खलु दुःखसागरम्। कल्पते खलु पुण्यराशये महते फलं वा पुष्पं वा दलं वा भवत्पादयोरर्पितम्। प्रत्यदाद् भवान् पृथुकेभ्यो मुष्टिमात्रेभ्यः कुचेलायानन्तां श्रियं यथा फलानि बहूनि वृक्षो गृहीत्वा कतिपयान्येव जलानि, यथा पयांसि घटदघ्नानि धेनुस्तृणपत्राणि चरित्वा, यथा महिता आशिषो वृद्धो ब्राह्मणः परिगृह्य प्रणाममेकम् ।।

71

भगवन् ! महिमा तेऽवाङ्मानसगोचरः । तीर्त्वा सागरान् रथेन भवानतिक्रम्य लोकालोकं, छित्वा महत्तमः, प्रविश्य दिव्यं तेजः, समानिनाय मृतं गुरुपुत्रम् । अददर्शदर्जुनाय दिव्यमत्यद्भुतं विश्वरूपम् । आच्छाद्यार्कं चक्रेणाजीघतत् सैन्धवम् । उद्धृतवान् बालो हस्तेन गोवर्धनगिरिं सप्तदिनानि कृतवांश्च त्रिवक्रामवक्राम् । महिमा तेऽवाङ्मानसगोचरः ।।

72

सुन्दरमूर्ते ! भवति भवान् मम कविताकन्याया वरः । रसना मम कल्याणवेदिका । मनो मे यवनिका । भक्तिर्हस्तकङ्कणम् । पद्मानि मङ्गलाक्षताः । काव्यशब्दा वाद्यानि । नीराजनं मम कटाक्षजालम् ।

आशंसे कन्यादानेनानेन मुक्तो भवेयं कर्मबन्धादिति ।।

73

शरणागतरक्षक ! भवता कृतो मुक्तबन्धो गजेन्द्रः । रक्षिता मानभङ्गाद् द्रौपदी । कृता सूनृता प्रतिज्ञा प्रह्लादस्य ।

In Public domain. Digitization Muthulakshmi Research Academy

आत्मीयः कृतो विभीषणः शरणागतः अभिषिक्तश्च लङ्काराज्यसिंहासने। बलिः कृतो रसातलपतिः। दत्तं ध्रुवाय ध्रुवपदम् ॥

74

भगवन्! शङ्के ज्ञानेन त्यक्तुं कर्माणि भवदाज्ञोल्लङ्घनभिया। कृत्वा विहितानि कर्माणि समर्पयितव्यं तत्फलं भवत इति यदि त्वमवाप्तकामः। जिह्रेमि यच्छंस्तत्फलं भवते। शोचाम्यनाचरणेन रौरवं प्राप्नुयामिति च। शास्त्राण्येकत्र वदन्ति ज्ञानमतिरिच्यते कर्मण इति। कुतस्त्वया न दत्तो ज्ञानकाण्ड एक एव, कुत उपदिष्टो बन्धकः कर्मकाण्डः? ॥

75

गोविन्द! भवति प्रसन्नो भवांस्तेषु ये सम्बोधयन्ति त्वां गोपिकावल्लभेति। किं भृशं श्रोत्रपेयं भवति ते जारत्वं तथोद्घोषितम्? किं पक्षपातस्ते तथा प्रशंसितृषु। इन्द्रोऽहल्याजारः। इन्द्रावरजस्त्वं गोपिकावल्लभः। रक्षित आनुवंशिकाचारः।

कुत एष निरर्थकः प्रश्नः? तत्र प्रियाचरणमेवास्मद्विधिः। यद्रोचते भवते तत् कुर्मः। अद्यप्रभृति सम्बोधयामस्त्वां श्रीभूनीलासहितेति व्रजाङ्गनावल्लभेति, अष्टमहिषोप्राणेश्वरेति, षोडशसहस्ररमणीरमणेति। हृष्टस्त्वं भवत्किङ्करं कुर्यां मां हृष्टं भगवन्! ॥

76

रमेश! किं गृहीतव्रतो भवान् पुनः पुनरिहलोके मां स्रष्टुम्? किं निविष्टोऽसि मह्यमनिच्छते बलवद् दातुं मधुदिग्धमोदकप्रायाण्यैहिकसौख्यानि? किमभिनिवशसे मम तपोविघातम्? किं चिन्तयसि छेत्तुं वारं वारं मनोरथवृक्षान् मम?

नाहं ते शत्रुः। किङ्करस्तव। नार्हसि विग्रहीतुम्। भगवन्! मयि प्रसीद।

77

परमेश्वर! मम शरीरमेव मम रथः। पुण्यपापान्यश्वाः। तृष्णाः प्रग्रहाः। आयुधानि कामक्रोधादयः। सहायैरेतैरिहलोके विहरन्नलभे जन्मपरम्परारूप-विजयपरम्परामद्ययावत्।

आकर्ण्य जगन्नाथं भवन्तं भजाम्यधुना। तत्त्वज्ञानभृतिं प्रदाय नियुक्तां मां

In Public domain. Digitization Muthulakshmi Research Academy

भवांस्तव कैङ्कर्ये ॥

78

श्रीनिवास! पदार्थास्सर्वे भवद्रूपाः । शब्दास्सर्वे भवन्नामानि । जलानि सर्वाणि भवत्पादतीर्थानि । फलानि सर्वाणि भवत्प्रसादः । सर्वं जन्तवो भवद्दासाः । चिन्ताः सर्वा भवद्ध्यानानि । सर्वाणि कर्माणि कृतानि पाणिपादेन तव कैङ्कर्याणि । वैकुण्ठं जगदिदम् । भवद्यज्ञा उत्सवास्सर्वे ।

सम्भाव्येत्थं भागवतास्ते मायां विजित्य संसारादात्मानं मोचयामासुः। ॥78॥

79

श्रीपते ! न कोऽपि पश्यति निराकारं ब्रह्म । न कोऽपि प्रभावति तर्तुं मायाब्धिं भवतः ।

एत एवोपायास्त्वत्प्राप्तेः । यथा भवतो भक्तसुलभताघोषकपुराणकथाश्रवणम्। दर्शनं ते नेत्रपर्वाधायिन्या मूर्तेः । मनसा ते रूपस्य मननम् । वन्दनं कराभ्याम् । नामसङ्कीर्तनञ्च । नास्त्यन्य उपायः । बन्धकानि काम्यानि कर्माणि । कल्पतेऽकामकर्म साक्षात्काराय ते ।

अतस्ते शरणं गच्छामि ॥

80

भागवतबन्धो ! कथयन्ति बुधा यथोत्पद्यते पापिष्ठा जीवास्तृणलता-गुल्मवृक्षपाषाणादिरूपेणेति । तर्हि बत! पापपूर्णं ब्रह्माण्डं सकलम् । प्राप्ता प्राक्तनं स्त्रैणं रूपमहल्या तव पादस्पर्शेन परित्यज्य शिलारूपम् । न त्वन्ये पाषाणाः । किमस्त्यनुभोक्तव्यं पापं महत् तैः? मन्ये त्वया पक्षपातः कृत इति ॥

81

नारायण! शप्तगौतमीस्नानपापनिष्कृतये भवतोपदिष्टं शबरीस्नानम्। विपन्नस्य महर्षेर्दुवाससो रक्षणाय प्रयुक्तस्तव भक्तोऽम्बरीषः । तयोः कियदन्तरम्?

प्रकटितो भवता महत्तरस्तव भक्तानां प्रभाव इति ॥

82

भगवन् ! मूढोऽस्मि रजस्तमोऽभिभूतः । कदा कथं भवेयं विवेकी ?

In Public domain. Digitization Muthulakshmi Research Academy

अभविष्यं चेज्ज्ञातिस्मरोऽज्ञास्यं को वाऽहं पुराजनुषि कस्य वा कर्मणः फलमधुनाऽनुभवामीति । न मे तद् भाग्यम् । दृष्ट्वा शुनकसूकरादीनां जन्तूनां क्षुद्रं जीवितं जनानां च संसारकूपमग्नानां दुःखानि च ममोदेति वैराग्यं कदाचन प्रकाश इव ज्योतिरिङ्गणस्य ।

कथं नश्यति मम मूढत्वम्? कथमहं विवेकी स्याम्? न विना कृपां तव न भवेयं विवेकी । शरणागतोऽस्मि भवतः ॥

83

हृषीकेश ! चिन्तयामि कदाचिन्निराहारश्चिरं कुर्यां मन्त्रानुष्ठानमिति। कदापि वने कृच्छ्रं तपश्चरेयमिति, कदाचन कायसिध्यै सञ्जीवनीं सम्पाद्य भुञ्जीयेति । एकदा सिद्धगन्धर्वादिपदलाभाय योगसाधनान्याश्रयेयमिति । कीदृशो मूढोऽहमस्मि । नैते मोक्षसिध्यै । बन्धनायैव । नहि चिरञ्जीव्यपि विना तव शरणागत्या मायाया विमुच्यते। भवत्पादशरणागत्या मायामुक्तः प्राप्स्यामि मोक्षम् ॥

84

श्रीवेङ्कटेश्वर! तत्तिमिरे दर्पणावलोकनं यत्कर्माचरणेन भवन्तं साक्षात् करोमीति। तद् बकबन्धनं यद् विद्याभिस्त्वामात्मीयं करोमीति । तच्छेषमस्तकमणिग्रहणं यत्तपसा त्वां वशंवदं करोमीति तदाकाशाधिरोहणं निश्रेण्या यदुपवासैस्त्वामधीनं करोमीति । तत् समुद्रलङ्घनं यद् दानैस्त्वामाहरामीति ।

न लभ्यस्त्वमीदृशैरुपायैः । बद्धो भवसि भक्त्यैव । भागवताः प्रह्लाद-नारद-शुक-भीष्म-विभीषण-गजेन्द्र-शबरी-अक्रूर-विदुर-हनुमत्प्रभृतयो भवत्यैवोत्तीर्णाः॥

85

पद्मनाभ ! ग्रन्थजालं यन्न वेदयति भवन्तं तत् पाषाणकण्टकाकीर्णमरण्यम्। देशो यत्र नास्ति भवदीयं मन्दिरं स पिशाचशुनकसूकरावासः । गृहे यस्मिंस्तव पूजा नास्ति तच्छ्मशानम् । पुराणपाठे यस्मिन्नते कथापाठस काकधूकरवः ॥

86

गरुडध्वज ! शक्यं तुलयितुं द्यावापृथिव्यौ परस्परेण । न ते महिम्नस्तुल्यमस्ति। शक्यते तुलयितुं मेरुसागरौ मिथः । नास्ति तुल्यं ते करुणासमुद्रस्य । शक्यं सूर्याचन्द्रमसौ

In Public domain. Digitization Muthulakshmi Research Academy

तुलयितुमन्योऽन्यौ । न ते सदृशमस्ति रविकोटितेजसः । शक्यं बडबानलानिलावितरेतरौ तुलयितुम् । न ते प्रतापानलस्य समोऽस्ति ।

भवानेव भवत्सदृशः । यत "एको नारायणो देव" इत्यामनति वेदः । किञ्च कल्पान्ते सत्येकार्णवे त्वमेक एव शिष्यसे ॥

87

देवशिखामणे ! भाण्डारमुद्घाट्य कुर्वति दानानि त्वयि वैष्णवास्सर्वे लब्ध्वा भक्तिधनं गोपायन्ति स्म स्वीयेषु हृदयमन्दिरेषु । रक्षन्ति स्म वदनकुसूलेषु तव सहस्रनामरत्नानि । मुद्रयामासुः सान्द्रं गात्रेषु तव शङ्खचक्रचिह्नानि । न्यदधुर्नयनयोस्तव मूर्तिम् । वहन्ति स्म मुष्टिभिस्तव वस्तूनि ।

अन्यतमस्तेषामहमपि । वृष्टा तव कृपावृष्टिरस्मासु । नास्त्यस्माक-मनावृष्टिदोषः ॥

88

परमपावन ! त्वं महतां महिष्ठः । त्वमसि स्वृजनशक्तिः स्रष्टुः । ऐश्वर्यमिन्द्रस्य । तेजस्सूर्यस्य । कलाश्चन्द्रस्य । वायोर्जवः । किं बहुना कथितेन? सर्वदेवतानां शक्तिस्त्वमेव । त्वं पुण्यतीर्थानां महिमा । यज्ञदानकर्मानुष्ठानं त्वमेव । सुलभ इव भासि । किन्तु दुर्लभः । न मया लभ्यः ।

कृपया मह्यं दीयतां दर्शनम् ॥

८९

श्रीमन्नारायण ! भवानादिविष्णुः । अपरविष्णुर्ब्रह्मा भवदंशभवः । यत "आत्मा वै पुत्रनामासीति" श्रुतेः । तेन सृष्टाः सर्वेऽपि वैष्णवाः । यतः कारणमेव कार्यरूपेण परिणमति । किञ्च "सर्वं विष्णुमयं जगत्" इत्यस्त्याभाणकः ।

सृष्टा अपि ब्रह्मणा कतिचन वासना बलेन भवन्ति शैवाः । देवतान्तरमतान्तर-भावमपास्य विश्वस्य "एको नारायणो देव" इति श्रुतिवचने सेवमानाः परमवैष्णवाः। इतरे जनाः (शैवाः) यत्सत्यं वैष्णवा एव । यतत्सर्वा देवतास्त्वदंशा एव ॥89॥

90

भक्तचिन्तामणे वरदहस्तं भवन्तं सेवमानेभ्यः साधुभ्यः, अभयहस्तं

In Public domain. Digitization Muthulakshmi Research Academy

शरणागतेभ्यश्च दर्शयन् दयामयस्तिष्ठसि। धरसि चक्रमेकहस्तेन शत्रुसंहाराय, अन्येन शङ्खं विजयघोषणाय।

वेदा आमनन्ति यथा "सहस्रशीर्षा पुरुषः सहस्राक्षस्सहस्रपात्। स भूमिं विश्वतो भृत्वा अत्यतिष्ठद् दशाङ्गुलम्" इति। भवानीदृशीं मूर्तिमुपसंहृत्य भक्तोद्धरणाय धृतवान् मनुष्यसाधारणं रूपम्। कियान् प्रेमा भक्तेषु भवतः? ॥

91

अनाद्यन्त ! अस्ति लालसा मम हृदये भवन्तं साक्षाद् द्रष्टुम्। किन्तु शङ्के भवन्तं कोटिसूर्यप्रकाशं न प्रभवामि द्रष्टुमाभ्यां नेत्राभ्यमिति। साक्षात्कारेण यत्सिध्येत्तत्सिध्यत्येव तव मूर्तिदर्शनेन वेङ्कटाचलक्षेत्रे। उच्यते "अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्" ॥

92

श्रीनिवास ! यत्फलं साध्यं ब्रह्मचर्येण, यत्पुण्यं गार्हस्थ्येन, यद्वैराग्यं वानप्रस्थेन, यत् तत्वज्ञानं सन्न्यासेन, तत् सर्वं लब्धं त्वन्नामोच्चारणेन। लब्धानि सर्वाणि सौख्यानि ते देवालयप्राङ्गणे। अमरत्वं च लब्धं श्रीवैष्णवाचारैः।

कृपया भवतस्सर्वं सम्पन्नम्॥

93

सर्वेश्वर ! श्रूयते सन्ति देवास्त्रयस्त्रिंशत्कोटय इति कं भजेमैतेषाम्? सन्ति सर्वेऽपि त्वय्येवेति भजामस्त्वामेव। त्वयि तृप्ते तृप्तास्सर्वेऽपि भवन्ति। त्वद्भिन्नेभ्योऽपि देवेभ्योऽर्पिताः प्रणामास्त्वामेव यान्ति। प्राहुर्यथा "सर्वदेवनमस्कारः केशवं प्रतिगच्छति" ॥

94

लोकनाथ ! अवधीद् भवानवतीर्णो युगे युगे धर्मसंस्थापनव्याजेनापराधिनो रावणादीन्। प्रथमे कुतो भवानचीकरत्तैरपराधान्? कुतः कल्पितं तेषां पापफलरूपं राक्षसजन्म? कुतो भवान् वारं वारमजनि भूतले ? कुतस्ते न कृताः प्रथममेव ज्ञानिनः? का हानिस्तव ? किं ते छिन्नम्? भवान् स्वतन्त्रः। प्रभवसि यथेच्छं कर्तुम्।

मन्येऽहमेव देवतिर्यङ्मनुष्यादयस्त्वां सेवमाना उत्तरन्तु संसारसमुद्रमिति

In Public domain. Digitization Muthulakshmi Research Academy

तच्छ्रेयसेऽवतीर्णोऽसीति ।

95

भगवन् कृतपुण्यैर्भक्तैस्सह प्राप्य श्रीरङ्गक्षेत्रं, स्नात्वा पुण्यनद्यां कावेर्यां, निर्मृष्टपङ्कः क्रमशोऽतिक्रम्य, सप्तप्राकारान् प्रविश्य, तव दिव्यं मन्दिरं प्रणिपत्य साष्टाङ्गं पुरः स्थितं गारुडस्तम्भं, ततोऽतिलङ्घ्य सुवर्णतोरणानि, प्रणम्य तवालयकाञ्चनकवाटं, द्वादशाल्वारूंश्च, प्रविश्य गर्भगृहं, निषेव्य प्रथमं जयविजयौ, तत्र भोगीन्द्रे सहस्रफणामालालङ्कृते शयानं, नीलमेघद्युतिं शिरसा रत्नकान्त्युज्ज्वलं किरीटं कर्णाभ्यां मनोज्ञमकरकुण्डले भालेन श्रीचूर्णतिलकं, वक्षसा चन्दनकस्तूरी-कर्पूरानुलेपनं कण्ठे वनमालिकां, हारकेयूरकङ्कणकटकाङ्गुलीयकानि च धारयन्तं, उपधानीकृतवामहस्तं, श्रीदेव्या क्रियमाणपादसंवाहनं नेत्रोत्सवाधायकं भवन्तं दर्शं दर्शं पुलकितदेहस्तव दिव्यपादारविन्दे हृदि निधाय चिरं ध्यायन् स्थितोऽस्मि।

96

श्रीमदलुमेलुमङ्गापते ! न वेत्ति त्वां जगत्स्रष्टाऽपि । वयं के? तव नाभीकमलसञ्जातः परमेष्ठी दिदृक्षुस्तन्नालं शतं वर्षाणि चरित्वाऽन्ते दृष्टवांस्त्वन्नाम-स्मरणेन । सभवान् भक्तसुलभो भूम्यां श्रीकूर्म-लोलार्क-वैकुण्ठ-रङ्गनाथ-सर्पवर-कनकगिरि-कनकाम्बरगिरि-गोवर्धनगिरि-अञ्जनगिरि-हस्तिगिरि-आल्वार्गिरि-पाण्डुरङ्गगिरि-गरुडगिरि-मङ्गलगिरि-नीलगिरि-रामगिरि-हेमगिरि-वेङ्कटगिरि-श्वेतद्वीप-हरिण्याद्रि-कुन्ताद्रि-वृषभाद्रि-मदनाद्रि-घटिकाचल-श्रीरङ्ग-प्रमोदूत-सत्यलोक-आकाशनगर-शबरीप्रकाश-द्वीपान्तर-पम्पातीर-उत्पल्लापद-अगस्त्याश्रम-शरणागत-कदलीवन-क्षीराब्धि-बदरिकाश्रम-नारायणाश्रम-नैमिशारण्य-विन्ध्यारण्य-महारण्य-सुब्रह्मण्य-वृन्दावन-भक्तिस्थल-कपिस्थल-पादस्थल-श्रीनिवासस्थल-अवन्तीवज्र-कालिकाहृदय-गया-गङ्गासागर-चक्रवर्धन-सागरसङ्ग-चित्रकूट-मणिकूट-हरिक्षेत्र-कुरुक्षेत्र-अहोबिल-श्रीवैष्णव-हिमवत्-चूर्णप्रतीक-कपिलहाटक-निखिलसागर-मयूर-श्रीमद्द्वार-कुरुकायक-भद्रनन्दन-रविकुण्डल-आदिशङ्ख-पूनमम्बर-भीमशङ्ख-अर्थाचल-वृद्धाचल-वृद्धाचल-नासिकात्र्यम्बक-हरिहरेश्वर-अलहरी-चेन्नकेश्वरी-श्वेताद्रि-तोताद्रि-श्रीराम-श्रीराघव-दिवाभव-पाताल-शक्तिसागर-अग्निपुर-वटारण्य-अनन्त-कुम्भकोण-

In Public domain. Digitization Muthulakshmi Research Academy

अयोध्या-प्रयाग-द्वारकावती-जिम्हिला-ताम्रपर्णी-काञ्ची-सिंहाचल-नामस्वष्टोत्तर-शतसङ्ख्येषु तिरुपतिक्षेत्रेष्ववतीर्ण इति शृण्मः ।

नाहं शक्नोम्यटितुमियन्ति क्षेत्राणि । करोमि केवलं तव नामसङ्कीर्तनम् ॥

97

श्रीधर ! प्रह्लादः साक्षी तव भक्तवात्सल्यस्य । विभीषणः साक्षी शरणागतरक्षणस्य । अहल्या साक्षिणी पापक्षपणस्य । पाञ्चाली साक्षिणी तवोदारगुणस्य। गजेन्द्रः साक्षी तवार्तत्राणपरायणत्वस्य ।

किं बहुना ! सर्वं जगत् साक्षि तव कल्याणगुणानाम् । विदित्वैतत्सर्वं तव शरणं प्रपद्ये । पाहि मां पाहि माम् ॥

98

देव ! अत्यन्तमनोहरं नदीप्रवाह इव कल्पान्तं यावत् प्रवहत्, ते विभूतिमयं जगदिदं कृत्वा व्यक्तं कुतस्त्वमव्यक्तो भवसि? किं व्यक्तस्य तव भवति पीडार्तेभ्य इति? तर्हि कस्तेषां शरणं विना त्वाम्? दूरस्थानामप्यार्तानां श्रुत्वा दीनालापान् मुहूर्तेन तत्र साक्षाद् भूय रक्षसि किल ।

इयत्या कृपयाऽस्मद्रक्षकं दिदृक्षामहे प्रत्यक्षम् । स्वामिन् । पूरय मनोरथम्।

99

परमेश्वर ! भीष्मेण तव दासेन महाभारतसङ्ग्रामे "पार्थस्य सारथ्यं कुर्वतोदासेन स्थीयते मया" इति कृतप्रतिज्ञेन त्वया चक्रं धारितम् ! आरूढा दुहिता ते वियद्गङ्गा हरजटाजूटम् । शेषस्तव तल्पो बिभर्ति ब्रह्माण्डम् । वाहनं ते वैनतेयो विजित्य वज्रिण हृतवानमृतम् । दासस्ते ध्रुवो ब्रह्मलोकमध्यास्ते । भक्तस्ते रुक्माङ्गदः शून्यायतनं चक्रं यमलोकम्। बभूव मुक्तश्शुकः । किङ्करस्ते हनुमान् लङ्कानगरं ददाह यदजय्यमिन्द्रादिभिरपि । भक्तस्ते कुचेलश्चिपिटकान् कतिपयान् समर्प्य सम्पन्नस्सञ्जातः ।

दासास्ते जेजीयन्ते ॥

100

भगवन् ! भवान् विरजानदीतीरे वैकुण्ठे मुक्तारत्नवज्रवैदूर्य-गोमेधिकपुष्प-रागमरकतमाणिक्याद्यलङ्कारशोभिते महनीये प्रासादे सहस्रफणासमुज्ज्वले शेषतल्पे

In Public domain. Digitization Muthulakshmi Research Academy

शयानः श्रीभूनीलादेवीभिरुपचरितः, देवतामूर्तिभिश्शङ्खचक्रगदाशार्ङ्गाद्यायुधैस्सेवितः, विष्वक्सेनवैनतेयाभ्यां धृतचामराभ्यां वीजितः, सनकसनन्दनसनत्कुमारसनत्सुजातादिभिर्भक्तैः कृताञ्जलिभिरर्चितः, गायतोस्सतोस्तुम्बुरुनारदयोः, नृत्यन्तीष्वप्सरस्सु, स्तुवत्सु किन्नरगन्धर्वसिद्धसाध्येषु, सेवमानेषु परमेष्ठिपाकशासनवैश्वानरयमवरुण-वायुनिरृति-कुबेरादिदिक्पालकेषु, पुरश्चरत्सु नवसु, ब्रह्मसु, एकादशसु रुद्रेषु द्वादशस्वादित्येषु, अष्टसु वसुषु, सप्तसु मरुत्सु, चित्रगुप्तेषु, नवसु ग्रहेषु सप्तसु सागरेषु, सप्तसु नदीषु, सप्तसु कुलपर्वतेषु कृतादिषु चतुर्षु युगेषु प्रतिपालयत्सु सालोक्य-सामीप्य-सारूप्य-सायुज्यप्राप्तेषु पुण्यपुरुषेषु उपस्थितेषु नवसु निधिषु ऐरावत-उच्चैः श्रव-कामधेनु-कल्पवृक्ष-चिन्तामणिषु च, शृण्वं स्तत्तन्निवेदनान्यभयं ब्रुवन् मन्दस्मितवदनारविन्दः स्थितोऽसि । सर्व जीवदयापरो जगद्रक्षणायानन्तरूप उत्तिष्ठसे !

मत्स्यावतारे निहत्य सोमकासुरं ददौ वेदान् ब्रह्मणे भवान् । कूर्मावतारे मन्दराचलमूढ्वाऽयच्छत्तव दासेभ्यस्सुरेभ्यसर्वैश्वर्याणि, वराहावतारे मर्दित्वा हिरण्याक्षं तेन संवृत्तां पृथिवीं कटरूपेण विवृतामकार्षीत् । नृसिंहावतारे वधित्वा हिरण्यकशिपुं ररक्ष बालं भक्तं प्रह्लादम् । वामनावतारे बद्ध्वा बलिं प्रवेशयामास पातालम् । परशुरामावतारे कार्तवीर्यार्जुनप्रभृतीन् राज्ञो हत्वा तत्कपालैः स्वर्गसोपनानि कल्पित्वा पितॄन् प्रापयामास स्वर्गम्। रामावतारे ताटकाप्राणापहरणं, विश्वामित्रयज्ञपालनं, अहल्याशापविमोचनं श्रीकण्ठचापखण्डनं, सीताकल्याणां, भार्गवगर्वापहरणं, पट्टाभिषेकभङ्गेन हेतुना वनप्रस्थानं, गुहसम्भाषणं, जटावत्कलधारणं, भरद्वाजसम्प्रीणनं, चित्रकूटावासं, भरताय पादुकादानं, विराधवधं, शरभङ्गरक्षणं, अत्र्यनसूयापूजनं अगस्त्य, सुतीक्ष्ण, मतङ्गादिमुन्याश्रमसञ्चारं, मुन्यभयदानं, पञ्चवटीप्रान्ते शूर्पणखा-नासिकाच्छेदनं, खरदूषणादिचतुर्दशसहस्रसंख्याकदानवहननं, मारीचमारणं, जटायो ऋणनिर्यातनं, कबन्धवधं, शबरीसेवाग्रहणं, वालिमर्दनं, सुग्रीवस्य किष्किन्धा-राज्याभिषेकं, दर्भशयनं, समुद्रगर्वभञ्जनं, सेतुबन्धनं, सुवेलाद्रिनिवासं, रावणकुम्भकर्ण-मेघनादातिकाय-महाकाय-धूम्राक्ष-यूपाक्ष-शोणिताक्ष-मकराक्ष-खड्गरोम-वृश्चिकरोम-सर्वरोमाग्निवर्ण-कम्पनाकम्पन-प्रहस्तादि-सकलराक्षसप्राणापहरणं, विभीषणलङ्का-पट्टाभिषेकं च निरूह्य पुष्पकारूढोऽयोध्यामागत्य पट्टाभिषिक्त एकादशसहस्राणि

In Public domain. Digitization Muthulakshmi Research Academy

वर्षाणि राज्यं शशास भवान् । बलरामावतारे दुष्टराक्षसान् जघान । श्रीकृष्णावतारे बाललीलाः, गोपालनं, पूतना-शकटासुर-धेनुकासुर-बकासुर-वत्सासुरादि दुष्टराक्षस-संहरणं, गोवर्धनोद्धरणं, गोपिकाविरहणं, कंस-शिशुपाल-बाणासुरादिनिग्रहणं, पार्थसारथित्वं, दुर्योधनकुलनाशनं, विदुराक्रूरमुचिकुन्दादि-भक्तजनरक्षणं च चकार । भाविनि कल्क्यवतारे दुष्टनिग्रहं शिष्टप्रतिपालनं वर्णाश्रमधर्मनिर्णयं कर्तुं व्यवसितोऽसि।

इत्थं धर्मरक्षणाय जायते भवान् युगे युगे । ताम्रशिलामृण्मयदारुषु तिष्ठन्निगूढो रक्षति सेवमानान् दासान् । यथाऽणु-तृण-काष्ठेषु तथा मय्यपि भवानस्ति । अतो यद्यत्क्रियते मया कृत्यं वाऽकृत्यं वा तत्तत्त्वय्येवारोपयामि । उक्तं किल - "कर्ता भोक्ता जनार्दन" इति । रक्षतु मां भवांस्तव दासानुदासं कृपाकटाक्षैः ।

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

प्रवरवरूधिनीयम्

In Public domain. Digitization Muthulakshmi Research Academy

अवतारिका

1. विजयनगराधिनेता संश्लाधित आन्ध्रभोज इति ।
श्रीकृष्णदेवरायः संसदि यस्याष्टदिग्गजा आसन् ॥

2. आन्ध्रकवितापितामहबिरुदाङ्कः पेद्दनकवीन्द्रः ।
ऐरावतो बभासे येन कृतं मनुचरित्रमिति काव्यम् ॥

3. यथा संस्कृतभाषायां कालिदासकवेर्वचः ।
सरलं मधुरञ्चान्ध्र्यां तथा पेद्दनसत्कवेः ॥

4. चकारेदङ्कविः काव्यमङ्कितं कृष्णभूभुजः ।
ददौ तस्मै योऽग्रहारं रत्नभूषाम्बराणि च ॥

5. किञ्चान्दोलनमारोप्य स्कन्धेनोवाह वीथिषु ।
तस्याशुकविताप्रीतः स्वयं पादेऽङ्गदं न्यधात् ॥

6. प्रवरः परमश्रोत्रिय युवात्र नेता नवो मदनः ।
काव्ये वरूधिनीति त्रिदशवधूर्नायिका च कामहता ॥

7. अत्यध्वमुपयान्तं तं विलोक्यैकाकिनी वधूः ।
मनोहत्य स्मरक्रीडारसं भोक्तुं मनो दधौ ॥

8. नाधरबिम्बफलं वा न पयोधरदाडिमीफले वास्याः ।
रुरुचाते युवकीरा यास्मै चित्रं यथा पुरोडाशः ॥

9. तस्या विभ्रमजालेऽपतितः कथमपि बलात्करगृहीतः ।
शुक एष त्रोट्या तां विद्ध्वा नभ उत्पपात रयात् ॥

10. आदर्शप्रायन्त्विह गार्हस्थ्यं वर्णितं काव्ये ।
विप्रस्यातिश्लाघ्यं येनार्हति भूमिदेवपदमेषः ॥

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

प्रवरवरूधिनीयम्

1. अस्ति किलार्यावर्ते वरणातटिनीतटे महीदेव्याः ।
ग्रैवेयनायकमणिर्वा पुरमरुणास्पदं नाम ॥

2. विप्रा अत्र पितामहं न गणयन्त्याम्नायविद्याचणाः ।
क्षत्रा भार्गवमप्यजय्यमधरीकृत्याह्वयन्ते मुहुः ॥

3. वैश्या दातुमलं निधानपतये नीवीं वणिज्याकृते ।
शूद्रा आदिमभिक्षुकस्य कृषितो भिक्षामपाकुर्वते ॥

4. वेश्याजनो दत्तपत्रो रम्भादिसुरयोषिताम् ।
अतिबाललताप्यत्र बहुवीर्यवती किल ॥

5. तस्यां पुर्यां न्यवसदपरः पुष्पधन्वाभिरूप्ये ।
विद्यायां गीर्युवतिरथ पुण्याध्वराणां च कर्ता ॥

6. आम्नायानामनवरतमप्यापकश्शिष्यकोटे-
र्विप्रः श्लाघ्यः प्रवर इति योऽन्वर्थनामा चकाशे ॥

7. बभूव सौन्दर्यममुष्य भोग बाह्यं विरागेऽमिनिविष्टबुद्धेः ।
मानोज्ञकं चम्पकसूनकस्य भृङ्गाङ्गनानामिव कामुकीनाम् ॥

8. स सोमपीथी वयसि द्वितीये धनी सुखी स्वप्रियधर्मदारैः ।
मातापितृभ्यां गृहभारवाङ्भ्यां विनीयमानः स्पृहणीयभाग्यः ॥

9. विप्रोऽसौ भगवत्स्तवैरनुदिनं ब्राह्मे मुहुर्ते प्रभुः
ध्यात्वा तां तटिनीं स्वशिष्यसहितः स्नात्वा च सान्ध्यक्रियाः ।
गायत्रीं च समाप्य सैकततले नत्त्वा च भानुं गृहं
प्रत्यायाति जनैः स्तुतः कुशसमिद्भारैर्वटूनां गणैः ॥

10. शिष्टाचारमथाभिजात्यमभिवीक्ष्याम्नायधर्मक्रियाः
दानीयो भवतीति भूमिपतिभिर्दत्तं न गृह्णात्यसौ ।

 In Public domain. Digitization Muthulakshmi Research Academy

सालग्राममुखं च दानमवनिस्त्रिस्तस्य सूते फलं
प्रत्यब्दं धनधान्यगव्यममुकस्याक्षय्यमुत्तिष्ठते ॥

11. न तस्थ दारा अलसा भवन्ति कदापि पाकाय ददत्यजस्रम् ।
भोज्यं निशीथेऽप्यतिथिभ्य इष्टं स्वबन्धुताया इव हृष्टचित्ताः ॥

12. प्रत्युदूगच्छति तैर्थिकाः स्वपुरमायान्तीति बुद्धवाँ नम-
स्स्कृत्यादृत्य समानयत्यथ ददात्यातिथ्यमिष्टाशनम् ॥

13. विश्रान्तानुपगस्य विश्वगततत्तत्तीर्थमाहात्म्यमु-
च्छ्रोतुं काङ्क्षति गन्तुमिच्छति स दूराकर्णनात्कुञ्चति ॥

14. अतिथिसपर्यार्पितहृद्येवं तस्थुषि गृहे महीदेवे ।
आयातः कस्मिँश्चन दिवसे सिद्धस्तदीयमावासम् ॥

15. वैयाघ्रकृत्त्या मकुटी स्वयोगदण्डेन संयोजितकक्षपालः ।
काषायवासाः कृतभस्मलेपो भाति स्म सिद्धस्सकमण्डुलुस्सः ॥

16. अभिगत्य योगिनं तं प्रणिपत्य समर्च्यचार्घ्यपाद्याभ्यां ।
मूर्तीकृतभक्त्यासौ मृष्टेनान्नेन तर्पयित्याह ॥

17. कुतो भवान् गच्छति कुत्र किं वा कार्यं मया त्वत्पदकिङ्करेण ।
प्रपूतमासीन्मम गेहमद्य धन्योऽहमस्मि प्रशशाम मेऽघम् ॥

18. मन्त्रा भवतो वाचः प्रयाग एवाङ्घ्रिमुद्रितो देशः ।
निर्नेजितपादजलान्यमरझरीपुण्यवारीणि ॥

19. तस्यैव भाग्यं सुकृतञ्च तस्यै वावन्ध्य आजीव उदीर्णजन्म ।
भवादृशा यस्य गृहे प्रसन्नाः कृतातिथेया हृषिताः प्रयान्ति ॥

20. नमोऽस्तु योगीन्द्र! कुटम्बपङ्कनिर्मग्नमादृग्गृहमेथिसङ्घम् ।
नोद्धर्तुमस्त्यौषधमन्यदुर्व्यां युष्मत्पदाम्भोजरजोऽपहाय ॥

21. इत्युक्तो मुनिरवदच्छृणु वत्स! त्वादृशां गृहस्थानाम् ।

In Public domain. Digitization Muthulakshmi Research Academy

सुखवृत्त्यैवास्मादृशतैर्थिकजनतीर्थसेवनं सिध्येत् ।।

22. अङ्कस्था धनपेटिका सुरतरुः प्राकाररूढो निधिः
प्राप्तः प्राङ्गणसीम्नि: घोरमरुभूपानीयशाला गृही ।
पङ्ग्वन्धातिथिमूकभिक्षुकपरिव्राडाद्यनाथप्रजा
सङ्घातस्य गृहस्थवृत्तिसदृशी वृत्तिः क्व भूमीसुर! ।।

23. इति सिद्धं स्तुवन्तं स्वमूचेऽसौ भगवन्! नमः ।
भवत्सेविततीर्थानि विशिष्य श्रोतुमुत्सहे ।।

24. देशेषु केषु भवतोषितमप्सु कासु स्नातं सरित्सु चरितं कुधरेषु केषु ।
पुण्येषु केषु च वनेष्वटितं महात्मन्! आवेद्यतां त्वदुपसेविततीर्थजातम् ।।

25. निषेवितुं न प्रभुतापि तीर्थं यात्रामहत्त्वश्रवणेन शाम्येत् ।
दुष्पापमित्याहुरतोऽर्थये त्वामित्युक्त आदृत्य तमाह सिद्धः ।।

25. भो विप्रोत्तम! तीर्थसेवनचणः प्रैक्षे स्रवन्तीर्बहूः
पुण्यक्षेत्रवनानि पावनतमानद्रींश्च नैकाः पुरीः ।
अद्राक्षं च शतं सहस्रमपि दृक्पर्वप्रदायीन्यहं
दृश्यान्युत्कटपापनाशनपटून्याशाश्चतस्रश्चरन् ।।

26. केदारेशमुपाचरं भगवतीं प्राणंसिषं हिंगुला-
मद्राक्षं परमं प्रयागनिलयं पद्माक्षमाराधयम् ।
यादोनाथसुतापतिञ्च बदरीनारायणं किं बहु
व्याहारैश्चरता दिशा द्विज! शतं दृष्टा मया देवताः ।।

27. विशिष्य सर्वाण्यभिवर्ण्य वक्तुं दृश्यानि घस्राणि बहूनि मे स्युः ।
ग्रामैकरात्रं विचरामि नात्रैकाहात्परं वस्तु मयुक्तरूपम् ।।

28. इत्युक्तः प्रवरः पुनस्स वदति स्मारूढशङ्कोऽस्मि ब-
ह्वब्दानि स्युरमूनि सेवितवतः क्षेत्राणि तीर्थानि नुः ।

In Public domain. Digitization Muthulakshmi Research Academy

वक्त्रं तेऽभिनवं वयः प्रकटयत्येदद्विचित्रं न नः
शक्यं ज्ञातुमथ त्वमेव भगवन्! ज्ञाता महिम्नस्तव ॥

29. इत्यूचिवांसं प्रवरं स आख्य दलं विशङ्क्याथ न संशयस्य ।
प्रश्नेन दोषः शृणु! विप्रपुत्र! जरा रूजा नः स्पृशतो न सिद्धान् ॥

30. रहस्यमेतत्परमं न वाच्यं तथापि वक्ष्ये शृणु पादलेपः ।
नामौषधं सत्कृपयेश्वरस्य लब्धं प्रभावेन चरामि यस्य ॥

31. रवेर्यथाश्वा दिवि सञ्चरन्त्य श्रान्ता वयञ्चापि जवेन भूम्याम् ।
प्रभूष्णवः सञ्चरितुं तथेति ततस्स विप्रः कुतुकान्तरङ्गः ॥

32. बद्धाञ्जलिः प्राह भवत्प्रभाव मूढस्य वाचाटतमस्य मेऽद्य ।
क्षान्त्वा वचो मां मुनिचन्द्र! कुर्यास्त्वं तीर्थयात्रामनुगृह्य धन्यम् ॥

33. यावत्प्रार्थित एवं तावत्सिद्धः करण्डके गुप्तम् ।
दन्तमये रसमलिपत्पदयोस्तस्यैष स इति तमनुक्त्वा ॥

34. लिप्त्वा गतवति सिद्धे यथेच्छमवनीसुरो दिदृक्षुरगात् ।
प्रालेयाचलशृङ्गश्यामलकाननदरीझरीप्रभृतीन् ॥

35. हिमाचलं सोऽवततार यत्र शिखण्डिनः शृङ्गपतज्झरीणाम् ।
तरङ्गवाद्यैः परिफल्लपिञ्छा नृत्यन्ति केकारवगीतिकाभिः ॥

36. नरनारायणचरणद्वयचिह्नितबदरिकावनिकाम् ।
विप्रः प्रविश्य निर्धूताघं स्वं मन्यमान एति स्म ॥

37. शेषाहीनां शतमिव गिरेरूर्ध्वभागादधस्ता-
त्स्वच्छाम्भोभिः कुटिलगतिभिर्निस्सरन्त्यस्स्रवन्त्यः ।
स्थाणुव्रातो बृहदुपलसङ्घात आलोक्यतेऽत्र नि-
र्मग्नाः कृच्छ्रे तपसि मुनयो वा विभिन्नासनस्थाः ॥

38. क्षेत्रं यत्र भगीरथेन सुचिरं तप्तं जटालेन, य-
त्राकाशादमरापगाऽवतरति स्माधोऽवनेर्मण्डलम् ।

In Public domain. Digitization Muthulakshmi Research Academy

यत्राद्रेस्तनयाऽतपस्यदभवं प्राप्तुं पतिं निष्ठया
यत्रासूत षडाननं शरवणं तत्सर्वमैक्षिष्ट सः ॥

39. अत्रातपस्यन् बहवो मुनीन्द्रा नैकेऽयजंश्चात्र शतं क्रतूनाम् ।
प्रपूतमत्रत्यतृणदृषच्च धन्योऽहमस्मीत्यचिचिन्तदेषः ॥

40. किं शक्यमद्रेरमुकस्य दिव्यं महत्त्वमाख्यातुमपीश्वरस्य ?
द्रक्ष्याम्यहं श्वः प्रतिगत्य चित्राण्यत्रस्थितान्यद्य गृहं व्रजामि ॥

41. मध्याह्नार्केण सन्तप्तास्सूर्यकान्तशिला इह ।
चीत्कारं कुर्वतेऽत्यन्तं पतितैर्हिमबिन्दुभिः ॥

42. इति मत्वा गन्तुकामे तस्मिन्नीहारवारिणा ।
पादलेपो विलीनोऽभूद्यन्नजानाति भूसुरः ॥

43. उत्पित्सुः प्रवरः स्वपादयुगले व्योमोद्गमायाऽप्रभौ
सत्यात्मन्यवगत्य तां परिणतिं क्रूरां भृशं व्याकुलः ।
धिक् दुर्दैव! हिमाचलेऽत्र बत! विक्षिप्तोऽस्म्यहं योगिनो
व्याजाद्घोरतरे त्वगोचरपथे व्यालैर्महाभीषणे ॥

44. क्व मेऽरुणास्पदं? क्वाद्रिर्हिमवान् ? दृप्त आगतः ।
न दिशां वेद्मि तां हन्त ययाद्यात्र समागतः ॥

45. सिद्धासादितलेपलिप्तचरणोऽगत्वा कुरुक्षेत्रमा-
यावन्तीश्च गयाप्रयागमथुरावाराणसीद्वारकाः ।
सिंहव्याघ्रवराहकासरमुखैर्हिंस्त्रैर्मृगैस्संकुलं
प्रालेयाचलमागमं बत! मतिभ्रष्टाः खलु श्रोत्रियाः ॥

46. क्षणं न दृष्टे मयि शोकमग्नौ पिता च माता चरतः पुरीं मे ।
शोचेत्कियद्धर्मसती हताशा कियच्च शिष्याः परिदेवयेयुः ॥

47. किमभून्वतिथिसपर्या किम्भूतान्वग्नयश्च धिक्कष्टम् ।

In Public domain. Digitization Muthulakshmi Research Academy

अपसारितनित्यक्रिय आशान्ते पातितोऽस्मि हतविधिना ॥

48. नात्र किं दृश्यते कोऽपि महात्मा मार्गदर्शकः ?
इति मन्दं पुरो गच्छन् पश्यतीतस्ततो दिशाः ॥

49. पुरन्दरच्छेदितशैलखण्डद्वयस्य मध्ये द्युनदीप्रतीरे ।
अवैक्षतोद्यानवनं मनोज्ञं नानाविधैः पुष्पफलद्रुमैस्सः ॥

50. अवलोक्य प्रवरोऽसौ विचिन्त्य तेनाश्रमेण भवितव्यम् ।
वेद्यस्यात्पन्था इति किञ्चिदिवोज्छसितचेतस्कः ॥

51. अधित्यकायास्स उपत्यकाया वक्रैर्गतैर्निष्पतदापगायाः ।
तटाद्द्रुशाखा अवलम्ब्य कृच्छ्रं तत्रत्यमुद्यानवनं प्रविष्टः ॥

52. गन्धान्त्सारयतो दिशासु चतसृष्वम्भोरुहाणां भृशं
केदारस्य तटे रसालकदलीनारङ्गमुख्यद्रुमे ।
आरामेऽङ्गणलम्बमानजटिलद्राक्षागुलुच्छं समु-
त्कीर्णं रत्नशतैर्मनोहरतमं हर्म्यं व्यलोकिष्ट सः ॥

53. भवनस्यास्य सौभाग्यमीक्षमाणे महीसुरे ।
विस्मयाविष्टचित्तेन मन्दमन्दमुपेयुषि ॥

54. मृगमदसौरभसहितो द्विगुणितधनसारवीटिकागन्धः ।
स्थगयन्नन्यान् गन्धान् व्यसरत्कथयन् स्थितिं युवतेः ॥

55. सुगन्धिवातप्रसरेण तत्र जना वसन्तीन्यनुमीय विप्रः ।
उपेत्य तन्मन्दिरमैक्षताग्रे शम्पालताङ्गीं तरुणीं तु काञ्चित् ॥

56. तन्मन्दिरस्याङ्गणबालचूतवितर्दिकायामुपविश्य सैषा,
निक्वाणयन्ती तरुणाङ्गुलीभिः कुचोपरिष्टाद्विधृतां विपञ्चीम् ॥

57. श्राव्येण सम्मिश्र्य गलस्वरेण कुर्वत्सु तालङ्करकङ्कणेषु ।
प्रगायमानाऽर्धनिमीलिताक्षी श्रान्तेव केल्यां कुसुमायुधस्य ॥

In Public domain. Digitization Muthulakshmi Research Academy

58. नेत्राम्भोजयुगे निमेषरहितं विस्फारिते विस्मया-
न्नीलाब्जानि शतं सृजत्यविरलं तत्तारकायुग्मके ।
रोमाञ्चोल्लसिते च पीवरकुचद्वन्द्वे तरङ्गायिता
स्वीहास्वात्मनि तं ददर्श तरुणी विप्रं मनोजाकृतिम् ॥

59. सन्दृष्टे सुभगे पुरो झणझणन्मञ्जीरनादा वधू-
रेषोत्थाय निजासनाद्विचलिते मध्ये च वेणीस्तने ।
गत्वा पूगतरुप्रकाण्डकमुपाश्रित्य स्थिता कुर्वती
स्वालोकैरदसीयवर्त्मनि लसन्मल्लीसुमाच्छादनम् ॥

60. सङ्कोचात्प्रथमोत्थिताच्चपलया, विस्तीणया, सम्मदात्
भ्राम्यन्त्या, च भृशं मनोरथशतात्तद्रूपसंलाधनात् ।
उत्कम्पत्वमवाप्तयाऽतिनिकटात्संस्तब्धयाऽसौ दृशा
तन्वङ्गी प्रवरं तमीक्षितवती लावण्यपाथोनिधिम् ॥

61. सद्यस्तस्या युवते रङ्गे पुलकास्समुत्तस्थुः ।
मीनाङ्कानलसूचका धूमाङ्कुरा यथा बहुलाः ॥

62. पक्ष्मद्वन्द्वमुदस्य नेत्रयुगले विस्तृण्वति प्रेक्षणा ।
याक्राम्येन्मुखचन्द्रमेतदिति पञ्चास्त्रेण रेखाङ्किता ॥

63. किं सारङ्गमदो विलीय नवधर्माम्भः कणैस्तद्वधू ।
भालात्संस्रवति स्म गण्डफलकद्वन्द्वे मनोहारिणि ॥

64. दृशोश्चञ्चल्यं सम्प्रति शमयतिस्मानिमिषतां ।
नवस्वेदोऽस्वेदस्थितिमथ विमोहोऽतिमहितम् ॥

65. विबोधं गीर्वाण्या, मनसि नरचिन्तापरतया ।
नृधर्मेवाभूत्सा भ्रमर इव कीटस्सुरवधूः ॥

66. एतस्य रूपरेखा मुहुर्मुहुर्वीक्षमाणा सा ।

 In Public domain. Digitization Muthulakshmi Research Academy

स्मरसम्मोहनशस्त्रच्छिन्नमना इत्थमचिन्तयत् ॥

67. कोऽयं मोहनरूपविभ्रमगणैर्जेतुं प्रभुर्यक्षराट्
सूनुं सूनशरं, सूरेश्वरसुतं, सोमं, सुमश्रीकरम् ।
क्व ब्रह्मान्वयसम्भवः क्व च तनूलावण्यमेतादृशं
गृह्णीयाद्यदि मामयं मम भवेन्न क्रीतदासः स्मरः? ॥

68. अस्यास्यलावण्यजलप्रभूत पद्मे दृशौ द्वे अदसीयवक्षः ।
सिंहासनं चित्तभवस्य भातः स्कन्धौ वृषस्येव मनोहरौ च ॥

69. जाम्बूनदजम्बालेश्शाणोल्लीढस्य रेणुभिर्भानोः ।
मिश्रैर्धात्रा सृष्टं शरीरमस्यान्यथास्ति कथमीदृक् ॥

70. दृष्टचरास्सुरकिन्नरविद्याधरसिद्धसाध्यगन्धर्वाः ।
नार्हत्येकोऽप्येषामधिरोढुमनेन हन्त तुलाम् ॥

71. एवं चेतसि कुर्वती स्मरधनुर्ज्यामुक्तशाताशुगैः
पद्मे क्रूरतुषारवृष्टिभिरिव च्छिन्ने भृशं मानसे ।
निर्धूय ह्रियमात्मनस्सरभस शब्दायमानेषु त-
न्मञ्जीरेष्वभिगत्य वर्त्मनि तदग्रेऽस्थाद्यदाब्रूत सः ॥

72. का त्वं भीतमृगेक्षणे! प्रविचरस्येका वनेऽस्मिन्नहं
भूदेवः प्रवराह्वयोऽस्म्यभवमत्यध्वः प्रमादाच्चरन् ।
शैलेऽस्मिन् बत ! मूढधीर्जिगमिषाम्यस्मत्पुरं ब्रूहि मे
पन्थानं कृपया शिवं भवतु ते मत्पुण्यरूपिष्यसि ॥

73. इति कथयन्तं विप्रं लसदक्षियुगं विलोलताटङ्कम् ।
उच्छूनकुचं विचलितमध्यं प्रमदाह मन्दहासेन ॥

74. कां पन्थानमिहोपयाचसि वहन्नेतावती चक्षुषी ?
त्वं सल्लापयसीव कैतवतयैकान्तस्थितं यौवतम् ।
नैतावच्च, न वेत्सि वर्त्म किमु येनायास्त्वमेनं गिरिं?

In Public domain. Digitization Muthulakshmi Research Academy

निःशङ्कं परिपृच्छयाऽतिलघयस्यस्मान् कुतोन्यद्वचः ॥

75. नर्मगर्भं समाधाय सैवं निर्जरसुन्दरी ।
आभिजात्यं स्वचारित्र्यं वक्तुं प्राक्रंस्त सस्मितम् ॥

76. स्वसा नः कन्या या शशिनमनुजाताऽमृतनिधेः
कला गान्धर्वं नः कठिनदृषदो लीनयति या ।
स्मराम्नायाभ्यासः प्रथमवय आरभ्य च कृतो
भवत्यस्मच्छुल्कं सवनविधयो भूसुरसुत ॥

77. कल्पतरुच्छायेषु स्वर्णाद्रौ गोष्ठ्योऽस्माकम् ।
हरिहरविरिञ्चनसभा अस्मद्व्यायामशालानि ॥

78. शृणु! सुभग! नामधेयं वरूथिनी, किञ्च मे सख्यः ।
रम्भाहरिणीहेमातिलोत्तमाद्या भवन्ति सुरवेश्याः ॥

79. एतस्मिंस्तुहिनाचले बहुमणीदीपोल्लसत्कन्दरे
कस्तूरीरसगन्धवासितशिलापट्टे मनोहारिणि ।
अस्माकं वसतिर्नभोलहरिकाशीतानिलान्दोलितै-
र्गुच्छैस्सन्ततमिन्धयन्ति मदनं केलीवनान्यत्र नः ॥

80. अपुष्पचाप! स्मर वल्लभस्त्वं बन्धुस्सखाचासि गृहाण भक्त्या ।
प्रदत्तमातिथ्यमिहोपविष्टो विश्रम्यतामत्र मुहूर्तमात्रम् ॥

81. ग्लानं शरीरं भवतस्सुवर्णच्छायं मुखं निर्जितचन्द्रबिम्बम् ।
म्लानञ्च तापात्तरणेः पुनीहि मद्वेश्म विश्रम्य महीसुरेति ॥

82. विप्रोऽख्यद् युवते! तवातिथिविधिस्सर्वश्च मामागतो
नैव स्थेयमिहाद्य मे कथमपि प्रस्थेयमस्मद्गृहम् ।
अन्याऽनागतिरन्यथागतिरिरिति त्वं मास्मसंस्था भवद्
भक्त्याऽहं हृषितोऽस्मि धर्मचरणायेयामवश्यं गृहम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

83. गन्तव्यं कथमस्मदीयनगरं? दिव्यः प्रभावोऽस्ति वः
स्वःस्त्रीणां सकलं करामलकवद्धाभाति विश्वान्तरे ।
पन्थानं कृपयाम्ब ! दर्शय ममेत्याख्यायिनं भूसुरं
प्रोवाच स्मितचन्द्रिकाविलसितास्येन्दुस्सुपर्वाङ्गना ॥

84. पुरी पुरीत्येकविधं शिशुर्वोत्स्वप्नायसे ते पुरिकाकुटीरैः ।
तुलां भजन्ते न किमत्र रत्नदरीलताकुञ्जवनान्यमूनि? ॥

85. धात्रीसुरा! लमपगुह्य शृणोतु सत्यं लग्नं मनो मम भवत्यभिभूतकामे ।
किं मां जिघातयिषसि स्मरदारुणास्त्रैराश्लिष्य नन्दयसि पुष्पकुटीष्वमूषु? ॥

86. इत्युक्त आह विप्रः किमिदं वनजेक्षणे ! भवत्युचितम्? ।
कामयसे कृच्छ्रतपो व्रतनिष्ठान् ब्राह्मणान् विमृश! ॥

87. देवाराधनवैश्यदेवधरणीदेवार्चनाद्याह्निका-
न्युत्क्रान्तानि गतश्च भुक्तिसमयो, वृद्धे क्षुधार्ते पिता- ।
माता मार्गनिरीक्षणालसदृशौस्तस्तत्र चन्द्रानने !
अस्म्यग्न्याहित आगमोक्तविधयो लुप्यन्ति नेयां गृहम् ॥

88. इत्युक्तेषदिवापदीप्तिवदनाऽचख्यौ स्फुरद्रूप! ते
यातश्चेन्नवयौवनं श्रुतिगतैर्नानाविधैः कर्मभिः ।
सौख्यानान्तु कदानुभोगसमयस्सांसारिकाणां फलं
यागादेर्दिवि मादृशां खलु परीरम्भी मरुद्योषिताम् ॥

89. भोग्यान्यत्र परीक्षतां मम युवन् ! वस्तूनि कस्तूरिका
कर्पूरो, हिमवारि, नैकविधपुष्पौघो भृशं गन्धिलः ।
सञ्जातानि, फलासवानि च सुपर्वानोकहेभ्यो मणी
भूषा रम्यतरां शुकानि च मया रंरम्यतां तैस्सह ॥

90. यथा दिवान्धः परिहृत्य दूरे सूर्यातपं शैलगुहां प्रयाति ।
विहाय गन्धर्ववधूरतं त्वं तुच्छं कुटीरं तव गन्तुकामः ॥

Public domain. Digitization Muthulakshmi Research Academy

91. प्राप्यः स्यात्कतिभिर्जनुर्भिरिह पुष्पास्त्रस्य शातेषुभिः ।
क्लिष्टायाः करशायितापगतरुङ्ख्या दृशोऽश्रुप्लुताः ।।
कुर्वत्या, अतिदीनदृष्टिमभितो व्यापारयन्त्याः परी-
रम्भः स्वप्रियगात्रमारुतलवस्पर्शाच्च लीनात्मनः?

92. चान्द्रायणोपवास व्रतनियमैरिन्द्रियनिरोधैः ।
कृशितः क्रशयसि जीवं सशरीरस्वर्ग आयत्ते ।।

93. एवं ब्रुवतीं युवतीं प्राह प्रवरस्त्वदुक्तमुपदेशम् ।
काम्यर्हति नाकामी यदि वेत्स्याऽऽवेदयाध्वानम् ।।

94. बतेन्द्रियग्रामहृतात्मचित्तो विमार्गनेतुर्मदनस्य बाणैः ।
उन्मादनैर्वक्रपथेन गच्छन्नधः पतद्ब्रह्मसुखाद्बुधोऽपि ।।

95. तिरस्कृताप्येवमनेन तन्वी पुङ्खानुपुङ्खैर्व्यथिता स्मरास्त्रैः ।
सौन्दर्यदर्पेण विलासशस्त्रैर्जिगीषुरास्येऽस्य दृशः प्रसार्य ।।

96. कैश्यं कङ्कणनिक्वणैः करलताद्वन्द्वेन सङ्बध्नती
दृश्येते स्वकुचौ यथा पृथुतरौ संख्यानमुद्धून्वती ।
व्याजेन त्रिवलीनितम्बजघनं सन्दर्शयन्ती, मुहु-
र्भ्रूकुट्या स्वसरवीरुपागतवतीस्सन्तर्जयन्त्याह तम् ।।

97. यस्मिन् रागात्सजति हृदयं, कुम्भदीपो यथास्या-
द्यस्मिन्नकायनमुपरतस्वप्रसङ्गानि यस्मिन् ।
वाचातीतं सुखमनुभवन्तीन्द्रियाण्येष एव
ब्रह्मानन्दः किल, नहि परश्चिन्त्यतां ब्रह्मवादिन् ! ।।

98. ईदृक्तर्केण स्वं प्रतार्य वश्यं चिकीर्षन्त्याः ।
श्रुत्वा वचो जुगुप्सा विकटस्मितवदन आह तां स यथा ।।

99. पाण्डित्यं महदीदृशं क्वचिदपि प्रैक्षिष्महि त्वां विना? ।

In Public domain. Digitization Muthulakshmi Research Academy

प्राचार्येव विवृण्वतीह *वदसे त्वं कामशास्त्रे वधु ! ॥
पापाय श्रुतिधर्ममार्ग इति पुण्याप्त्यैरतिश्चेत्यहो ।
व्याख्येदृक्किल मोक्षशास्त्रवचसां वस्सम्प्रदायागता ॥

100. शक्यं किं तव वेदितुं शशिमुखि ! प्रातश्च सायं हुतै-
स्तृप्तेनानलदैवतेन कृपया दत्तानि सौख्यानि? मे ।
वस्त्वन्यन्नहि रोचतेऽरणिकुशाग्न्यादीन् विना स्यात्तु किं
गात्रं? नार्हसि तुच्छमीदृशसुखं वक्तुं लघीयस्तमम् ॥

101. निर्विघ्यालमहं क्षणं नहि सहे मा मां निरुन्धीत्यसौ
विश्लिष्टे सति नीविबन्ध, उदिते रोमाञ्चने गात्रके ।
विस्रस्ते कबरीभरे, निपतितेषूर्व्यां प्रसूनेषु नि-
श्श्वासेषु प्रसरत्सु कामविवशा तस्मिन्नपप्तद्वधूः ॥

102. स्तनाभ्यां पीनाभ्यां निबिडमुपगुह्याधरसुधा
प्रपाणोद्युवताया मवनिसुर उत्क्रोश्य भगवन् ।
हतोऽस्मीत्यावर्त्य स्ववदनमपावर्तं यदमू
न धीराणां चित्तं विकलयति कान्ताकुलकला ॥

103. क्षिप्तैवं ह्रीताऽसौ प्रमदावस्थाय नातिदूरेऽस्य ।
धृतवेण्युज्ज्वलगात्र द्युतिः कृतभ्रूकुटिराह रुद्धगला ॥

104. एवं स्त्रीं सुमकोमलां क्षिपसि धिक्त्वां दुर्जनं क्षेपणा
द्विद्धाहं नखरेण तेऽत्र निशितेनेदं परीक्षस्व! मे ।
इत्युन्नीय कुचांशुकं स्वरबला सन्दर्श्य पीडाच्छले-
नारोदीत्कलनिस्वनं पतति बाष्पाम्भस्युरोजद्वये ॥

105. एवं रुदती सकरुणमसौ यथा नयनपुण्डरीके स्वे ।
बत ! क्रोकनदायेते पुनरपि तं वीक्ष्य निश्श्वसत्याह ॥

106. यागाः कृताः कृच्छ्रातपः कृतं चेत्यात्थस्म सिध्यन्ति न तानि तस्य ।

© Public domain. Digitization Muthulakshmi Research Academy

यो निर्घृणो भूतदयामतिर्हि यज्वा, तपस्वी, नहि वेत्सि मूढ ! ॥

107. किं दाशकन्याप्रणयेन विप्रैर्बहिष्कृतोऽभूत्स पराशरर्षिः ? ।
किं मेनकाया ग्रहणेन लुप्त धर्माऽभवद्गधिसुतो मुनीन्द्रः? ॥

108. मन्दप्रभावः किमु मान्दकर्णिस्स्वर्वैश्यकन्याजनकामुको यः ।
देवैरहल्याविट इन्द्र आसीद्विभ्रंशितो दैवतराज्यपीठात् ? ॥

109. महत्तरोऽसि त्वममीभ्य आहो ये तापसाः पर्णफलानिलाशाः ।
कौपीनमात्र परिधायिनस्ते न पाददासास्तरुणीजनस्य ? ॥

110. नकिमप्युक्त्वा प्रवरस्तस्याःस्पर्शेन वासितं वक्षः ।
प्रक्षाल्याम्बुभिराचम्यास्तावीद्गार्हपत्याग्निम् ॥

111. त्वद्रूपेण मुखेन निर्जरगणो भुङ्क्ते कणेहत्य भो-
स्त्वामीशं श्रुतयः स्तुवन्ति बहुधा त्वं लक्ष्यसेऽन्तस्थितः ।
विश्वस्याहवनीयदक्षिणपदख्याताग्नियुग्मं भव-
त्सञ्जातं गृहदेवतेऽव ! भगवन् ! स्वाहास्वधावल्लभ ! ॥

112. यद्येषोऽस्मि जपाग्निहोत्रपरतन्त्रात्मा भवत्पादभ-
क्त्याविष्टश्च पराङ्गनापरधनालोलश्च यावद्रविः ।
नो निर्मज्जति पश्चिमे जलनिधौ मां प्रापयास्यद्गृहां-
स्तावत्क्षिप्रममुं दिगन्तपतितं कारुण्यवारान्निधे ! ॥

113. यावत्स्तुतोऽग्निः प्रवरस्य गात्रं तावत्प्रविश्योज्वलयाञ्चकार ।
सन्ध्याप्रभामण्डलसंवृतो वा भानुर्बभासेऽवनिदेवपुत्रः ॥

114. लिम्पन् दिशास्तप्तसुवर्णदीप्तीः स्वाङ्गस्य लब्धेन महाजवेन ।
सद्यस्समुक्षिप्त इयाय गेहं तस्यामुदश्रु प्रविलोकयन्त्याम् ॥

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

भर्तृहरिचरितम्

In Public domain. Digitization Muthulakshmi Research Academy

शीर्षिका

आस्तां द्वौ भर्तृहरिनामानौ। सुभाषितत्रिशतीकारो वाक्यपदीयकारश्च। प्रथमो वैदिकविद्वान् राजा च । द्वितीयस्तु बौद्धविद्वान् ।

राजा भर्तृहरिः क्रीस्तुशकस्य षष्ठशतकात्पूर्वे पञ्चमशतकस्य द्वितीयार्धे बभूवेति त्रिशती (आन्ध्र) ग्रन्थपीठिकाकाराः श्रीतेवप्पेरुमाळ्ळय्यमहोदयाः ।

किञ्चायमुज्जयनीराजवंश्य इति, विक्रमादित्यस्य ब्रह्म-क्षत्रिय-वैश्य-शूद्रकलत्रेषु ब्राह्मणी, भानुमती, भाग्यवती, सिन्धुमती, नामसु चत्वारः पुत्राः क्रमशः वररुचि-विक्रमार्क-भट्टि-भर्तृहरिनामानो जाता इति प्रतीतिरस्तीति तैः पीठिकाकारैः कथितमस्ति।

किञ्चास्मै राज्ञे कश्चिद्विप्र आत्मनोपलब्धमजरामरत्वहेतुकं किमपि फलमुपाहरदिति स राजा तत् स्वरावङ्ग्यै, सा स्वविटाय, स च स्वविट्यै, सा च चिरात्तत्सङ्गममभिलषन्ती तस्मै राज्ञे प्रहितवतीति, राजा विदितफलवृत्तान्तो निर्विण्णः संसाराद्विरक्तो योगी बभूवेति श्लोकेनानेन ज्ञायत इति च कथितम् ।

यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मात्कृते च परिसर्पति काचिदन्या
धिक् ताञ्च तञ्च, मदनञ्च, धिगिमञ्च माञ्च ।।

कालाद्बहोः पूर्वं मयैतदितिवृत्तकं सिनिमा दृश्यं च दृष्टम् ।

* * * * *

Public domain. Digitization Muthulakshmi Research Academy

भर्तृहरिचरितम्

1. सन्दृश्य महाराजं भर्तुहरिं कोऽप्यकिञ्चनो विप्रः ।
अञ्जलिबन्धे किञ्चन फलं ससर्प्याशिषं प्रयुज्यास्मै ॥

2. उवाच राजन्! क्षुधिताय मह्यं केनापि दत्तं कृपया मुनीशा ।
अदःफलं यद्भवतेऽर्पितं त्वन्नान्योऽर्हतीदं मदुपायनं भोः ॥

3. जरया च मृत्युना च स्पृष्टो नस्यात्फलस्य भोक्ताऽस्य ।
अमुना मे किं कार्यं परमदरिद्रस्य दुःखकृता ॥

4. द्वाराद्द्वारमटन् प्रयच्छ! कृपया भिक्षामिति प्रार्थयन्
तैस्तैर्विप्रकृतो निकारवचनैर्दग्धोदरः पीडितः ।
शीतोष्णेन च धूलिधूसरतनुः कौपीनमात्रं दधद्
दीनास्यो विचरन् लभेऽहमजरोऽमृत्युश्च कीदृक् सुखम् ॥

5. अभाग्यदेव्यात्मजानां वरं मृत्युर्हि मादृशाम् ।
प्रशाम्येल्लोकपीडा या भिक्षाकैः क्रियतेऽनिशम् ॥

6. राजन्! भवानर्हति दिव्यमीदृशं फलं द्वितीयः किल लोकबान्धवः ।
आश्रित्य भावत्कमहातपत्रक-च्छायां चिरं सौख्यभवाप्नुयुर्जनाः ॥

7. उदितोऽमंस्त नृपालश्चिरलोकाराधनाय दिष्ट्या मे ।
लब्धोऽवकाश इति तत्फलं गृहीत्वा दृशावुपस्पर्श्य ॥

8. फलस्यैतस्य नास्त्यन्यत्सदृक् प्रतिफलं भुवि ।
ददे किञ्चित्तथापीति प्राददा*त्पौरुषं धनम् ॥

9. स्वप्रियया सह भोक्तुं फलं तदजरामरत्वहेतु सः ।
प्रीत्या प्रैष्याऽमुष्यै शुद्धान्तगृहं जगाम भर्तुहरिः ॥

10. राज्ञीराज्ञोर्गात्रे भिन्ने असवश्च हृदयञ्च ।

* "पुरुषहस्तिभ्यामण् च" पुरुषः प्रमाणं यस्य पौरुषम्

 In Public domain. Digitization Muthulakshmi Research Academy

श्वासाश्चाभिन्ना इति लोकाश्शंसन्ति शतमुखैस्तौ द्वौ ॥

11. भर्तारं महिषी ब्रवीति पुरतः स्मेरानना भूरिशो
भुक्तश्चेद् भवता मया च तृपितं भुक्तं यथाऽवेक्षितम् ।
चेत्किञ्चिद्भवता मयेक्षितमिव स्यात् संश्रुतं चेत्त्वया
स्यादेतच्च मयापि संश्रुतमिव प्रेयन्निति प्रेमिणी ॥

12. भर्तुः पदाब्जे नमति प्रबुद्धा प्रातस्समाराध्यति तस्य चित्रम् ।
करोति चोत्स्वप्नकथाः प्रसुप्ता श्रुत्वा प्रहर्षं भजते यथाऽसौ ॥

13. नवियोगं पत्युरसौ सहते न पुरा कदापि भुङ्क्तेऽन्नम् ।
नालङ्कुरुतेऽमूल्यैर्दुकूलभूषादिभिर्वियोगेऽस्य ॥

14. निपीड्य पत्युश्चरणौ वधूस्सा निद्राति तस्मात्प्रतिबुध्यते प्राक् ।
तन्नाम सङ्कीर्तयति प्रवेश्य गेये विपञ्च्या स यथा प्रहृष्येत् ॥

15. भागवतमिव स्वपतेः करोति पारायणञ्चरितमेषा ।
विलिखति च नामकोटिं तस्य श्रीरामनामकोटिमिव ॥

16. विनिवार्यासौ दासीदासं वरिवस्यति स्वयं भक्त्या ।
पतिमस्योच्छिष्टान्नं भुङ्क्ते भगवत्प्रसादमाख्यान्ती ॥

17. प्रत्युद्गम्यागन्त्रे नत्त्वा प्रक्षाल्य पादपद्मयुगम् ।
शिरसि निषिञ्चति पिबति च सलिलं निर्माष्टि वाससा चरणौ ॥

18. भवितव्यं पूर्वस्मिन् जन्मन्यमुया विदेहराट् पुत्र्या,
सावित्र्यारुन्धत्या वा राज्ञ्येति स्तुवन्ति सर्वेऽपि ॥

19. तस्यां स्वस्य स्नेहात् स्वस्मिंस्तस्याश्शतगुणस्सः ।
इति शाम्यति पाप्माऽस्या नामस्मरणेन चेति मनुते राट् ॥

20. राज्ञे प्रत्युद्गम्य, स्वान्तः पुरमागताय तन्महिषी ।
करविभ्रमभङ्ग्या तन्मुखं परिष्कृत्य संश्लिष्टा ॥

In Public domain. Digitization Muthulakshmi Research Academy

21. वश्यौषधिभिस्तस्या मधुरैराश्लेषचुम्बनालापैः ।
सम्मूढस्सन् राजा व्यास्मार्षीत्फलस्य वृत्तान्तम् ॥

22. अपरेद्युः पृष्टाह व्यस्मरमहमपि निवेद्य देवाय ।
आवां श्वो भोक्ष्यावह इति समुचितमित्यमंस्त राजा च ॥

23. परोक्षे तस्याः संस्मरति फलवृत्तान्तमधिपः
समक्षे मत्तो विस्मरति तरुणीविभ्रमगणैः ।
अपि प्राज्ञो धोमान् न भवति नृपः प्रस्तरसमः
प्रहर्षस्पर्शैर्यो नहि विकृतिमाप्नोति किमपि ॥

24. शीर्षदघ्नै राजकार्यै विभ्रान्तो व्यस्मरन्नृपः ।
फलोदन्तं मद्यपीतः पूर्ववृत्तमिव क्रमात् ॥

25. कदाचिद्देव्येषा निजभवनवातायनगता,
व्रजन्तं हस्तेनाधृतकुसुमचापं मनसिजम् ।
विटं वीथ्यां व्यालोकत सपदि तत्स्वान्तमवशं
निचोलं निर्भिद्य द्रुततरमधावीदमुमनु ॥

26. अनिमिषनयना ललना, मोहावर्तभ्रमैर्विवशचेताः ।
प्रैक्षत तमङ्गभङ्गं कुर्वाणोच्छूनपीनवक्षोजम् ॥

27. रसवद्रसालफलमिव, सुधाकलश इव च गोचरोऽभूत्सः ।
यस्मिन्निगाढलग्ना दृष्टिः कील इव नायाता ॥

28. अपहृत्य मनस्तस्या व्यतीत्य दृष्टिं ययौ स बहुदूरम् ।
अनुधावन्त्या दूत्या प्राप्तो नासीदसौ चोरः ॥

29. महिषीहृच्छोरस्य स्यान्तान्त्वपहृत्य काऽपि चोरी द्राक् ।
याता वनं जिघृक्षुर्यां दूरपदैस्स याति स्म ॥

30. स प्रत्यायातीति प्रतीक्षते स्म स्थिता सहस्राक्षी ।

 In Public domain. Digitization Muthulakshmi Research Academy

राज्ञो दारास्तत्रैवातिचिरं सम्भृतोत्कण्ठा ।।

31. अन्येद्युः कथमपि दृग्जाले लग्नं विटं शुकं बद्ध्वा
शयनगृहपञ्जरे सा निर्विशति स्मानिशं स्मरक्रीडाः ।।

32. तत्कुट्टन्यां तत्राधीयानायां स्मरश्रुतेर्मन्त्रान् ।
सुरभिलसुममाङ्गल्यं बबन्ध राज्ञ्या गले स विटराजः ।।

33. मुहुर्मुहुश्चुम्बति तं हसन्ती राजासि राज्ञ्या रमसेऽन्यथा किं?
इति ब्रवीत्यर्थयते निजास्रं तदानने न्यस्य च चर्विताय ।।

34. नटत्यहं नटीत्येषा गायनीति च गायति,
विलासिनीति कुरुते विलासान् विटसन्निधौ ।।

35. जनुषोः पुराणयोस्त्वं चन्द्रस्तारावधूरहं प्रेयन् !
नलकूबरस्त्वमस्मि च रम्भाः सम्बन्धितावयोर्न नवा ।

36. राज्ञोऽहं सावित्री विटी तवास्मि मम कौशलं पश्य ।
शतवदनैस्तुत्याहं किमस्मि वा नास्मि वा ब्रूहि ।।

37. एवमसूर्यम्पश्या राज्ञी न विजानती दिवारात्रम् ।
रमते स्म तेन साकं विटेन शुद्धान्त एकान्ते ।।

38. स्वैरक्रीडाः स्वस्या न ज्ञायन्ते यथा लौकैः ।
निपुणं प्रवर्तते स्म प्रमदा सम्मानिता च भर्त्राऽभूत् ।।

39. स्वस्यां प्रीत्या पत्या दत्तं यत्तत्फलं निगुह्यैषा ।
तस्मै विटाय दत्त्वा दष्ट्वार्धं यच्छ मह्यमित्याह ।।

40. पुनः फलस्यास्य महाप्रभावं तदागमं भर्तुरमुष्य काङ्क्षाम् ।
आवेद्य साऽब्रूत फलं तदेतन्निह्नुत्य तुभ्यं प्रददे प्रियेति ।।

41. तया तथा स्निग्धहृदा महिष्या सोऽप्यश्नुवानो बहुदिव्यभोगान् ।
स्वचेतसा काङ्क्षति तां लताङ्गीं वधूर्नवोढा प्रतिवेशिनी या ।।

In Public domain. Digitization Muthulakshmi Research Academy

42. मनोज्ञे प्रासादे मृदुलसुमतल्पात्स मनुते
वरं भूशय्यां निश्यतिशितशिलाकण्टकमयीं ।
बहिःक्षेत्रे गोष्ठं बहुकृमिमलव्यापृतमपि
क्षणं विट्याः केली रमयति महिष्या अपि च तम् ॥

43. चकार चित्ते स फलं गृहीत्वा इदं ददामि प्रतिवेशिवध्वै ।
निरस्य दूरादितरान्विटान् या स्निग्धा मयि स्याद्रमते मयैव ॥

44. इति मत्वादायऽफलं त्वायास्यामि श्व इति स कृतशपथः ।
निरगच्छत्संश्लैषैर्मुहुर्मुहुश्चुम्बनैस्तया प्रहितः ॥

45. गत्वा पक्षद्वारं प्रतिवेशिन्या दृशाऽऽहूय ।
युवतीं सन्दर्श्य फलं प्रोच्य च महिमानमुत्क हृदयां ताम् ॥

46. स आह भुङ्क्त्वा फलमेतदावां जित्वा जरां मृत्युमपि स्थिरेण ।
*प्रायेण दीप्तावमराविव प्रसूनास्त्रकेलीर्वधु! निर्विशाव ॥

47. फलं गृहीत्वा स्मितसुन्दरास्या संश्लाघ्य गाढं प्रणयं तदीयं ।
स्वस्यां समाश्लिष्य गलं कुचाभ्यां निष्पीड्य पीत्वाधरमास्यमाघ्रात् ॥

48. आयाह्यशावेदमिति ब्रुवाणं सा प्राह भर्तास्ति गृहे स पश्येत् ।
आयाहि! सायाह्नि लतानिकुञ्जं विस्रम्भणस्थानमशाव यत्र ॥

49. पृष्टा दिवा तत्फलभोजनं सा ब्रवीति रात्राविति रात्रिपृष्टा ।
दिवेति चागामिनि पर्वणीति मिथ्याप्रसङ्गैः परिलोभयन्ती ॥

50. मम पत्युश्शपे प्राणैः श्वश्व्रास्तव च विश्वसेः!
भोक्ष्यावहे सरस्तीरे सन्ध्यायामिति वक्ति सा ॥

51. पृष्टा परेद्यवि पुनः सभ्रभङ्गं फलं दत्वा
धिक् त्वां मां मागम इति वक्त्रीं प्रणिपत्य सान्त्वयामास ॥

---

* प्रायो वयसि बाहुल्ये तुल्यानशनमृत्युषु वैजयन्ती ॥

In Public domain. Digitization Muthulakshmi Research Academy

52. पृष्टा पुनश्च विमुखी निरस्यति स्वमिति शङ्कमानोऽसौ
तदनुग्रहमभिकङ्क्षन्नुपाचरत्तां गतफलाशः ॥

53. कनकाम्बराणि यच्छति मणिभूषाः पुष्पमालाश्च ।
मानोपशान्तयेऽस्यै संस्पर्शेनापि तृप्यति च सततम् ॥

54. फलं यदा हस्तगतं तदादेर्वधूर्नृपायोपजिहीर्षुरस्ति ।
दूतीभवद्योजयते किल स्वां तेनेति काष्ठागतकाङ्क्षितेन ॥

55. महिषीपदाभिषिक्ता, भवितास्मि, क्रीतदासस्स्यात् ।
राजा ममावरोध स्त्रियो भविष्यन्ति किङ्कर्यः ॥

56. कवयस्तुवन्ति सीतां सावित्रीमिति च मां स्पृशेच्च नभः
प्रभुता ममेति हृदये कृत्वा लेखं लिलेख यथा ॥

57. राजन्! अजरामरता कारणमेतत्फलं भवानर्हः ।
मम शुश्रूषाप्रीतो ददाविदं कोऽपि यतिवरो मह्यम् ॥

58. पुण्यश्लोकोऽत्र भवान् शास्त्वजरामर उपात्तधर्मपथः ।
राज्यं यथा प्रजास्ते विन्देरन्नमरलोकसौख्यानि ॥

59. अमुना फलेन साकं यौवनरूपं फलं मदीयं च ।
भुञ्जीथा मधुरतरं धर्मं कामञ्च भुंक्ष्व! समवृत्त्या ॥

60. भ्रमरास्पृष्टं कुसुमं नखराकृत्तश्च पल्लवः किञ्च ।
नास्वदितं माकन्दं प्रायो गुप्तो ममार्पिपिषया ते ॥

61. इति विलिखितलेखं तत्फलं च दत्वा स्वकिङ्करीमेते ।
राज्ञे यच्छेत्युक्त्वा राजामन्त्रणमवेक्षते स्म वधूः ॥

62. दुकूलवासा रमणीयभूषा सुगन्धिगात्री कृतपुष्पवेणी ।
शोणाधरा चारुविशेषका च सज्ञाभिसर्तुं नृपतिर्वितस्थे ॥

63. सन्दृश्य महाराजं भर्तुहरिं किङ्करी नत्त्वा ।

In Public domain. Digitization Muthulakshmi Research Academy

स्वनिचोलनिहितलेखं फलं च तस्मै समर्पयामास ॥

64. दृष्ट्वा फलं तदीयं महिमानं लेखतो विदतः ।
तस्य स्फुरितश्चित्ते प्राक्फलवृत्तान्त उर्वरिन्द्रस्य ॥

65. अभून्मनस्यस्य फलं तदेव वैतत्किमन्यद्भवतीति शङ्का ।
राज्ञ्यास्सकाशं प्रजिधाय दूतान् फलद्वयालोकनलालसात्मा ॥

66. प्रत्यागत्य भटास्ते व्याजहरुस्तन्न दिव्यफलम् ।
कृमिणञ्च पूतिगन्धि च जातं दूरेऽपसारितञ्चेति ॥

67. विचिन्तयामास नृपो यथादौ यतिः कुतो वञ्चयते स्म विप्रम्?
एतत्फलं दिव्यमितीदमस्यै केन प्रदत्तं कुहनापरेण? ॥

68. स एव वा विभिन्नो वा यतिर्योऽस्या अदात्फलम्?
इमामह्वाय्य जानामि आह्वायेयं ततो यतिम् ॥

69. कुतोद्ययावन्महिषी फलस्य नावेदयामास कथामिमां माम्?
आह्वाय्य धूतौ यमिनावुभौ च दण्ड्यौ करोमीति निरीक्ष्य दूतीम् ॥

70. हञ्जे! व्रज! ते प्रभ्वीं ब्रूह्यागच्छेत्युवाच हरिणीव ।
उत्प्लुत्य गतोचे या नृपवचनं येन हृष्टा सा ॥

71. फलितः काम इति वधूरुपदामुचितां प्रदाय दूत्यै सा ।
मुकुरे संस्कृत्य मुहुर्मुहुश्च नेपथ्यमुत्तरङ्गितहृत् ॥

72. यान्ती चिन्तयते स्म चेतसि पतिर्मां दृष्टमात्रां द्रुतं
प्रत्युद्गम्य करेण मे करलतां गृह्णन् स्मितैर्भाषितैः ।
प्रासादोपरिहंसतल्पशयनं नेष्यत्यथैनं स्मर
क्रीडालोलमतिं करोमि ललितैर्मुग्धैर्विलासैर्मम ॥

73. कियती मात्रा राज्ञी कटाक्षजाले ममास्त्यपतितः कः?
हरिणः? क्रीतं दासं करोमि तृट्यैव राजरत्नमिति ॥

 In Public domain. Digitization Muthulakshmi Research Academy

74. दृष्टमात्रां नृपः कान्तामुपसृत्याब्रवीद्यथा ।
भद्रे! फलं कुतः प्राप्तं प्रहितं यत्त्वयाद्य मे ॥

75. इति पृष्टा भग्नाशा सम्भ्रान्तमनाः स्खलद्वचास्तन्वी ।
दत्तं प्रियेण तदिति । प्रोच्याह पुनर्ननेति मुनिनेति ॥

76. स्खलितं वचनं श्रुत्वा सान्तर्हासो नृपोऽब्रवीत्तरुणि!
प्रथमं प्रियं परीक्षे मुनिं ततश्चेति किङ्करं व्यसृजत् ॥

77. आमन्त्रणं ह्यकाण्डे राज्ञोऽनपराधिनं च कम्पयति ।
अन्तः पुरापराद्धो विगलितहृदयः पतेन्न निश्चेष्टः? ॥

78. पश्यंश्च भीतभीतः स्विन्नाङ्गो गलितहृदयश्च ।
स्खलिताङ्घ्रिर्निश्वसितैस्तिष्ठंस्तिष्ठङ्कथञ्चिदायातः ॥

79. फलवृत्तान्तं पृष्टो राज्ञा मूक इव रुद्धकण्ठो वा ।
स्थाणुप्रायश्च विटस्तूष्णीमासिष्ट किमपि चानुक्त्वा ॥

80. यदि ब्रूयास्सूनृतं त्वं मुवतःस्या बन्धनान्मम ।
दण्डमर्हस्यन्यथेत्युवतोप्योष्ठं न ह्यचीचलत् ॥

81. फलं तत्कृमिणं पूतिगन्धि दूरेऽपसारितं ।
असौ तत् स्तेनयामास इति वक्तुं न शक्यते ॥

82. आवेदयति मूकतास्य फलसम्बन्धिनीं कथां ।
जानातीति फलं त्वेतत् तदेवेति विभाति मे ॥

83. यथा नयेन कार्यस्य सिद्धिनैव भयेन हि ।
ततो दत्त्वाऽभयं वेद्मि सत्यमित्यवनीपतिः ॥

84. तस्य स्कन्धे करं न्यस्य माभैषीर्वद! सूनृतं ।
विमुञ्चाम्युपहृत्येति सान्त्वयामास तं विटम् ॥

85. बहुशः पृष्टस्स विटस्सगद्गदं स्वस्य सौहृदं वध्वा ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रतिवेशिन्या राज्ञ्याः स्नेहं फलवृत्तमानुपूर्व्याह ॥

86. पुनरप्यवदद्राज्ञ्या यस्स्मरलेखःकृतः कृतं दूत्या,
यद्दूत्यं च ससाक्ष्यं क्षुब्धे जलधाविवास्य हृदि राज्ञः ॥

87. गूढमपि जारवृत्तं शनैःशनैरुद्गतं बहिः ककुभः ।
विसरति भूयोभूयो दुर्गन्ध इव नहि निह्नुतं भवति ॥

88. आहूता महिषी तत्रायाता तत्फलञ्च विटं ।
दृष्ट्वा प्रकाशितं निजरहस्यमिति संक्षुभितमनास्तस्थौ ॥

89. पृष्टः फलवृत्तान्तं विटो महिष्या प्रदत्तमित्याह ।
पप्रच्छ नृपो राज्ञीं मूकव्रतदीक्षितावतस्थे या ॥

90. क्रुद्धोऽक्रन्दद्राजा रण्डे! मायाविनी भवसि कियती?
हण्डे! धिक्त्वां धिक्त्वां शीर्षच्छेद्यासि पापिनीत्युच्चैः ॥

91. ता दूषणोक्तीरवकर्ण्य नैव गाढावगाढस्य हि शीतदोषः ।
इति प्रघृष्यात्मनि राजदाराः समुन्नमच्याननमाहुरेवम् ॥

92. आविष्क्रियते चित्तं स्त्रियाः शृणु! त्वं पतिमतिविनयेन ।
शुश्रूषते हि कुलटा ह्यतिविनयो धूर्तलक्षणं प्राहुः ॥

93. [१]ऊर्वश्याहस्म पतिं पुरूरवसमङ्गनास्स्नेहं ।
माश्रद्धेहि! स्थिरमिति युवतेर्हृदयं मृगादनस्येति ॥

94. [२]अभिहितमिन्द्रेणापि च न स्त्रीचित्तस्य कोऽपीष्टे ।
प्रकृतिश्चलाचलाऽस्या इत्याम्नाये न वेत्सि त्वम् ॥!

१.ऋग्वेदीय दशममण्डले ९५ (with women there can be no lasing friend-ship? Hearts of hyenes are the hearts of the women) Treatment of love.

२.ऋग्वेदीयाष्टम मण्डले ३३-१७ (Indra declared the mind of a woman was ungovernable and her temper fickle) Treatment of love.

In Public domain. Digitization Muthulakshmi Research Academy

95. औदुम्बराणि पुष्पाणि श्वेतः काकश्च दृश्यते ।
मत्स्यपादो जले दृश्यो नारीचित्तं न दृश्यते ॥

96. स्त्रीणां चित्तं भाग्यं पुरुषस्य च वेत्ति नेश्वरोऽपीति ।
प्राहुः किल वेत्ति कथं तदधरपीयूषमुग्धहृद् भर्ता? ॥

97. स्त्रियो निसर्गनिपुणाः पटवश्चाप्यशिक्षिताः ।
भित्तिः स्त्रिया मृषावादो जालं पुंसः इतीर्यते ॥

98. सुभगायां दृष्टायां पुरुषस्य यथैव सन्दृष्टे ।
सुभगे युवतेश्च मनः शिथिलं सम्भ्रान्तपाकुल च स्यात् ॥

99. चन्द्रं प्रेक्षितवत्यास्ताराया दृष्टवत्याश्च ।
शक्रमहल्यास्त्वं पवित्रशीलं परीक्षस्व!

100.श्वेतकैतौ दृष्टमात्रे लोकमाताब्धिकन्यका ।
पुण्डरीके कृतार्थाऽभूदिति किन्न श्रुतं त्वया?

101.न साहसं सङ्कभीत्या कुरुते का सुरूपिणम् ।
दृष्ट्वा मनो निगृह्णाति? ललना न शिला किल ॥

102.घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान्
इत्याहुस्सुन्दरं वीक्ष्य कथं स्त्री न विलीयते? ॥

103.पुरुषादपि कामिन्या अष्टगुणः काम इति बुधाः प्राहुः ।
झञ्झामरुत इवास्योज्रृम्भणमबला कथं निगृह्णीयात्?

104.पापेनाहं प्रकाशास्मि पुण्येनान्तः पुरे तव ।
अप्रकाशास्सन्ति साध्व्यः *स्त्रीस्वभावो हि चापलम् ॥

105.इयं निगूढा प्रमदाजनस्य आविष्कृतास्ति प्रकृतिर्मयाद्य ।
विद्वानपीमां न विबुध्यसे त्वमधः प्रदीपस्य तमोऽस्ति सान्द्रम्॥

* Fraility thy name is woman (Hamlet)

Public domain. Digitization Muthulakshmi Research Academy

106.श्रुत्वैतन्नृपतिर्व्यचिन्तयदियं रण्डापि पूज्या मम
प्राचार्येव वधूस्वभावमतिविस्पष्टं समावेदयत् ।
स्वीयं शीलमसौ समर्थयितुमेवाहैवमुर्व्यां न किं
सावित्री जनकात्मजा प्रभृतयस्साध्व्यः सहस्रं स्त्रियः?

107.रामायणं रागिवृत्तं बन्धकीनान्तु भारतं ।
वृत्तमाख्यान्त्यमूदृश्यः पापिन्यः कुलटाङ्गनाः ॥

108.यां चिन्तयामि सततं मयि सा विरक्ता साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।
अस्मत्कृते च परिसर्पति काचिदन्या धिक्तां च तं च मदनं दिगिमाञ्च माञ्च ॥

109.न जानाति पतिर्भार्या दौश्शील्यमितरे यथा ।
स्नेहान्धेन तु चित्तेन साध्वीं चिन्तयते हृदि ॥

110.स्नेहस्स्त्रियाश्च हन्त श्रियश्च गन्धर्वनगरलेखेव ।
सन्निव हि लक्ष्यतेऽसा वसन्नपि च चित्तविभ्रमं कृत्वा ॥

111.स्वस्मिन् स्निग्धमतिर्वधूरियमिति श्रद्धां करोति स्म यां ।
सान्यस्मिन्ननुरागिणीति विदितस्सन्नप्यनुत्सृज्य यः
मुग्धस्तामनुवर्तते स्मरहतो भूयश्च नासौ जनः
किम्वुच्छिष्टकृते कुतूहलमतेर्भ्राता कदर्यश्शुनः?

112.दुष्टा भार्या शठं मित्रं भृत्योऽहङ्कारसंयुतः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥

113.मलकूपश्शुद्धान्तो यस्मिन्नहमस्मि कीटकः पतितः ।
कालेन बहुतिथेन तु बहिर्गतः पूर्वपुण्येन ॥

114.इति वैराग्यजलेन प्रक्षाल्य नृपो मनःपङ्कम् ।
निर्मोकमिव भुजङ्गस्त्यक्त्वा राज्यश्रियं मुमुक्षुरभूत् ॥

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

कबीरचरितम्

In Public domain. Digitization Muthulakshmi Research Academy

शीर्षिका

कबीरः क्रीस्तुशकस्य पञ्चदश्याः शताब्द्याः पूर्वार्धे (1442 A.D) महम्मदीयकुविन्दवंशे लब्धजन्मा वाराणस्यां वा तत्परिसरेषु वा न्यवसदिति विदितो भवति ।

महम्मदीयोऽप्ययं पूर्वजन्मवासनया रामभक्तो बभूव । रामानन्दनाम्नो महतो भक्तश्च। रामानन्द उत्तरहिन्दूस्थाने रामानुजभक्तिमार्गं प्रचारयामास ।

कबीरस्य जन्मचरितं द्विविधमस्ति । केचन महम्मदीय इति केचन जन्मना हैन्दवो महम्मदीयेन पालित इति कथयन्ति । अत एवायं हिन्दूमहम्मदीयमत-धर्मयोर्द्वयोरप्यभिरत आसीत् । द्वयोरपि मतयोर्मूढविश्वासान् विमृशन् तज्जनदूषण-पात्रञ्चाभवत् । आत्मानमल्लापुत्रं रामपुत्रं च ब्रूते स्म ।

बाल्येऽयं रामानन्दस्य बोधांस्तत्र तत्र शुण्वंस्तच्छिष्यो भूत्वा राममन्त्रं ग्रहीतुमचीकमत । किन्तु रामानन्दो महम्मदीयं न शिष्यतया गृह्णातीति विदित्वा विषण्णः कथमपि तस्य छात्रकं सम्पादयितुं यतते स्म । रामानन्दः प्रत्यहं ब्राह्मे मुहूर्ते स्नातुं गङ्गानदीं गच्छति स्म तद्विदित्वा कदाचन कबीरोऽपररात्रं गङ्गां गत्वा तस्याः सोपानेषु शेते स्म । रामानन्दोऽन्धतमसे सोपानेषु शयितमविदित्या तस्योपरि पादं न्यधात् । निधाय प्रवाहगतं तच्छवं मत्वा तत्पापशुद्धये राम रामेत्युच्चचार । सद्यः कबीर उत्थाय तस्य पादस्पर्शो राममन्त्रोपदेशश्च लब्ध इति हृषितो बभूव तदारभ्य तच्छिष्यमात्मानं ब्रुवाणः सञ्चरति स्म ।

कबीरस्य गीतानि शतसहस्राणि सन्ति हिन्दीभाषायां येषु महाकविना रवीन्द्रेण शतमनूदितानि गीतानि । मया कानिचिद्रवीन्द्रगीतशतकात् कानिचिद्गद्यानुवाद-ग्रन्थात् (कीर्तिकायेन वेलूरि चन्द्रशेखर नाम्ना रचितादमुद्रितात् कानिचिद्धिन्दी-भाषाग्रन्थाच्च गृहीतानि हिन्दीगीतानुवादे श्रीमता मम सुहृद्वरेण पि.जि.लाले M.A. (Sanskrit Lecturer, Osmania University, Hyderabad) महोदयेन कृतं महत्साहाय्यं यस्यकृते कृतज्ञताबद्धोऽस्मि ।

बुधविधेयः

ग्रन्थकर्ता

Public domain. Digitization Muthulakshmi Research Academy

कबीरचरितम्

1. मन्दाकिनीपुण्यतटे चकास्ति वाराणसी नाम पुरी वरिष्ठा ।
कैलासधाम प्रविहाय यत्र श्रीविश्वनाथोऽवततार रक्तः ॥

2. न केवलैस्स्वाम्बुकृताभिषेकैः स्ववातपोतैश्च परन्तु गङ्गा ।
खनाममात्रं स्मरतां जनानां प्रमार्ष्टि पङ्कं बहुदूरगानाम् ॥

3. यत्रास्ति रामानुजभक्तिमार्गं प्रचारको रामपदाब्जभृङ्गः ।
समर्चनीयी विबुधैश्च रामानन्दाभिधानस्तपसां निधानम् ॥

4. सुरापगां स्थावरपुण्यतीर्थं ब्रुवन्ति तं जङ्गमपुण्यतीर्थम् ।
मन्त्रोपदेशैर्वपते मनस्सु स भक्तिबीजं सततं जनानाम् ॥

5. कदापि रथ्यामटतोऽस्य पादो जग्राह काचिद्विधवा वधूटी ।
उद्यम्य पाणिं भव पुत्रिणीति यदृच्छाया प्रायुजदाशिषं सः ॥

6. अभर्तृकां स्वां विनिवेद्य शोके नार्तामिमूं वीक्ष्य स दिव्यदृष्ट्या ।
सत्यस्ति गर्भे तव भर्तृतेजो जनिष्यते भक्तवरस्सुतस्ते ॥

7. न ते कलङ्कः परमं पवित्रं शीलं त्वदीयं भज! रामचन्द्रम् ।
इत्याह साकर्ण्य गुरोर्वचस्तदुच्छ्वस्य नत्त्वा च गृहानयासीत् ॥

8. तथाऽपि मूर्खैः प्रतिवेशिवर्गैर्विगर्हिताऽत्मीयसनाभिबृन्दैः ।
बहिष्कृता चाविरतं भजन्ती रामं प्रसूत्यै नयते स्म कालम् ॥

9. मासेषु पूर्णेषु नवस्वथेयं प्रसूतमात्रं परमेश्वरोऽवेत् ।
इत्युर्भकं कुत्रचनापहाय गङ्गाप्रवाहे रुदती पपात ॥

2

10. पुराद्बहिः कण्ठकवृक्षगुल्मैर्निरन्तरे झिल्लिरवैश्च देशे,
सद्यः प्रसूतस्य शिशोश्श्रवोऽरुन्तुदं महत्क्रन्दितमुच्चचार ॥

11. भयात्स्वसङ्घाद्विधवा प्रसूतं कुन्तीव सत्यं न जहौ स्वपुत्रम् ।

In Public domain. Digitization Muthulakshmi Research Academy

मार्गे निचिक्षेप निधिं दरिद्रायेहेश्वरोऽपुत्रकृते कृपालुः ॥

12. निर्वाह्वयः कोऽपि महम्मदीयः कल्याणधर्मा निरपत्यकश्च ।
गच्छन् पथा तेन शिशोर्विलापैर्निरुद्धपादप्रसरोऽवतस्थे ॥

13. इतस्ततस्स प्रहितेक्षणोऽग्रे गत्वाल्पदूरं क्षितिजस्य मूले ।
फलं यथा तत्पतितं ददर्श शिशुं दलैस्संवृतगात्रमेकम् ॥

14. शोकद्रुतात्मा स निरुर्विलोक्य बालार्कमूर्तिं व्यचिचिन्तदेवम् ।
दत्तेन भाव्यं शिशुनाऽमुनाद्य पुत्राय मह्यं परमेश्वरेण ॥

15. कुतोऽन्यथा का जननी स्वगर्भे मासान्नवोढ्वा विनिरीक्षमाणा ।
प्रसूतिजक्लेशसहा प्रसूतमात्रं विजह्यात्स्वसुतं कठोरा?

16. मास्पृक्षतापेत सुदूरमस्येतीशेन भाव्यं हि मृगैर्निषिद्धैः ।
न श्वा वराहो न च जम्बुको वा शिशुं रुदन्तं समुपेयिवांस्ताम् ॥

17. क्लेशेन बालं महता गृहीत्वा कराम्बुजाभ्यां स ययौ स्वगेहम् ।
निष्किञ्चनोऽवाप्तमहानिधानो हृष्टःस्तुवानो भगवन्तमन्तः ॥

18. सन्दृष्टमात्रे शिशुके स्वभर्तुः कराञ्जलौ तद्युवतेः स्तनाभ्यां ।
स्नुतं पयो मातरि वाङ्कमारोप्यापीप्यदाह्लादवती सती तम् ॥

19. दिनैस्स बालेन्दुरिव प्रवृद्धश्चकार पित्रोः किल नेत्रपर्वं ।
मन्दस्मितैरस्फुटवाग्विलासैरङ्गक्रियाभिश्च मनोहराभिः ॥

20. मुहुर्मुहुश्चुम्बत आस्यमस्य पुनः पुनः श्लिष्यत एतदङ्गम् ।
अनेकशो हासगतश्च कक्षा स्पर्शैश्शिशुं तं पितरावतृप्तौ ॥

21. प्रह्लादवद्बालक एष मातृगर्भस्थितः किन्नु कृतोपदेशः?
महम्मदीयोऽपि च रामनाम सङ्कीर्तयन्नन्दयति स्म बाल्ये ॥

22. श्रीराम! रामेति समुच्चरन् स उच्चैरनूच्चारयति स्म बालान् ।
गीतानि गायङ्करतालशब्दैराक्रीडत प्रत्यह हृष्टचेताः ॥

In Public domain. Digitization Muthulakshmi Research Academy

3

23. अभ्यर्थितो वंशगुरुः पितृभ्यां शिशोरभिख्याकरणाय तस्य ।
अपश्यदुद्घाट्य खुरानुनाम ग्रन्थं वरिष्ठार्थकबीरशब्दम् ॥

24. कुविन्दकस्यास्य शिशोरनिच्छुस्तन्नाम दातुं स गुरुः पुनश्च ।
पिधाय चोद्घाट्य तदेव नाम तत्रैव पृष्ठे बत! सन्ददर्श ॥

25. अनिच्छता तेन तथाऽपि कर्तुं तद्दिव्यनामान्यजनः प्रयुक्तः ।
संश्लेष्य विश्लेष्य तदेव नाम तत्पृष्ठ एवायमवालुलोके ॥

26. चित्रीयमाणस्स गुरुर्मुसल्मानमंस्त नायं शिशुकः कुविन्दः ।
साधारणः किन्तु महामहान् स्याद्दैवीं बृहत्सम्पदमेष्यतीति ॥

27. ततो गुरुस्तत्पितरावुवाच कबीरनामार्हति बाल एषः ।
श्लाघ्यं पदं प्राप्स्यति बोधपूर्णोऽन्वर्थाभिधानो भविता गणेयः ॥

28. पिता शिशोस्तस्य कबीरनाम कृत्वाशिशिक्षत्स्वकुविन्दकर्म ।
तं बालक़ं नेदमरोचतास्मै तिवतं फलं वा न कृती बभूव ॥

29. पित्रोपदिष्टो बलवत्कबीरो वातुं प्रवृत्तो विजहातिचार्धे ।
शिष्टं पटार्धं वयमान आस्ते श्रीरामचन्द्रो हि कबीररूपः ॥

30. स पण्यवीथीं प्रहितस्स्वमात्रा विक्रेतुमेतं वसनं कदाचित् ।
रामेण भिक्ष्वाकृतिना सदैन्यमभ्यर्थितोऽदत्त कृतानुकम्पः ॥

31. मातुर्भयात्स्वीयगृहं न गत्वा प्रविश्य रामायतनं निलीय ।
सङ्कीर्तयन् स प्रहतो जनन्या घाता नगृह्णाद्भगवान्कृपावान् ॥

32. साक्षादभूत्तत्पुरतोऽङ्घ्रघातैरक्तं वमद्भिर्बहु रामचन्द्रः ।
लज्जानतां मातरमात्मजं च आशीर्भिरायूयुजदादरेण ॥

4

33. पापीयसां क्रूरहृदां स मध्ये प्रह्लाद आत्मीयसुरारिबृन्दे ।
कलञ्जवन्यां तुलसीतरुश्च पुण्या च गौ रासभयूथ आसीत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

34. कालेन याता पितरि प्रमीते कुविन्दवृत्त्याश्रायिता कथञ्चित् ।
मातुर्निदेशादुपयम्य दारांश्चैकान्तभक्त्या भजते स्म रामम् ॥

35. आचार्यदेवं स निषेव्य रामानन्दं जिघुक्षुः किल राममन्त्रम् ।
विप्रेतरायोपदिशत्यसौ नेत्याकर्ण्य दुःख्यन्नयते स्म कालम् ॥

36. नक्तन्दिवं चिन्तयति स्म रामानन्दस्य शुश्रूषणभाग्यलभ्ध्यै ।
वारान् बहून् प्रार्थयिताऽपि तेन कृतोऽभवद्भग्नमनोरथोऽसौ ॥

37. गर्ह्यं स्वजन्म प्रविचिन्तयन् स कथं लभे? छात्रकमस्य? का मे ।
गतिस्त्यजेयं? हतगात्रमेतदित्यार्तकण्ठो बहुशः शुशोच ॥

5

38. ब्राह्मे मुहूर्ते प्रविबुद्ध्य रामानन्दोऽभ्रगङ्गामवतरन् मिमंक्षुः ।
कस्यापि सोपानतले प्रसुप्तस्याङ्गे न्यधात्सन्तमसे स्वपादम् ॥

39. गङ्गाप्रवाहात्तटमागतं तम्मत्वा मृताङ्गं तदशौचशुद्धये ।
श्रीराम! रामेति समुच्चचार यावत्समुत्थाय हठात्कबीरः ॥

40. प्रणम्य तत्पादयुगं बभाषे आचार्य! धन्योऽस्मि भवन्मुखान्मे ।
श्रीराममन्त्रो भवतः पदाब्ज स्पर्शश्च लब्धश्चिरकाङ्क्षितो यः ॥

41. इति ब्रुवन्तं पुनरात्मपादौ गृह्णन्तमेनं हृदि संविदानः ।
तद्वञ्चनेन ज्वलितोऽपि चादौ वश्योऽस्य भक्तेः प्रससाद सद्यः ॥

6

42. गृहागतं मुण्डितकेशजालं कण्ठस्थमालं तिलकालिकं च
माता कबीरं विकृताकृतिं तं विलोक्य धिक्त्वामिति सन्ततर्ज ॥

43. तीक्ष्णारुणाक्षी जननी विरूपमुपेत्य पुत्रं पुनराह रूक्षम् ।
उन्मत्त आसीः? किमु वञ्चितस्त्वं शठेन केनाऽपि विधर्मिणेति ॥

44. ततः कबीरः प्रणिपत्य मात्रे जगाद भक्त्या जननि! प्रसीद !
अद्यास्म्यहं पुण्यतमस्य रामानन्दस्य सद्भागवतस्य शिष्यः ॥

In Public domain. Digitization Muthulakshmi Research Academy

45. नोन्मत्तता नो परवञ्चना च रात्रिन्दिवं क्षुभ्यति मेऽन्तरात्मा ।
सम्पाद्य शिष्यत्वममुष्य रामानन्दस्य* तर्तुं भवघोरसिन्धुम् ॥

7

46. सुतो मतभ्रष्ट इति प्रसूस्सा पाषण्डधर्मा समुपेत्य सद्यः,
ढिल्लीशमुच्चैररुदत्कबीरमाजूहवद्यो विकृताकृतिं तम् ॥

47. घृतेन कण्ठे तुलसीसरेण शीर्षेण मुण्डेन, निटालदेशे ।
विशेषकेण प्रविभासमानो ढिल्लीश्वरस्यान्तिकमागतोऽसौ ॥

48. नितान्तमावर्ज्य शरीरयष्टिं ढिल्लीश्वरं त्वं प्रणमेति तत्र ।
भटोपदिष्टस्स उवाच नान्यं नमाम्यहं रामविभुं विनेति ॥

49. निश्शङ्कमस्मिन् प्रतिभाषमाणेऽवधीरितं स्वं प्रविचिन्तयन् सः ।
ढिल्लीश्वरो रूक्षमुवाच बन्दीगृहं नयैतमिति स्वभृत्यान् ॥

8

50. कृत्वा स कारागृहमेव दिव्यं रामालयं यापयति स्म कालम् ।
गीतानि गायन् मनसार्चयंश्च ध्यायन्नोहरात्रमतन्द्रिलात्मा ॥

51. स्वीयात्कुटीराच्च विशिष्य बन्दीगृहं प्रशान्तं मनुते कबीरः ।
धर्मप्रबोधाय न मेऽवकाश इत्येव तप्तोऽस्ति तदा तदा सः ॥

52. दिवानिशं क्रोशति नष्टबुद्धिर्विपत्सु मूर्खो बहुधा विवेकी ।
जनो भवेदापतितावतापत्प्रकल्पते श्रेयस इत्यशोकः ॥

53. प्रमूढ्ढि! रे ! ते तिलकङ्कबीर! मा रामनाम स्मर! कण्ठदेशात् ।
मालां तुलस्या अपसारयेस्त्वं पठेः खुरानुं कुरु! रे! नमाजुम् ॥

54. महम्मदीयोऽप्यनघं स्वधर्मं विहाय धिग्दुर्मतमग्रहीस्त्वम् ।
बोधैर्जनानां विकरोषि चित्तं घोषन् खरो घासभुजो यथान्यान् ॥

55. यदि त्वयास्मत्प्रभुशासनञ्चेदुल्लङ्घ्यतेऽर्हस्यतितीक्षणदण्डम् ।
इत्युच्चकै राजभटैस्स भक्तो न भर्त्सितोऽपि व्यरमत्स्वकृत्यात् ॥

In Public domain. Digitization Muthulakshmi Research Academy

56. न्यक्कुर्वतश्शासनमस्य रामभक्तस्य भृत्यास्सुलतानवाचा-
न्यघ्नन् शरीरं तिलकं ललाटेऽमार्ष्टुस्तुलस्यास्सरमन्त्रुटंश्च ॥

57. निर्मृष्टपूर्वन्तिलकं मुखेऽभान्माला च कण्ठे पुनराललम्बे ।
बह्वर्दितोऽप्येवमनर्दितो वा ध्यायन् स आस्ते हृदि राममेव ॥

58. यथा विवस्त्रां द्रुपदस्य पुत्रीञ्चक्रे सवस्त्रां भगवान् मुहुश्च
रामोऽभिमृष्टं नृपकिङ्करैस्तं भक्तं पुनर्योजयति स्म तैस्तैः ॥

९

59. कथाङ्कबीरस्य निशम्य सुल्तान्निवेदिताम्बन्दिगृहप्रयोज्यैः,
चित्रीयमाणस्स्वसमक्षमेव तं दण्डयिष्यन्निरगात्कृतात्मा ॥

60. कबीरगात्रे सुलतान्नियोज्यैः कृतैः कशादण्डकराभिघातैः ।
हतस्स सुल्तान् प्ररुदन्नपतद्भूमौ कबीरस्सुखितोऽहृतोऽभूत् ॥

61. मुहुर्लुठन्तं व्यथया धरायां मर्माविधा वीक्ष्य नृपङ्कृपालुः ।
स तस्य पीडाप्रशमाय चक्रे निवेद्य रामाय गतव्यथं तम् ॥

62. ततो विदित्वा महिमानमस्य श्रीरामभक्तस्य बतानुशुच्य ।
कृत्वा विमुक्तं पदयोःपतित्वा मां मृष्य! मृष्येति सदैन्यमाह ॥

63. विमर्दितो रज्जुधिया भुजङ्गस्स्पृष्टस्स्फुलिङ्गो बत लोष्टबुद्ध्या ।
मूढोऽस्मि मूर्खोऽस्मि दृशौ ममोन्मील्याद्याकृथा मे शुभमित्यनंसीत् ॥

64. नृपाज्ञया दण्डितद्भिरेनं भृत्यैः कबीरं पतितैस्तदन्घ्र्योः ।
क्षमां सदैन्यं स्थितमर्थयद्भी राजानमन्वेति हि भृत्यवर्गः ॥

65. सम्भावितस्तेन सिकन्दराख्य महम्मदीयप्रभुणा कबीरः,
उपादिशद्भक्तिपथं स्वकीयमाध्यात्मिकं तं मधुरैर्वचोभिः ॥

10

66. प्रकीर्तयन्नाम गुरोस्स रामानन्दस्य रामस्य च दैवतस्य,
पुराणि च ग्रामटिकाश्च नैकाश्चरञ्जनान् बोधयति स्म भक्तिम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

67. द्वेष्टा तुरुष्कस्य भवान् कथं ते शिष्यः कबीरो भवतीति पृष्टः ।
विप्रावतंसैश्चकितस्स रामानन्दस्समाहूय तमन्वयुङ्क्त ॥

68. श्रुत्वा कबीरादमरस्रवन्ती तटे पदस्पर्शनभाग्यलाभम् ।
श्रीरामरामेति मनूपदेशं स्मृत्वाऽगतिस्तं सममंस्त शिष्यम् ॥

69. मुख्यः कबीरो विबुधस्य रामानन्दस्य शिष्यप्रकरस्य मध्ये
वादेष्वनेनापजितो गुरुस्स हृष्टो यतश्शिष्यजयोऽभिकाङ्क्ष्यः ॥

70. न जातिभेदो न च लिङ्गभेदस्सर्वे समा भागवते हि राज्ये ।
वृत्तं पवित्रं गणनीयमेकं कृतं हतोच्चावचजातिभेदैः ॥

71. किं स्थात्त्रिपुण्ड्रैः? किमुवोर्ध्वपुण्ड्रैः? किं स्याज्जटाभिः? किमु कूर्चकेन?
शीलेन पूतेन विना तु मर्त्यस्स्वाधस्थपङ्कं जलपात्रकं स्यात् ॥

72. महम्मदीयोऽस्तु महीसुरोऽस्तु धात्रीपतिर्वास्तु दरिद्रकोऽस्तु ।
कायेन वाचा मनसा च शुद्धस्स्वाधीनदेवस्स समर्चनीयः ॥

73. इत्थं कबीरो वदति स्म रामानन्दस्तु वक्ति स्म विरुद्धफक्क्या ।
जना अनेके प्रविहाय रामानन्दं कबीरं समुपाश्रयन्त ॥

74. तथाऽपि नाक्षीयत तस्य भक्तिर्गुरौ तु मात्रापि गुरोश्च शिष्ये ।
प्रीतिः क्षिता न ह्यदसीय शैष्योपाध्यायिकाऽभिष्टवपात्रमासीत् ॥

75. जनोपदेशे प्रथमं कबीरो गुरुं प्रणम्यारभते गुरुश्च ।
शिष्यस्य भक्तिं प्रथयन् प्रगाढां तस्यानुकुर्यास्त्वमिति ब्रवीति ॥

76. जेगीयमानान् स्वमतस्य धर्मा*न्विगायमानान् परकीयधर्मान् ।
स हैन्दवान् किञ्च महम्मदीयां स्तीक्ष्णैर्वचोभिर्विमृशत्यशङ्कम् ॥

77. श्रीरामरामेतिमहम्मदीयाः! ब्रूध्वं त्रिशुद्ध्या नहि रामचन्द्रः ।
देवो भवेत्केवलहैन्दवानां सर्वस्य लोकस्य च देवता सः ॥

78. श्रीरामनामस्मरणेन जातः पापः किरातो पवितो महर्षिः ।

In Public domain. Digitization Muthulakshmi Research Academy

संस्पर्शनात्तत्पदपद्मरेणोर्गण्डोपलश्चेतयते स्म सद्यः ॥

79. कृत्वा च नामानि भवच्छिशूनां श्रीरामचन्द्रस्य समाह्वयध्वम्!
यदृच्छयापि स्मरणेन तस्य पापाद्विमुक्तास्सुखमश्नुवीध्वम् ॥

80. मतानि नामेश्वरसन्निधानं सम्प्रापयन्त्यः प्रविभिन्नरथ्याः ।
पन्था ऋजुर्वा कुटिलोऽपि वास्तु तत्सन्निधानं नयते हि पान्थम् ॥

81. छिन्नोऽप्यनिर्मूलित एकदा तु पुनः प्ररोहेन्महिजः पुरेव ।
मूर्धा जनानां किल मुण्डितोऽप्यनिर्मूलिताशा पुनरुद्भवेच्च ॥

82. किं स्पर्शमात्रेण जनोऽन्यजाति जनस्य घोरे नरकेऽपतेद्भोः?
किम्भुक्तिमात्रेण किमम्बुपानमात्रेण वा रौरवमश्नुवीत?

83. न वर्णधर्माः परमार्थधर्मास्ते साङ्घिका एव जना विमूढाः ।
अपास्य दूरे गुडमात्महस्तं लिहन्ति शून्यं तृपिता भवन्ति ॥

84. न देवतान्यास्ति शिवान्न विष्णोर्महत्तरं दैवतमस्ति चेति ।
अन्योऽन्यमज्ञाः कलहायमाना एकस्य नामद्वयमित्यबुद्ध्वा ॥

85. नानास्ति ते हेति किल श्रुतिर्वो भेरीव घोषन्त्यपि न श्रुता किं?
स्वश्रौतसिद्धान्तमबुध्यमाना यूयं कथं वैदिकनामयोग्याः ॥

86. ईदृग्विधम्बोधममुष्य लोकश्श्रुत्वा न सेहे कुपितश्च तस्मै ।
इत्यस्ति सूक्तिर्हि भवेद्विरोधी लोकस्य सर्वस्य यथार्थवादी ॥

11

87. विरोधिनस्तस्य खलाः कदापि विचिन्त्य तं वञ्चयितुं तदोकः ।
भिक्षून्बुभुक्षून् शतशः प्रजिघ्युर्ये रामचन्द्रेण कृतास्सुतृप्ताः ॥

88. बुधाः खलैस्तैः कृतकूटलेखैस्सम्माननार्थं प्रहिता अमुष्मै ।
कबीररूपेण स रामचन्द्रो यान्प्रीणयामास बहूपदाभिः ॥

89. महम्मदीया बत हैन्दवाश्च सङ्घाद्बहिष्कृत्य कबीरमार्यम् ।

In Public domain. Digitization Muthulakshmi Research Academy

चक्रुर्यदा दुर्लभजीवयात्रां पक्ष्मेव नेत्रं भगवांस्तमावीत् ॥

90. दृष्ट्वा कबीरं भगवत्कटाक्षपात्रं जनास्तेऽनुशयेन दग्धाः ।
विशुद्धचित्ताश्शरणं गतास्तच्छिष्या अभूवंश्च कृतोपदेशाः ॥

12

91. स यत्र यत्राटति तत्र तत्र सर्वे जनास्स्वागतमर्पयित्वा ।
तद्धर्मशिक्षां श्रुतिपर्व कृत्वा प्रापत्सतच्छात्रकमन्ततोऽस्य ॥

92. प्रबोधयन्नित्यमटाट्यमानो ग्रामैकरात्रं विषयान् बहून् सः ।
गृहं निवृत्तो निजशिष्यबृन्दैः समर्पितस्वागत आह पृष्टः ॥

93. पङ्कश्शरीरे, हृदये च पङ्को ग्रामेषु पङ्कः खलु कण्ठदघ्नः ।
सुरापणं देवकुलं प्रमत्तजनप्रलापा भगवत्कथाश्च ॥

94. पतिव्रता यत्र तु वृद्धनार्यः अजारवृत्ता शिशुबालवृद्धाः ।
द्यूतालया यत्र भवन्ति गोष्ठी वन्धाः परार्थप्रवणा महान्तः ॥

95. ऋजुं शठा आः परिवञ्चयन्ते समाश्रिताः साधुजना इवात्र ।
साध्व्यो वसानाः पटकर्पटान् हन्तात्युज्ज्वलामूल्यपटांस्त्वसाध्व्यः ॥

96. यः कोऽपि विद्वान् यदि कुत्रचित्स्याद्विभीषणो वाऽसुरबृन्दमध्ये ।
जिह्वेव दन्तप्रकरान्तराले क्लिष्टां नयन् जीवति जीवयात्राम् ॥

97. वादेषु विज्ञानघनाः कुतर्कैर्वैतण्डिकैस्सन्ति जिताः कुधीभिः ।
सिंहा इव क्षुद्रमृगैर्भवन्ति बताभिमृष्टाश्च बहिष्कृताश्च ॥

98. रुदन्ति शुष्कैरुदरैर्महान्तो विद्वांस आहारमनाप्नुवन्तः ।
दिने दिनेऽश्नन्ति जनास्तु मूढास्स्वाद्यानपूपान्बहुशाकपाकान् ॥

99. देवालयं गच्छत आर्यमिश्रान्प्रचक्षते मूढमतीन् हसन्ति ।
तद्वेदपाठाननुकृत्य चोच्चैः कुर्वन्ति नामानि च कुत्सितानि ॥

100. अन्विष्य रन्ध्राणि गुरोस्तु शिष्या जाल्माः कृतघ्नाः प्रथयन्ति लोके ।

In Public domain. Digitization Muthulakshmi Research Academy

स्वीयानि पापान्यवलिप्त शीर्षं परस्य शुद्धा इव दर्शयन्ति ॥

101. वृद्धा अतृप्ता विषयेषु पाणौ कुर्वन्ति तारुण्यवतीर्लताङ्गी ।
कालेन कुण्डा हतगोलकाश्च जातास्ववंशं विनिपातयन्ति ॥

102. वाराङ्गनानां बत! नर्मगोष्ठी गृहाण्यभूवन् सुरमन्दिराणि ।
यत्राधरोष्ठामृतमेव तीर्थमालिङ्गनादिर्भगवत्प्रसादः ॥

103. जानात्यधस्थं न तमः प्रदीपो न वेत्ति गुञ्जा च मलं स्वकीयं ।
बुधोऽप्यविज्ञाय बतात्मदोषान् स्वं मन्यते चेतसि शुद्धमूर्तिम् ॥

104. पुत्राः! समाकर्णयतेत ! यूयं ग्रामान् जनान्संस्कुरुतोपदेशैः
श्रीरामराज्यं पुनरुद्धरध्वमेषा क्रिया वो गुरुदक्षिणा मे ॥

13

105. चरन् कबीरो विषयाननेकान् कुर्वंश्च धर्माभिरनान् जनान् सः ।
संस्थापयामास मठानि देशे धर्मोद्धृतेर्द्वादशसंख्यकानि ॥

106. धर्मप्रबोधाय कृते प्रयत्ने सिद्धेः स एकोनशतं गताऽंशान् ।
गोरक्षपुर्या निकटस्थपल्ल्यां तत्याज देहं मगराख्यिकायाम् ॥

107. तच्छात्रका हिन्दुमहम्मदीयास्स्वधर्ममार्गेण चिकीर्षवोस्य ।
कायस्य संस्कारविधीन् निविष्टाः परस्परं ते व्यवदन्त हन्त !

108. यावज्जनास्ते रभसादुपेत्य व्यपाययंश्च्छन्नपटं तदङ्गात् ।
स्थाने तनोस्तत्र सुमस्रगेका विस्माययन्ती समदर्शि तावत् ॥

109. यथा बिडालश्शमयत्युपेत्य पतत्रिणोर्वैरममुं विवादम् ।
अशीशमत्पक्षयुगस्य तस्य कृत्वा तदन्तर्हितमीश्वरोऽङ्गम् ॥

110. सुमस्रजोऽर्घं परिगृह्य मन्त्रैः काश्मीरदेशेऽदह्देकवर्गः ।
तत्रैव शिष्टं मगराख्यपल्लयां द्वितीयवर्गो न्यखनत्तदर्धम् ॥

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

कीरसन्देशम्

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

गीर्वाणसारस्वते दूतकाव्यरचनासम्प्रदायः कवीनां तदलौकिकप्रतिभारत्नप्रतिपत्तॄणां च सहृदयहृदयानां समाजेषु बहोः कालात् समुल्लसति। लौकिककाव्यरचनाया आद्यप्रवर्तको महर्षिः वाल्मीकिः । दूतकाव्यरचनाऽपि तेनैव प्रारब्धा ।

कविकर्म तावत्काव्यम् । अत्र "इगन्ताच्च लघुपूर्वादि"त्यणि कृते न निर्वाहः । तेनापेक्षितार्थबोधेऽपि कावमित्येव सिध्येत् । सम्प्रदायप्रसिद्धकाव्यशब्दनिष्पत्तिर्न स्यात्। गुणवचनेति ष्यञ् एव विधेयः । तेन काव्यमिति रूपं सिद्ध्यति । कवेरपीतरमनुष्यनिर्विशेषं त्रिगुणात्मकशरीरित्वात् मनुष्यत्वव्यापि शयनभोजनादिकं कविकर्मात्र न विवक्षितम् । स्थपत्यधिकरणन्यायेन लोकोत्तरवर्णनारूपं निपुणं यत् कर्म तदेव विवक्षितम् । काव्यस्वरूपनिरूपणं तु बहुभिः साहित्यविशारदैर्विमर्शकैश्च बहुधा कृतम्। तन्नागोचरं विदुषाम् । दूतकाव्यं तावत् काव्यविशेष एव । दूतकाव्ये कथा शरीरस्य, इतिवृत्तवशायातस्य सविस्तरमुपनिबन्धनं नापेक्ष्यते । प्रतिपिपादयिषितरसाद्यपेक्षया विभावावस्थावैचित्र्यवर्णनं दूतद्वारा तादृशानुभूयमानावस्थाविशेषनिवेदनं च प्राधान्येनोपवर्ण्यते । उपनिबध्यमानरसाभिव्यक्त्यनुरोधेन वनगिरिपुरीनदीप्रभृतीनां वर्णनमपि रसपोषायापेक्षितमेव । हनूमता सीतायै न केवलं रामेणानुभूयमाना विरहव्यथा निवेदित्ता, किन्तु लङ्कायां रावणान्तःपुरे च येऽश्रुतपूर्वा विषयाः प्रत्यक्षतयानुभूतास्ते सर्वेऽपि तेन व्यक्तीकृताः । रामायणं पठतां सहृदयहृदयानां हनूमता तादात्म्यं प्राप्यालौकिकमानन्दमनुभवतां यावद्रसं वर्तमाना स्थायित्वेन व्यवह्रियमाणा या चित्तवृत्तिः सा ललितोचितसन्निवेशचारुकाव्यस्य रचयितुर्वाल्मीकेर्वाग्व्यापारसम्भवैव । रामायणे किष्किन्धकाण्डस्यान्तिमो भागः कृत्स्नं सुन्दरकाण्डं च दूतकाव्यमेव । ईदृशस्य दूतकाव्यस्यानुकरणमादौ महता कौशलेन कालिदासेन कृतम् । मेघदूतमिति तन्नाम । तदनन्तरं बहवः कवयोऽहमहमिकया बहूनि दूतसन्देशकाव्यानि व्यरीरचन् । कालिदासविरचितमेघदूतस्यानुकरणं प्रथमतः पवनदूतमिति, द्वादशे शतके धावकेन कृतमिति A.B.Kieth मन्यते । अधुना दूतकाव्यग्रन्था अधिकचत्वारिंश उपलभ्यन्ते पवनदूत-भृङ्गदूत-कोकिलसन्देश-मनोदूत-पदाङ्कदूतादयः । तत्र कानिचिद् दूतकाव्यानि

In Public domain. Digitization Muthulakshmi Research Academy

समानाभिधानान्यपि सन्ति । पवनदूतमिति, त्रीणि, मेघदूतमिति चत्वारि, हंसदूत-सन्देशमिति पञ्च ।

भामहस्त्वीदृशेषु काव्येष्वरुचिमेव दर्शयति ।

अयुक्तिमद्यथा दूता जलभृन्मारुतेन्दवः ।
तथा भ्रमरहारीतचक्रवाकशुकादयः ॥
अवाचोऽव्यक्तवाचश्च दूरदेशविचारिणः ।
कथं दूत्यं प्रपद्येरन्निति युक्त्या न युज्यते ॥

मन्ये ईदृशाक्षेपभियैव तुलसीदूत-उद्धवदूत-पोथदूत-नेमिदूतादयो दूतकाव्यग्रन्था अनन्तरकविभिर्विरचिताः । आस्तां नाम मेघदूतादिविषयेषु भामहाक्षेपः । रामायणविषये तु स न युज्यते । यद्यपि रामप्रेषितदूतो हनूमान् वानर-जातीयस्तिर्यग्योनिः । तथापि हनूमान् सन्देशाहरणायासमर्थ इति वक्तुं न शक्यते । प्रथमदर्शने रामहनूमतोर्यत् सम्भाषणमभूत् तद्विषये राम एव लक्ष्मणं प्रत्येवमवोचत् ।

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहु व्याहरतानेन न किञ्चिदपशब्दितम् ॥
संस्कारक्रमसम्पन्नां महतामविलम्बिनीम् ।
उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥ इति ॥

इदं कीरसन्देशकाव्यमत्रभवद्भिः श्री सन्निधानं सूर्यनारायणशास्त्रिभिर्विरचितम्। अपरमपि कीरदूतमिति प्रसिद्धं काव्यं श्रीरामगोपालकविविरचितं प्राचीनं वर्तते । दूतत्वे वरयितुं योग्या हंसमनःपवनादयः सामान्येनेत्वरा एव । तेभ्यो मेघ एव श्रेयान्। न केवलं गमनशीलः, अपि तु प्रवर्षुकोऽपि । सन्देशसमर्पणे चतुरश्च । निजललितनील-पाटलोज्ज्वलरुचिः श्रवणमधुरालौकिकगम्भीरध्वनिः समुद्दीपयत्येव स्वमहिम्ना कामिजन-चित्तवृत्तीः । तथापि मेघात् कीरः श्रेष्ठः । न केवलं सुस्पष्टस्वरवर्णात्मकशब्दव्याहारकुशलः अपितु यथाश्रुतं यथापठितं विनैव स्वरवर्णलोपं पदव्यत्यासं वा तयैवानुपूर्व्या सन्देशम् अनुवदति । काव्ये चास्मिन् कथासन्दर्भस्त्वन्य एव। अत्र शास्त्रिभिर्न केवलं साधारणपतत्रिविशेषः कीरो दौत्ये नियोजितः । किन्तु सन्देशहारी कीरः परमार्थतया काचन देवाङ्गनैव । प्रथमदर्शन एव नायकः श्रीकृष्णः वने वृक्षशाखायां अवतीर्य पुर

Public domain. Digitization Muthulakshmi Research Academy

आयान्तं कीरं दृष्ट्वा तल्लावण्यविशेषं च विचिन्त्यैवं वदति ।

स्वागतं चारुमूर्ते! त्वा श्रद्दधे न विहङ्गमम् ।
किं तु काञ्चित् दिव्यकन्यां मन्ये रूपान्तरं गताम् ॥

कीरः श्रीकृष्णं प्रत्येवमवादीत् । पूर्वमहं रमादेव्याः सखी विद्युल्लतेति कुपितया रमादेव्या शप्ताऽहं कीरत्वं प्राप्ता वैदर्भ्याः सन्देशाहरणेन शापमुक्ता भूयासमिति । अन्ते-

इत्थं निवेद्यात्मकथां समूलमामन्त्र्य दामोदरमप्सराः सा ।
निषेवितुं निर्जरसुन्दरीणां श्रियं शिरोरत्नमगाद्दिवं द्राक् ॥९६

इत्थं सन्देशहारिण्या दिव्याङ्गनायाः कीरत्वेनोपवर्णनेन भामहाक्षेपोऽपि दूरत एव निराकृतः कविनेति मोमुद्यते चेतः । किं चात्र काव्ये मूलभागवतकथादूतस्य स्थाने कीरादेशस्य किं प्रयोजनमिति विमर्शनीयमस्ति । इदमवधेयमत्र ।

श्रीमन्नारायणस्य पूर्णावतार इति परिगणितस्य भागवतकृष्णस्य बलरामेण स्वभ्रात्रापि गर्हितं रुक्मिणः श्मश्रुकूर्चादिवपनरूपं नीचकर्माचरणमौचित्यविद्भ्यो न रोचते । न हि कृष्णोऽत्र कारयिता । किन्तु कर्तैव । भागवतरुक्मी मत्सरी विनैव कारणं हरेः प्रतिकूलचारी जातः । प्रतिकूलस्याऽपि श्रीकृष्णकृतस्तादृशो दण्डोऽत्यन्त गर्हणीय एव।

कीरसन्देशरुक्मी तु नापराधी । यथा पितरौ सोऽपि रुक्मिणीं श्रीकृष्णस्यैव पाणिं ग्राहयितुं मनसेच्छति स्म । किन्तु चैद्यस्य पिशाचस्य प्रतिकर्तुमनीशोऽन्यमुपायमपश्यन् अनिच्छन् दुःख्यन्नेव मनसि रुक्मिणीबलिदानेन तस्माद्राज्यं स्वजनं च रक्षितुं निश्चिकाय। निरपराधिनो रुक्मिणो हरेरदण्ड्यत्वेन तादृशनीचकर्मात्र काव्ये न प्रसज्यते एव ।

चैद्येन क्रूरेण रुक्मिणीं बलादपहर्तुमागतेन निरुद्धे नगरे, प्रतिबद्धेषु च यातायातेषु विना कीरेण वाऽन्येन वा विहगेन न कोऽपि रुक्मिणीसन्देशं हर्तुं प्रभवति । अयं कीरो बाल्यादपि च रक्मिण्या भीष्मकान्तःपुरे निवसन् तया लालितः पोषितश्चासीत् येन तस्य रुक्मिण्या आशैशवात्प्रतिक्षणं वर्धमानः प्रणयः प्रत्यक्षः । ततः स कीरो न केवलं रुक्मिणीसन्दिष्ट सूत्रप्रायमेव सन्देशं किन्तु सहस्रमुखैः प्रेमानुबद्धाः रुक्मिणीशैशवचेष्टा निवेदयितुं प्रभवति स्म । न हि शक्यं विप्रेण वाऽन्येन वा तथा कथयितुम् ।

In Public domain. Digitization Muthulakshmi Research Academy

अपि च भागवतदूतो विप्रः सन्देशं हरिं प्रापय्य निवृत्तो रुक्मिण्यै तदागमनवार्तां निवेदयति येन तस्याः सन्तापः शाम्यत्येव । तद्रसभङ्गाय कल्पते । मेघसन्देशे दूतो मेघो न निवृत्तः । काव्येऽस्मिन्नपि दूतः कीरो न निवृत्तः । न मोदते रुक्मिणी चित्ते प्रियागमनेनाप्यनागमनेन कीरस्य प्रियबन्धोः । तपस्विनी सा तावच्चिन्तादूनैव यावच्छयनागारे श्रीकृष्णो वेदयति तद्वार्ताम् । ईदृशी कल्पना रसपुष्टये सम्पद्यते ।

कुतोऽत्र काव्ये साधारणं शुकं विहाय चित्रवर्णकीरपरिग्रहणमित्यपि विमर्शनीयमेव। अत्र काव्ये चेट्या रमायाः स्वदेव्याश्चित्रवर्णाम्बरमपहृतम् । येन कीरशरीरे चित्रवर्णस्तच्चौर्यस्फोरकः सञ्जातः । पुरा दण्ड्यानां जारादीनां मुखाद्यवयवेषु तत्तज्जारत्वादिव्यञ्जकयोऽन्यादिदाहरेखाः क्रियन्ते स्मेति ज्ञायते* । ततो दृष्टमात्रे कीररूपे तच्चौर्यस्फोरकतया चित्रवर्णः कीरः कल्पितः ।

अपि च कुतश्चेट्या चित्रवर्णाम्बरमपहृतमित्युक्तम्? सामान्यमेव हरिताम्बरमपहृतमिति कुतो नोक्तम्? इत्यपि विमर्शनीयम् । नह्याकृष्यते वस्तुना साधारणेन जन्तुः। किन्त्वसाधारणेनैव । अतोऽप्सरा विद्युल्लता रमायाश्चित्रवर्णाम्बरमचूचुरदित्युक्तम्। एवमिदमितिवृत्तमतिरमणीयमनवद्यञ्च भाभाति ।

श्री सन्निधानं सूर्यनारायणशास्त्रिणः सुप्रसिद्धा विद्वांसः आन्ध्रगीर्वाणभाषयोः परं वैदुष्यं प्राप्नुवन्तः समुत्तीर्ण विद्वान् शिरोमणिः, P.O.L. (Proficient in Oriental Learning) इति प्राच्यविद्यापरीक्षाः, गद्वाला, वनपर्त्यादिराजास्थानविद्वत्संसत्सु लब्धकीर्तय आन्ध्रावाङ्मये गद्यपद्यसाहित्यच्छन्दोव्याकरणाद्यधिकत्रिंशद् ग्रन्थरत्नप्रणेतारः, आन्ध्र, मद्रास, उस्मानियादिषु बहुषु विश्वविद्यालयेषु प्रथितयशसः सिकिन्द्राबादमधितिष्ठन्ति । आदौ कीरसन्देशमिति तैरेवान्ध्रपद्यमयं काव्यं निरमायि । तत्तु चिरस्य मुद्रितम् । मद्रासविश्वविद्यालय इन्टर मीडियेट् परीक्षायाः पाठ्यतया निर्णीतम् । छात्रगणेषु प्रसिद्धं च । तस्यैवायं संस्कृतपद्यात्मकोऽनुवादस्तैरेव कृतोऽस्ति "तसनीफरा

गुरुतल्पे भगः कार्यः । सुरापाने सुराध्वजः ।
स्तेये च श्वपदं कार्यं । ब्रह्महन्यशिराः पुमान् ।।

मनुस्मृतौ ९.अध्याये २३६ श्लोकः

In Public domain. Digitization Muthulakshmi Research Academy

मुसन्निफनेको कुनद बयान्" "(फारसी)" "स्वव्याख्यानं स्वीयवाचां विशेषप्रतिपत्तये" इत्यभियुक्तोक्तिमनुसृत्य गीर्वाणभाषानुवादोऽयं सर्वाङ्गसुन्दरो ललितपदविन्यासपूर्वः प्रसादगुणभूयिष्ठोऽभिनवमञ्जुलभावप्रपूर्ण आन्ध्राकाव्यादप्यधिकांशेन स्वाभिप्रायव्यञ्जक इत्यवैमि ।

प्रतिपाद्यकथाभागस्त्वत्यन्तमङ्गलः रुक्मिणीपरिणयमहोत्सवस्य पूर्वरङ्गः । श्रीकृष्णविषये रुक्मिण्याः अकृत्रिम प्रेम, अनन्यसाधारणीभक्तिः, असह्यविरहावस्था, चैद्यादिभ्यो भीतिः, एते सर्वेऽपि चित्तवृत्तिविशेषाः दूतमुखेनोपवर्णिताः सहृदयान् वाचकवर्गानविलम्बितमेवालौकिकानन्दसागरे इतरभावविस्मारकं मज्जयति ।

श्रीकृष्णविषये रुक्मिण्या अनुरागो न केवलं कामेच्छया पतिभावेन किन्तु परमात्मेति भक्त्युद्रेकेणापि । (२२-३० श्लोकाः) कृष्णस्यालौकिक सामर्थ्यवर्णनमपि अद्भुतरसं पुष्णाति (शिशुना धृतशैलेन ८५) न केवलं भक्तिमार्गेण अपितु ज्ञानमार्गेणापि भगवदुपासनापद्धतिः (देवा भवान् सूत्रात्मा ७४) प्रदर्शिता कविना । बलवद्विरोधे प्रयत्नवैफल्यं बहु चमत्कारेण प्रदर्शितम् । (५१-५८) सूत्रत्वेन सन्देशप्रेषणं भाष्यत्वेन विशदीकृत्य विवृत्य च तात्पर्यग्रहणमिति प्रतिपादनं सुलभरीत्या शास्त्रप्रतिपाद्यविषय-गाम्भीर्यं व्यनक्ति । विशेषतः पूर्वाचार्यपरम्परापरिरक्षणे श्रद्धां वहतां वैयाकरणानां मीमांसकानां वेदान्तिनां च न तु नैयायिकादीनाम् (८४) विवाहनेपथ्यस्य क्षणादेव रणनैपथ्यत्वेन परिणतिः (११२) पुनश्चैद्यादिप्रतिबन्धकनिवृत्यनन्तरं रणवेदिकायाः कल्याणवेदिकात्वेन स्वस्वरूपप्राप्तिश्च (११७) ईदृशपरस्परविरुद्धरसानाम् एकत्र सन्निवेशेन कवेरसाधारणं साहित्यप्रावीण्यं द्योत्यते रक्मिण्या रत्नत्वेन रूपणं प्रकुतोपयोगितया परिणामालङ्कारं बोधयत् शृङ्गारमेव पुष्णात्येव (२०) अजानता (५०) इत्यादि श्लोकेषु किमपश्यत् बिडालस्य मुखं (१०९) इत्यत्र लोकप्रवादोऽपि सुन्दरतया निबद्धः शोभातिशयं द्योतयति । एवमादयः सन्त्यन्येऽपि शास्त्रिणां रचनाप्रतिभाव्यापारविशेषास्ते काव्यमिदं पठतां सूक्ष्मदृशां स्वयमेव गोचरीभविष्यन्तीत्युपरमे।

शिरोमणिः विद्यावाचस्पतिः प्राज्ञः
गुण्डेराव हरकारे
(Retired Sessions Judge of Gadwal

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

कीरसन्देशम्

1

1. अवतीर्णो व्यपनेतुं धर्मग्लानिं हरिः कृतावासः ।
द्वारावत्यां भो अयमहमस्मीति प्रतिब्रुवन्नार्तान् ॥

2. अनुदिनमायान्ति स्म मुनयः सनकादयो दिशाम्पतयः ।
अमराः सिद्धाः साध्याः शुश्रूषितुमर्चितुं निवेदयितुम् ॥

3. ज्योतिः परमिति ऋषयो वल्लव्यो रसिकरत्नमिति ।
मधुरं रूपं तस्य पिबन्ति सततं मनोहत्य ॥

4. अयमेकान्तसुहृन्मम अयं ममैकान्तबान्धवश्चेति ।
मम सम्बन्ध्ययमिति च सर्वश्चिन्तयति तं हरिं स्वीयम् ॥

5. पतितं वृक्षाग्रफलं समुद्गतं रत्नमवनिगर्भस्थम् ।
मनुते सर्वो माधवमवतीर्णं द्वारकां स्वर्गात् ॥

6. निधिभिः श्रिया च नवभिः सम्पन्नः श्रीहरिः क्रीत्वा ।
गोपायति लोकत्रयमुदरे कृत्वा भृशं जाग्रत् ॥

2

7. स्पर्शेन धन्यत्वमवप्तुकामांस्तरून् निकुञ्जान् लतिकावितानान् ।
निरुध्य पन्थानमवस्थितान् स सम्भावयामास चरन् वनान्ते ॥

8. स्वागतगीतानीव शुककोकिलमधुरगीतानि ।
श्रुतिपेयानि शृण्वन्नधस्तलं प्राप चूतवृक्षस्य ॥

9. यावत् स्फुरितं दक्षिणा विलोचने तावदेव चूतफलम् ।
पतितं करेऽस्य पुरतो न्यपतत्कीरश्च चित्रवर्णाङ्गः ॥

10. निपत्य धूत्वा गरुतो मुहूर्तमुन्नम्य वामेतरमात्मपादम् ।
कृत्वा जयारावमवस्थितं तमामृश्य कीरं हरिरेवमाह ॥

In Public domain. Digitization Muthulakshmi Research Academy

3

11. स्वागतं चारूमूर्ते ! त्वां श्रद्दधे न विहङ्गमम् ।
किन्तु कञ्चिद्दिव्यकन्यां मन्ये रूपान्तरं गताम् ॥

12. शक्रस्येव धनुष्खण्डं तैलपृक्तोर्मिकाकृतिः ।
चित्रपुष्पगुलुच्छाभस्तनोषि नयनोत्सवम् ॥

13. लावण्यं तव गृह्णीरन् याचित्वा नु सुराङ्गनाः ।
तपोभ्रष्टान् मुनीन् कर्तुं सिध्यन्ति कथमन्यथा? ॥

14. औज्ज्वल्यस्य तवाङ्गस्य बिन्दू रत्या हृतः किमु?
तया नाम जितं रूपे कथ शृङ्गारसीमनि ? ॥

15. किमास्वादात्फलानां ते मधुराणां दिने दिने ।
निर्गच्छति रसो वाग्भ्यो मधुकोशाद्यथा मधु ॥

16. लावण्यमयाङ्गत्वात् कच्चित्सल्लपसि तावदतिमधुरम् ।
ललितं ललितं तावत् हृद्यं हृद्यं च तावत्त्वम् ॥

17. भद्र! ते जन्मलाभेन देशः को भाग्यवान् भुवि ?
लालितोऽसि कया कुत्र? किमत्रागमकारणम् ? ॥

18. एवं स पृष्टः शुक आह देव! त्रिकालवेत्तुस्तव नास्त्यवेद्यम् ।
अनुग्रहः खल्वनुयोग इत्थं कृतार्थभूतं मम पक्षिजन्म ॥

4

19. अवधीयतां निवेद्यः सन्देशः कार्यगौरवात्प्रथमम् ।
आमूलाच्चरितं मम कथयामि ततः परं भगवन् !

20. ननु ! भवता श्रुतपूर्वं खलु जातं रुक्मिणीति सद्रत्नम् ।
क्रथकैशिकपतिवंशे क्रियतां तत्कण्ठभूषणं देव ! ॥

21. जातायाः किमजातायास्तस्याः स्निग्धं मनस्त्वयि ।

In Public domain. Digitization Muthulakshmi Research Academy

को नु हेतुः? कथं ज्ञेयः पामरैर्मादृशैः प्रभो!

22. शयिता मृदुडोलायां श्रुत्वा मात्रा भवत्कथा गीताः ।
रुदिताद्विरम्य मन्दस्मिताननना मोमुदीति सा बाला ॥

23. मातृगीतं श्रुतं यावत्तावन्नन्दति बालिका ।
पुनारोदिति गीतान्ते गीत्यर्थं नाम रोदिति ॥

24. आसन्मणिमन्त्रौषधसन्दोहस्त्वत्कथा गीताः ।
बालारिष्टार्तायाः क्रथकैशिकराजनन्दिन्याः ॥

25. पदाभ्यां वा प्रस्खलद्भ्यां जानुभ्यां वा शनैर्गता ।
पूजामन्दिरमूर्तिं ते सोपदिष्टेव वन्दते ॥

26. प्रणमति मुकुलितहस्ता गीतं स्खलदक्षरं समालपति ।
नीराजनमर्पयति च कमलाक्ष! पुरस्तव प्रतिमायाः ॥

27. आलापितात्तेति जनेन तातेत्यसौ हसन्मुख्यनुवक्ति हर्ता ।
त्रातेति कौ तावितिं पृच्छ्यमाना सन्दर्शयत्यात्मन एव मूर्तिम् ॥

28. बाले ! कं कामयसे? त्वमिति भणन्तीं जरद्धात्रीम् ।
प्रतिमां ते सन्दर्श्य मूर्तिमिमामिति मधुरवचा ब्रूते ॥

29. लीलानराय भवते श्रुत्वा ते शैशवक्रीडाः ।
पार्वणचन्द्राय यथा चकोरिका स्पृहयति स्निग्धा ॥

30. अश्नाति फलादीनि धत्तऽङ्गे पुष्पमाल्यानि ।
कुरुते चन्दनचर्चां प्रथमं तुभ्यं समर्प्य मनसा सा ॥

31. त्वद्रूपधारिणीमात्मसखीं श्लिष्यति चुम्बति ।
लालयत्याशयत्येषा पक्वान्नानि फलानि च ॥

32. एवं हरे! प्रतिष्ठाप्य भवन्तं चित्तमन्दिरे ।
रक्त्या भक्त्या सेवते सा दिवारात्रं तपस्विनी ॥

In Public domain. Digitization Muthulakshmi Research Academy

33. नैतच्चित्रं त्वयि स्निग्धा यदियं शैशवेऽपि भोः ।
उन्मीलन्ति प्राणिकोटेः प्राग्जन्मस्नेहवासनाः ॥

34. अङ्गैः सह त्वयि स्नेहस्तस्याः स्नेहेन विभ्रमाः ।
विभ्रमैर्गुणसन्दोहोऽवर्वृधीद्दिवसक्रमात् ॥

35. यथा विश्लेष्य तद्वृन्तं कोरकः फुल्लतामियात् ।
अपास्य शैशवं तस्या गात्रं दृक्पेयतां गतम् ॥

36. वर्णयति पुष्पधन्वनि विलासरेखास्त्वदीयललिताङ्गे ।
प्रस्पर्धयेव रतिरपि तस्या अङ्गं विशिष्य शोभयति ॥

37. पितुर्गृहप्राप्तबुधैर्निशम्य लिखत्यसौ ते प्रतिबिम्बरूपम् ।
आरोप्य तद्वक्षसि मोमुदीति मुहुर्मुहुश्चुम्बति मुग्धचित्ता ॥

38. गापयति सखीः सा ते सहस्रनामानि मृदुमधुरम् ।
उपवीणयति श्राव्यं वंशीलतया च हृद्यमालपति ॥

39. गात्राणि संकुच्य हठाद्धसन्ती ब्रूते हरिर्मां मृशतीति बाला ।
जातु स्थिता द्राक्परिधाविताऽह रमाधवो मामनुधावतीति ॥

40. तव नाम्नाऽह्वयति सखीस्तव रूपं लिखति सा लिखन्त्यन्यत् ।
वंशीराव इवेति श्रवणं दत्ते तदा तदोद्ग्रीवा ॥

41. पुरतस्त्वां दृष्ट्वा सा मालामर्पयति ते गले देव!
पतितां विलोक्य भुवि तां नहि प्रतीष्टेति हन्त! शुचमेति ॥

42. कपटस्त्वं कुहयित्वा स्वप्नेऽन्यां सुन्दरीं किलाश्लिष्टः ।
सा तुभ्यं किल कुपिता पतितः किल पादयोर्भवांस्तस्याः ॥

43. चोचुम्ब्यते कामिनी सा मत्वा त्वामेव मां हरे !
विभ्रान्ता त्वां पुरस्थं च शून्यमेवापगूहति ॥

44. स्वयंवरे मत्पितृकल्प्यमाने राज्ञां समक्षं यदुवंशरत्नम् ।

In Public domain. Digitization Muthulakshmi Research Academy

वृणोमि पुष्पस्रजमस्य कण्ठे करोमि चेति स्पृहयत्यजस्रम् ॥

45. प्रेम्णस्तन्व्यास्तस्या न मया कथिताऽत्र मात्राऽपि ।
सर्वज्ञो नहि वेत्ति भवानृतं वानृतं वेति ॥

46. भृङ्गायतां पद्मिनी सा चन्द्रिकाऽसौ विधूयताम् ।
अतिमुक्तलता बाला भवांश्चूतायतां हरे ! ॥

47. महिलारत्नं बाला पुरुषोत्तम! पुरुषरत्नमसि च त्वम् ।
सङ्गच्छते हि रत्नं रत्नेनेत्युच्यते विबुधैः ॥

48. रमणीयं रत्नमेव लोभनीयं जनैः परम् ।
नान्यस्त्वन्मूल्यनिर्णेता क्रेता च भुवि दृश्यते ॥

5

49. लावण्यमस्याः स्पृहणीयभूतमाकर्ण्य चैद्यस्त्वयि रागबन्धम् ।
तुभ्यं हरे!ऽसूयति तस्य भाव्यं श्रियोऽपहर्त्रा भवतेति चित्ते ॥

50. कन्यां वरयितुमेनां तेनात्मार्थं पुरोहिताः प्रहिताः ।
विफलारम्भाः पादश्रममात्रफलास्तु निववृतिरे ॥

51. निविवर्तयिषुरिवप्राङ्मुखीं नदीं प्रत्यगाशां सः ।
स्पृहयन्तीं तुभ्यं तामैच्छत्त्वं प्रति निवर्तयितुम् ॥

52. मोहान्धः शिशुपालः सोऽसूयादुर्ग्रहाविष्टः ।
इत्थं धिक्! दुश्चिन्तामकृतविवेकपरिपन्थिनीहीर्ष्या ॥

53. मायावी मा नाम हरिर्हरेत्तद्वधूरत्नम् ।
ह्रियते मयाऽचिरेण चोरेण यथा परस्य धनम् ॥

54. अद्यैव गत्वा चतुरङ्गसेनायुतो विदर्भानभिहत्य भीष्मम् ।
परान् पराभूय तदीयकन्यां मुहूर्तमात्रेण समानयामि ॥

55. अभिभूयते स गोपः प्रतिरूपं तस्य दूष्यते च पुरे ।

In Public domain. Digitization Muthulakshmi Research Academy

दर्पानलोऽस्य समरे प्रशम्यते खड्गधारया मेऽद्य ॥

56. अजानंस्तारतम्यं यः स्वस्यान्यस्य विजृम्भते ।
स पतङ्ग इवाभ्यग्निपतन्नश्यत्यसंशयम् ॥

57. वह्निः प्रचण्डानिलसाहचर्यं यथा गतो मागधमुख्यसाह्यम् ।
स चैद्य उद्दद्दृप्य चतुर्दिशे तत् पुरीमवास्कन्ददसङ्ख्ययोधैः ॥

6

58. युगपज्ज्वलनज्वलितं गृहं चतुःशालमन्तरीपश्च ।
उत्कूलनदीवृत इव भवति पुरं सर्वतो रुद्धम् ॥

59. शान्तं यातायातं नहि चलति च मक्षिकाऽपि नगरान्तः ।
कृत्वा हस्ते प्राणान् वेपन्ते नागराश्च भीष्मश्च ॥

60. अवगत्य पिशाचस्य चैद्यस्य, मनोरथं समर्पयितुम् ।
बलिमिच्छति स्वसार रूक्मीदानीमुपायसम्मूढः ॥

61. किं मणिमिङ्गालेन ? किं कलहंसीं च काकेन? ।
हतविधिरिह सन्धित्सति? रहस्यमेतस्य को विजानीते ? ॥

62. आकर्ण्योदन्तं तं निर्घातहतेव मूर्छिता बाला ।
क्षणमुत्थिता प्ररुदती नाश्नात्यङ्गं न संस्कुरुते ॥

63. गत्त्वा सा प्रमदवनं लतिकाकुञ्जान्तरे समासीना ।
म्लानमिव पुष्पमविधा! अविधा! सन्तप्यते विषीदन्ती ॥

64. समुत्सृजन्ती बहुशोऽश्रुधारा विनिश्वसत्युष्णमतीव दीर्घम् ।
दुनोति रोदित्ययते विमोहं हसत्यसौ जल्पति किं वदामि ?॥

65. धृतिं कथं स्थापयाम? कथमाश्वासयाम च? ।
विदुषी किं न जानाति? उपचारकथा इति ॥

66. सम्प्रति पुर आस्कन्ने प्रतिरुद्धे जनगमागमे नितराम् ।

In Public domain. Digitization Muthulakshmi Research Academy

प्रेषयितुमनीशा ते वार्तामुत्ताम्यति क्रियामूढा ॥

67. साकं तयाश्रूणि विमुञ्चतीं मां निरीक्षमाणा मृजती दृगम्बु ।
सगद्गदं, सोच्छ्वसितं, सशोकं स्खलद्वचाः प्राह विदर्भजाता ॥

68. ननु! जानात्येव भवान् सीदन्तीं मां विपत्पङ्के ।
त्वत्तोऽन्यो नहि कोऽपि प्रभविष्णुर्मे प्रवृत्तिहरणस्य ॥

69. अत्र स्थित इव गत्वाऽयाह्यचिरेणैव मे वार्ताम् ।
हरये निवेद्य मज्जय वोन्मज्जय वा शरण्यस्त्वम् ॥

70. न भवन्तं शङ्केरन्नरयो रुन्धन्ति ये सालम् ।
न च बध्नन्त्यनिलमिव पन्थानस्ते शिवाः सन्तु ॥

71. इति मम चिबुकं स्पृशती शतकृत्वोऽयाचदेषा सा ।
दिष्ट्याऽत्र भवान् दृष्टो निवेद्य कृतकृत्यतां यामि ॥

72. जाल्मः स चैद्यः परिणेतुकामः कालाक्षमस्तां प्रसभं वधूटीम् ।
किमापतेत्तावदहं न वेद्मि न यामि यावद्विनिवृत्य तत्र ॥

73. अवधीयतां तया यत्सन्दिष्टमनाथयाऽतिदूनतया ।
ब्रुवते हीश्वर एवानाथानां नाथ इत्यार्याः ॥

74. देव! भवान् सूत्रात्मा निवसति खलु सर्वजन्तुहृदयेषु ।
न कथं जानीते भो! मम हृत्तापस्य नैष्ठुर्यम् ॥

75. चैद्याय पिशाचाय समर्प्य मां बलिपशुं भवद्दासीम् ।
भ्राताऽनुग्रहमिच्छति मम शरणं भवतु तावकं चरणम् ॥

76. जाताऽस्मि तव कृतेऽहं यौवनमुपहर्तुमात्मीयम् ।
गोपायितमद्यावधि हर्तुं यच्चोर उद्युङ्क्ते ॥

77. हृदये करोति धिक्! धिक्! हत दैवं शुनकगलमलङ्कर्तुम् ।
तुलसीमालां देव! तव कण्ठस्योचितां पश्य!

In Public domain. Digitization Muthulakshmi Research Academy

78. विवेकलाभात्प्रभृति त्रिशुध्या व्रतानि पुण्यानि तपांसि कानि ।
भवन्तमुद्दिश्य पतिं कृतानि मया कथं नाम भवान्नवेति ।।

79. हन्त! मम भाग्यवल्ली शुष्यति दुर्विधिनिदाघतापेन ।
अविधा! अविधा! जीवित वृक्षो वन्ध्यायते गतिः काऽत्र ?।।

80. मनसा वाचा क्रियया चाहं त्वां कामये भगवन् ! ।
किं वा हालाहलं भोः पीयूषं पिपायिषसि? ।।

81. क्रियते मयोपगानं मधुरं तव गीतरागस्य ।
हस्ताम्लबश्च प्रियचरतस्ते दीयते वनान्तेषु ।।

82. भाषितानि मया कानि? चरितं च मया कथम् ।
किं चिन्तितं चान्तरा त्वां साक्षी किं नावगच्छसि ।।

83. शिशुना धृतशैलेन त्राता आर्तास्त्वया शिलावृष्टेः ।
न कथं युवा विपन्नां मां चैद्यादीशिषे त्रातुम् ।।

84. सूत्रप्रायेणैवं मुग्धा सन्दिशति वैदर्भी ।
अवधत्तां प्रागुक्तं भाष्यप्रायमिति तत्सर्वम् ।।

85. मा नाम मुञ्चेज्जलमज्जनेन वोद्बन्धनेन ज्वलनेन वाऽसून् ।
कासालहा सा गतवारिबन्धो यथा वृथा मास्तु तवाभियानम् ।।

86. नहि चिरयितुमनार्हति भवान् विलम्बात्सुधापि भवति विषम् ।
त्वं नाम गृहीतार्थः श्रुत्वा देवः प्रभवतीह ।।

7

87. एवं ब्रुवाणः शुक आत्मरूपं हित्वा स विद्युल्लतिकेव दीव्यन् ।
दिव्याङ्गनारूपमवाप्य तस्थावुवाच चाश्चर्यगतं हरिं सा ।।

88. सखी पुराऽहं भगवन्! रमायाः? सा कीरवाग्मिमधुरं लपन्तीम् ।
मां कीरनाम्नाऽह्वयते स्म किन्तु विद्युल्लता नाम मदीयनाम ।।

In Public domain. Digitization Muthulakshmi Research Academy

89. चापलेन हृतं देव्याश्चित्रवर्णाभमम्बरम् ।
शशाप कुपिता चित्रवर्णकीरो भवेति माम् ॥

90. भटापराधः प्रणिपाततुल्यो मां मर्षयेति प्रणता प्रसन्ना ।
अन्वग्रहीत्सा मम शापमोक्षं सन्देशहृत्त्वेन विदर्भजायाः ॥

91. चित्राङ्गकीरत्वमवाप्य सद्यश्चरन् विदर्भेश्वरकेलिवन्याम् ।
भटैर्गृहीतोऽध्युषितोऽस्मि भैष्मी प्रासादमद्यावधि तत्प्रसादः ॥

92. तस्याः सन्देशमाहर्तुं मुहूर्तोऽयं प्रतीक्ष्यते ।
प्रसादात्तव लब्धोऽद्य शापान्मुक्ता कृतिन्यहम् ॥

93. परामृशन्ती स्वकरेण तन्वी चोचुम्ब्यते स्मादधती प्रकोष्ठे ।
पीयूषकल्पान्यवचित्य वृक्षात्फलानि मामाशिशदादरेण ॥

94. अजीगणद्धन्त! सा मां प्राणान् देव! बहिश्चरान् ।
जननीवदपिप्रीणच्छ्रियः! सेवा कथं मुधा?

95. विसृष्टाऽहं हरे! यामि त्रायतां सा तपस्विनी ।
स्मर्तव्याऽहं सङ्कथासु भवदेकान्तगोष्ठिषु ॥

96. इत्थं निवेद्यात्मकथां समूलमामन्त्र्य दामोदरमप्सराः सा ।
निषेवितुं निर्जरसुन्दरीणां श्रियं शिरोरत्नमयाद्दिवं द्राक् ॥

8

97. निशम्य सन्देशमचिन्तयत्स कृष्णः पुरस्तादिव दृश्यते सा ।
संवादिनी प्राक्छ्रुतनारदोक्तेः शुकोक्तिरालस्यमसाम्प्रतं मे ॥

98. यावान् स्नेहस्तस्या मयि तावानस्ति तस्यां मे ।
सा सन्दिदेश नाऽहं द्वावप्यावां समन्मथावार्तौ ॥

99. शुभस्य शीघ्रमित्याहुर्विलम्बः फलभञ्जनः ।
सञ्चिन्त्यैव रथे हैममारूढः प्रस्थितो हरिः ॥

In Public domain. Digitization Muthulakshmi Research Academy

100. बलवद्विवाहमीक्षितुकाम इव जगाम चैद्यरुक्मिण्योः ।
कल्याणवेदिकायां सन्नद्धायामनाहूतः ।।

101. निर्व्यूढकल्पमुद्वाहं विहन्तुं खल आगतः ।
इति चैद्यः क्रुधाध्मातो द्रोग्धुं तस्मै मनो दधौ ।।

102. विवाहनेपथ्यमपास्य धृत्वा स मृत्युनेपथ्यमिवाहवार्हम् ।
शौरिं चमूभिः सह मागधाद्यैरुरस्रवत्पर्वतमभ्यधावत् ।।

103. एकेकस्यैकैकं धृत्वा रूपं निपात्य योधांस्तान् ।
चरणेन मत्कुणानिव मृद्नन् स घ्नन् प्रचक्रमे समरम् ।।

104. सन्तर्पयामास कृतान्तकल्पः पिशाचकान् फेरवगृध्रकाकान् ।
वसास्थिमांसै रुधिरैर्हतानां विद्विट्चमनां भगवान्मुरारिः ।।

105. कङ्का भ्राम्यन्ति स्म नभः पथे भुवि कबन्धाश्च ।
धावन्तिस्मास्रकराः कलहाशो नृत्यति स्म सन्तृप्तः ।।

106. कः खड्गः? किं शस्त्रम् ? किमस्त्रमीशं सुदर्शनस्य भुवि? ।
प्रभवति निर्घातस्य किमातपत्रं कराग्रस्थम् ? ।।

107. न म्रियते जन्तुरिह ब्रह्मास्त्राद्वा त्रिशूलाद्वा ।
अशनेरनाप्तकालः प्राणीच्चैद्यो हतोऽपि चक्रेण ।।

108. हस्ताद्भ्रष्टा दूरोद्गतेव शाखा ममाभवत्तरुणी ।
इति दुःख्यन् भग्नाशो दध्यौ चैद्यः पलायनं मन्त्रम् ।।

109 . किन्वपश्यद्बिडालास्यं चेदिराट् प्रातरुत्थितः? ।
यतो जयश्रिया साकं रुक्मिणी हरिणा हृता ।।

110. उपहसित इवापहसन् प्रभग्नपाद इव च प्रहर्तुमनाः ।
हरिमिच्छुरवज्ञातुं चैद्योऽवज्ञाततां गतस्तत्र ।।

In Public domain. Digitization Muthulakshmi Research Academy

9

111. हरिरायातोऽपि शुको नायातोऽत्राद्ययावदागच्छन् ।
बद्धो नु परैरिति सा वैदर्भी विव्यथे भृशं तस्मै ॥

112 . हरिरागत इति हृष्टा नायातः कीर इति विषण्णा च ।
पर्यायेणास्या हृदि प्रमोदखेदौ विशिष्येते ॥

113 . हरिः प्राप्तस्तस्य हेतुर्न मे मित्रं कथं न्विदम्? ।
इति प्रलुप्तसम्मोदा साऽमुह्यद्विमनायिता ॥

10

114. अतर्किता‌गतायात्र पिशाचं बलिकाङ्क्षिणम् ।
सीमान्तस्य प्रापयित्रे चक्रिणे स्वागतं ददुः ॥

115. प्रतिरोद्धुमनीशोऽस्मि कातरश्चैद्यमुद्धतम् ।
युवयोरपराद्धश्च प्रतीपाचरणाद्धरे ! ॥

116. पापलिप्तो मृष्यतामित्याह रुक्मी पतन् पदोः ।
परामृशन्नस्य शीर्षमनुजग्राह केशव : ॥

117. कल्याणवेदिका जाता चैद्यस्य रणवेदिका ।
अभूत्कल्याणवेद्येव रुक्मिणीकृष्णयोः पुनः ॥

118. विवाहविघ्नपापस्य । प्रायिश्चित्तकृते हरिः ।
गृहीत्वा रुक्मिणीपाणिं ममज्ञानन्दसागरे ॥

11

119. जन्मारभ्य प्रीयमाणां तपस्यन्तीमिव स्थिताम् ।
सोपेक्षेत कथं भक्तत्राणार्थं बद्धकङ्कणः? ॥

120. परिणीतानां पश्चाद्धरिणा षोडशसहस्रतरुणीनाम् ।
महिषीपदमाप्ताया रुक्मिण्याः किं वदेम सौभाग्यम्? ॥

In Public domain. Digitization Muthulakshmi Research Academy

121. प्रायेण श्रेयसां विघ्नान्यापतन्त्यनिनिलाहताः ।
अब्दा इव विशीर्यन्ते सुप्रसन्ने हरौ यदि ॥

12

122. कथयित्वा रुक्मिण्यै शुकस्य शापं च तस्य मोक्षं च ।
हृदयं प्रसाद्य च तया निर्विशतिस्मेप्सिताः केलीः ॥

123. तद्वन्द्वं भाति स्म शारीकीरमिव केलिवनिकासु ।
कुञ्जेषु शाद्वलेषु च संघृष्टान्योऽन्यगण्डकं विहरत् ॥

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

विप्रवीरम्

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

भूमिका

तत्रभवता शिरोमणिबिरुदभाजा श्री सन्निधानोपाह्व सूर्यनारायणशास्त्रिणा विरचितमिदं विप्रवीरनामकं काव्यम् । यदामूलाग्रं मया सूक्ष्मदृशा पर्यालोकितं परिशीलितं च । अयं स्वस्यैवान्ध्रकाव्यस्य स्वानुवादः । नाम्नैवेदं वीररसमयं काव्यमिति अवगम्यते । अत्र काव्यभाषा सुललितपदबन्धा । मृद्वी, मधुरा, परिवृत्यसहिष्णुश्च शय्या । न हि कौतूहलायापि दीर्घसमासा सङ्घटना । न चान्वयक्लेशः । नैव शब्दालङ्काराडम्बरः । अमूलचूडं प्रसादगुणः प्रस्फुरति । इत्थमुत्तमकाव्यगुणसम्पन्नमिदं खण्डकाव्यं सचेतसां केषां चेतांसि नावर्जयति? नेयमतिशयोक्ति यत्सर्वथा काव्यमिदं, कालिदासकाव्याननुकरोतीति ।

काव्येऽस्मिन् प्रयुक्तैः निश्चप्रचं, अभ्रंलिहता, तृणायमन्ता, अभिप्रैरिरत् । आदिपदैरस्य काव्यकर्तुर्न केवलं व्याकरणशास्त्रपाण्डित्यमपितु, समुचित प्रयोगकौशल्यं चोद्घाट्यते।

दूये कुतोऽहं न कृतेति वन्ध्या, माभूः पतङ्गो मम विक्रमाग्नौ उत्याद्युक्तयो भावगाम्भीर्यमुद्योतयन्ति । मुहूर्ते विन्ध्यो यथाभ्रंलिहतां गतोऽयम् । निर्वाणकाले किल जाज्वलीति दीपः यतोऽसि रुत्प्रैक्षि जनैस्तदङ्गम् इतीदृशानि वाक्यानि कवेर्लोकज्ञताचणत्वमद्घोषयन्ति । किं बहुना? काव्यरचनाया बीजभूते प्रतिभाव्युत्पत्ती ग्रन्धकर्तुरस्य मूलधनम् ।

किञ्च सुरुचिरेण पात्रचित्रणेन कविनानेनायोजिता जीवकला काव्यवस्तुनः । तथाहि - अत्र समरश्रान्तं खड्गतिक्कं स्रस्तखड्गं, निरुरुत्सून् शत्रूनवधून्वन् पुच्छेन, दशन् रदैः, निघ्नंश्च खुरैरश्वः समराङ्गणादपानयदिति भावकल्पना विशेषो न तु केवलं हृद्य एव । किन्तु पुरातनकाले रणोपयुक्तानां तुरङ्गाणां विपन्नस्य स्वप्रभोः श्लाघनीयमानरक्षणस्वभावमपि प्रकटीकरोति ।

पुरातना वीरधर्माणो भारतवर्षीयाः प्रशंसन्ति स्म वीरशयनगतं पुरुषम् । गर्हयन्ते स्म च पलायितमतीव । काव्येऽस्मिन् समरायतः खड्गतिक्कः पौरैः स्वीयजनैश्चात्यन्तं गर्हितः । यतस्ते सर्वे वीरवंशप्ररोहाः । नायं कविः सन्तृप्तोऽनेन तीव्राभिमर्शेन । किञ्च शिष्यमुखेन

In Public domain. Digitization Muthulakshmi Research Academy

विमुक्त वीर्यात्पुरुषाद्वरीयान् । सहस्रकृत्वो भुवि षण्ड एव ॥

इति निवर्हयता ग्रन्थकर्त्रा भारतवीरनारीसम्प्रदायः सुष्ठु निर्दिष्टः ।

नेदं काव्यवस्तूत्पाद्यम् । किन्तु प्रख्यातम् । आसीदयं वीरः खड्गतिक्कः सेनानीस्त्रयोदशशताब्द्यां मनुमसिध्धाख्यस्य कस्यचिदान्ध्रराजस्य । नायं साधारणो वीरः । वीराग्रणीरेव । जात्यायं विप्रः परशुराम इव । कर्मणा क्षत्रियः । न चायमवरो द्रोणाद्वाश्वत्थाम्नो वा । अखर्वविक्रमैस्तैस्तुलामधिरोढुमर्हत्येव ।

अहो! अभाग्यं यदीदृशस्य महावीरस्य नामापि परराष्ट्रीयैर्न शृतमद्य यावत् । अनेन काव्येन परेषामिममान्ध्रवीरं परिचितं कुर्वता ग्रन्थकर्त्राऽनल्पा श्लाघ्या च सेवा कृतेति मयायं कविरभिनन्द्यते ।

शिरोमणिः वेदाल तिरुवेङ्गलाचार्यः
न्यायालङ्कारशास्त्राध्यापकः संस्कृतमहाविद्यालयः
अल्वाल् आन्ध्रप्रदेशः

In Public domain. Digitization Muthulakshmi Research Academy

विप्रवीरम्

1. दुर्गार्गलौ यस्य भुजौ किणाङ्कौ खड्गो महान् राज्यरमाङ्गरक्षा ।
स मन्मसिद्धिप्रभुदण्डनाथस्तिक्काह्वयोऽन्ध्रेषु पुरा किलासीत् ।

2. अखङ्गपाणिर्न कदाप्यभूत्स यतोऽसिरुत्प्रैक्षि जनैस्तदङ्गम् ।
अमात्यतिक्कस्य पितृव्यपुत्रः स खङ्गतिक्कव्यपदेशमाप ।

3. शिरांस्यरीणां गगनान्तराल उत्पातयन् कन्दुकलीलयाऽसौ ।
भञ्जन् रथांश्च द्विषतां पदेन दर्पोद्धतोऽरंस्त रणोत्सवेषु ।

4. हृत्पिण्डभेदी परमण्डलस्य स्वीयं प्रतिष्ठाप्य पुरीषु तेषाम् ।
जयध्वजं, तन्मकुटानि हृत्वा समार्पिपत्तान्युपदा नृपाय ॥

5. किं सोदरः स्यात्पृथुविक्रमस्य द्रौणेः? प्रचण्डोऽपरभार्गवो नु?।
इति प्रवीरैः प्रमुखैरधार्षीत् प्रश्लाघ्यमानः स यशः किरीटम् ॥

6. प्रवृत्तिमार्गं परिहृत्य शान्तो जिजीविषुर्यो जितकाशिवृत्या ।
विप्रः स दम्भोलिरिवारिशैलान् भेत्तुं प्रभुः स्याद्यदि खड्गधारी ॥

7. प्रज्ञाबले तिक्कनमन्त्रिराजस्तत्खड्गतिक्कस्य भुजाबले च ।
अकुण्ठिते जाग्रति मन्मसिद्धिः शक्तित्रयीसिद्धिमवाप बाढम् ॥

8. कदाचनास्थानगतं नरेन्द्रं सामन्तभूतैः स्वजनैः समेतम् ।
उपेत्य कश्चिद्भट उत्तरीय ग्रन्थिस्थलेखं प्रददे विनम्रः ॥

9. नृपाज्ञया वाचयति स्म मन्त्री तिक्कस्तमुद्वेष्ट्य यथेदमाह ।
श्रीयादवः काटमसार्वभौमः सामन्तराजं प्रति मन्मसिद्धिम् ॥

10. तद्वाचयित्वा स तदुत्तरार्थमवाचयन् रुद्ध इवास्त यावत् ।
प्राहस्म तावत्सचिवं स सिद्धिर्धिक्! स्थीयतामित्यतिरूक्षकण्ठम् ॥

11. पुनर्बभाषे विहसंश्च किं? किं? स सार्वभौमो यदुवंशरत्नम् ।
सामन्तराजः किमहं ? मुहूर्ते विन्ध्यो यथाऽभ्रंलिहतां गतोऽयम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

12. निर्वाणकाले किल जाज्वलीति दीपो मतिश्चाप्यवसानकाले ।
तेजस्विनीति प्रवदन्ति विज्ञा आसन्नकालः किमयं प्रलापी ॥

13. क्षुद्राऽस्यजातिश्चरणेन दम्यः स मन्यते कातरतां क्षमां ते ।
विनाशकाले विपरीतबुद्धिरास्तामिदं वाचय लेखमान्तम् ॥

14. इति प्रणुन्नः पठितुं प्रवृत्तो लेखोत्तरार्थं कथमप्यमात्यः ।
श्रुतोऽद्य लेखस्तव देयशुल्कं गोग्रासहेतोर्भवता न दत्तम् ॥

15. प्रतिक्रियाऽस्य क्रियते मयेति बिभीषिका ते नहि मानिसह्य ।
त्वयैव देयं चतुरब्दशुल्कं न दत्तमद्यावधि विस्मृतोऽसि ॥

16. स्थितं च मूकेन मयाद्ययावत् क्षान्तात्मना सम्प्रति विप्रतीपम् ।
त्वल्लेख्यमाभाति फलं त्वदीयप्रतिक्रियाया अचिरात्स्वदेथाः ॥

17. सामन्तचक्रे प्रभुताऽस्ति राज्ञां सर्वङ्कषा किं बहुना? त्वदीये ।
क्षेत्रे न दोषाय गवां प्रचारो दोषाय चायं मयि शुल्कदण्डः ॥

18. धिक् त्वां न जानामि परात्मकीयं यत्तारतम्यं यदि सानुतापः ।
क्षमापणं नार्पयसि त्वदीयलेख्यस्य धार्यं हि भवेत्करेऽस्त्रम् ॥

19. आदिश्यते तेऽद्य मदातपत्रच्छायागतः प्राणिहि जीवितेच्छुः ।
माभूः पतङ्गो मम विक्रमाग्नौ जाज्वल्यमाने स्वजनैः सह त्वम् ॥

20. पदं त्वयैव क्रियते विवादे भुजङ्गमुत्थापयसि प्रसुप्तम् ।
मूर्धाभिषिक्ता वयमित्यवेहि किमस्ति वक्तव्यमितोऽधिकं ते ॥

21. इत्युद्धतं काटमराजलेखमान्तं समाकर्ण्य जगाद भूपः ।
किं सन्निपातज्वरदोष एष? ईदृक्प्रलापाः कथमन्यथा स्युः ॥

22. निपत्य स्वल्पात्मपदोर्ययाचे ! स दुर्जनः काटमराज इत्थम् ।
न ग्रासलेशो मम राज्यभागेऽनावृष्टिहेतोः पशवो म्रियन्ते ॥

23. देह्याश्रयं भोः शरणार्थिनीभ्यो गोभ्यश्च मह्यं प्रतिदीयते ते ।

In Public domain. Digitization Muthulakshmi Research Academy

शुल्कं च गोरक्षणपुण्यमाप्नोत्येकक्रिया द्व्यर्थकरी तव स्यात् ॥

24. सोऽभ्यर्थ्य तस्मिन् समये तथा मामद्य प्रतीपं वदति द्विजिह्वः ।
ईदृक्छठाः स्त्रीं जननीं पुरस्थां ब्रुवन्ति दारान् हि परोक्षभूताम् ॥

25. गावश्च देवाश्च धरामराश्च सम्भाव्यमाना भुवि तुल्यपूताः ।
फलार्थिभिर्नैव कदाऽपि सेव्या अस्माभिरेते दृढभक्तिभावैः ॥

26. ददातु शुल्कं न ददातु जाल्मः किं लभ्यते ? किं परिहीयते नः ।
पिधीयतामस्य मुखं प्रलापैर्दुर्गन्धभूयिष्ठमतीव गर्ह्यम् ॥

27. यावत्स सिद्धिर्व्यरमन्नृपालस्तावत्सदस्याः परितस्तमीशम् ।
सेनान्य ऊचुर्ज्वलनस्फुलिङ्गान् प्रवर्षयन्तः क्रुधिता दृगन्तैः ॥

28. किं न श्रुतं तेन? पलायतेति रक्केसगङ्गो रणरङ्गसीम्नः ।
नाकर्णितं किं? समपद्यतेति कर्णाटभूपो विजयोऽभयं च ॥

29. श्रुत्वा विदित्वापि च तस्य वीर्यं विस्रम्भितः केन तथा व्यजल्पत् ।
प्रभञ्जनं हन्त! निरोद्धुकामो वृक्षः प्रवृद्धो न पतेत् क्षितौ किम् ॥

30. अस्मभ्यमेवार्पयितव्यशुल्कमस्माभिरेवार्प्यमिति ब्रवीति ।
प्रतीपभाषी भवति प्रतीपं स्वभाग्यमेवेति न वेत्ति मूर्खः ॥

31. स्वसार्वभौमत्वमथास्मदीयं सामन्तराट्त्वं महितं खतेजः ।
निर्णेष्यति श्वो रणरङ्ग एव न स्युर्विलापाः किमु तत्प्रलापाः?

32. पतङ्गवद्यो डयते खमुच्चैरवश्यमन्ते निपतेत्स तावत् ।
रक्षांसि दृप्तानि पुरा न कानि भ्रष्टान्यथोऽथो ? न पतेदयं किम् ॥

33. एकोऽपि वीरः समरेऽस्मदीयो भूत्वा सहस्रं तपना ज्वलन्तः ।
पराम्बुधीन् शोषयितुं प्रभुः स्यात् सोऽद्यैति निश्चप्रचमायुषोऽन्तम् ॥

34. आस्माकखड्गा विनिपत्य कण्ठे शत्रोस्त्वरन्ते विनिकर्तनाय ।
द्विबाहवोऽप्यद्य सहस्रबाहा इवारिसेनामभिभञ्जयामः ॥

In Public domain. Digitization Muthulakshmi Research Academy

35. शब्दापयामो नृप! युद्धभेरीमाज्ञापयास्मानिति भाषामाणान् ।
आजिज्ञपद्दुर्दमविक्रमांस्तान् पीठात्समुत्थाय मुखं क्षिपन् सः ॥

36. प्रतिश्रुतं शुल्कमनर्पयन् स्वं रणाय बीजं वपति स्म धूर्तः ।
स काटमेशः प्रभुभिर्मदान्धैर्निधीयतेऽधर्मपथे हि पादः ॥

37. रणाब्धिसञ्चारिबलारिमत्स्यग्रसिष्णवो वीरतिमिङ्गिलौघाः ।
व्यादाय वक्त्राणि नृपस्य सिद्धेराज्ञां दधानाः शिरसि प्रयाताः ॥

38. शौर्योष्मणा नाम विजृम्भमाणा वुवूर्षवो राज्यरमां परेषाम् ।
धृत्वा किणाङ्केषु भुजेषु वीरचिह्नानि शूरा ययुराहवोर्वीम् ॥

39. निरीक्षमाणो यमदण्डमेव यदीयदोर्दण्ड मरिर्बिभीयात् ।
स तिप्पराजोऽगमदाहवाय कुर्वन् श्रवोऽरुन्तुदमुग्ररावम् ॥

40. वक्षःशिलायां करवालधारा यः कुण्ठितास्ते जयते रणेषु ।
श्रीकण्ठराजो गतवान् प्रकीर्त्यः श्रीकण्ठ एवेति धृताक्षियुग्मः ॥

41. समुद्गतोऽभूद्भुजवीर्यसारः किन्वित्युदग्रं जनशङ्क्यमानम् ।
स्कन्धद्वयं यस्य मनोज्ञभीमं स चोक्कराजो रणरङ्गमाप ॥

42. वर्मायते यस्य शरीरयष्टेः श्लक्ष्णोत्तरीयं समरेषु शूरैः ।
यो गुप्ततेजा इति शस्यते स गैकोण्ड गंग्राज इयाय युद्धम् ॥

43. करोति यः पाणितलं हि खेटं परापतत्सु प्रथने परेषु ।
तृणाय मन्ता प्रतिराट्चमूनां सङ्ग्रामभूमिं स गतोऽच्चिराजः ॥

44. नृसिंहवद्यो नखरैर्निशातैर्दृप्तारिवक्षो विद्दणाति वीरः ।
कुर्वन् स हुंहुं बसवाभिधोऽगात् दोश्चण्डकण्डूत्यसहो रणाय ॥

45. नर्दन्त उत्सिक्तवृषा इवोच्चैर्बृहन्त उन्मत्तगजा इवोग्रम् ।
गर्जन्त उद्दृप्टमृगेन्द्रतुल्या योद्धार आयोधनरङ्गमायन् ॥

46. यथा गिरीणां कनकक्ष्माभृदैरावतश्च प्रथितो द्विपानाम् ।

In Public domain. Digitization Muthulakshmi Research Academy

अग्रेसरो वीरभटच्छटानामं स खड्गतिक्को॑ऽतितमां बभासे ॥

47. रक्तोपवीतः कृतरक्तगन्धचर्चाशरीरो मुखरक्तपुण्ड्रः ।
धृत्वा स रक्तस्रजमात्मकण्ठे समिञ्जयश्रीवररूपमाप ॥

48. निशम्य दीक्षां समरस्य सिद्धेः प्रतिप्रयत्नान् कृतवान् परोऽपि ।
प्रलोभिता राज्यधनै रिपोस्तत्पक्ष्याययुर्विक्रमितुं क्षितीशाः ॥

49. पल्नाटिवीरः खलु पद्मनायः पराङ्मुखाङ्घ्रिर्न कदापि जन्ये ।
यो राजमार्ताण्ड इति प्रतीतो भेत्तुं गतः सोऽरितमिस्रराशिम् ॥

50. श्रुत्वा वधूक्तां प्रियवल्लभेति वाचं नृपा क्षुब्धहृदो भवन्ति ।
राड्वल्लभः श्मश्रुभयङ्करास्यः स वल्लभाख्यः समरं प्रयातः ॥

51. पतिर्जनानां करियालराजो वीराग्रणीः प्रास्थित युद्धरङ्गम् ।
स्त्रीम्मन्यमाना हृदि नम्रशीर्षा भवन्ति शूरा अपि यं प्रतीक्ष्य ॥

52. आस्फालयन्तोऽसकृदात्मवाहा दण्डान् प्रकामं प्रलपन्त उच्चैः ।
कुर्वन्त उग्रान् पटुसिंहनादान् रणं गताः काटमराजपक्ष्याः ॥

53. सेनापती काटमराजचम्वाः स ब्रह्मरुद्राह्वय विप्रवीरः ।
शूरो महान् पिन्नमनायकश्च दंष्ट्रे इवास्तां पृतनापृदाकोः ॥

54. पालेरु तीरस्थित पञ्चलिङ्गनाम्नो महाग्राव्ण उपत्यकायाम् ।
आस्फालयन्त्यौ दृढबाहुदण्डान् सेने उभे विक्रमितुं प्रवृत्ते ॥

55. उवाच सैन्यं प्रति खङ्गतिक्कचम्वा इयत्या नहि कार्यमत्र ।
धिक्! कः प्रयोक्तुं चटके वराके ब्रह्मास्त्रमुद्युङ्क्त ? इह स्त! यूयम् ॥

56. एकाक्यहं तान् प्रतिवीरयोधानभिद्रवामीति वदन्नधावत् ।
रिपोश्चमूं पिन्नमनायकश्च करेण संज्ञामददाद्भटेभ्यः ॥

57. एकाकिनं यान्तमवेक्ष्य केचित्सङ्ग्रामकण्डूतिवहाः प्रवीराः ।
न स्थातुमीशा विनिवारिता अप्यनुप्रयाता निजदण्डनाथम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

58. वीरायमाणाः कलहायमानाः कुन्ताश्च खड्गाश्च मिथः प्रहृत्य ।
भुजन्ति भञ्जन्ति च सिंहनादा अन्योऽन्यहृन्दि स्फुटयन्ति तत्र ॥

59. जिघांसवोऽन्योऽन्यमभिद्रवन्ति सिंहाश्च सिंहाश्च गजा गजाश्च ।
यथा, तथा वीरवराश्च तुल्यस्कन्धा अपाघ्नन् विजिगीषयाऽरीन् ॥

60. शिरांसि दण्डैः प्रहरन्त उग्राः प्रभञ्जयन्तो रिपुपाणिपादम् ।
उत्पीडयन्तो व्यथयन्त उच्चैर्विदारयन्तश्च मिथो बभूवुः ॥

61. अन्योऽन्यमाक्रम्य कृते नियुद्धे जेतारमन्यो विजितं करोति ।
तं कश्चिदन्यः परिभूय वीरो विजृम्भते तं च परो निहन्ति ॥

62. कुण्ठीभवन्ति प्रदरा निशातास्तद्वज्रकायेषु निपातितास्तैः ।
ज्वलन्त्य उल्का इव दृष्टिपाताः परस्पराङ्गानि दहन्ति हन्त ॥

63. तं खड्गतिक्कं शतकोटितुल्यं खड्गं गृहीत्वा रिपुशैलबृन्दे ।
पतन्तमुद्वीक्ष्य चमूः परेषां पृष्ठादपप्तत्तदुपर्यकस्मात् ॥

64. भोः! खड्गपाणौ सति खड्गतिक्के न कार्यमस्माकमिति ब्रुवाणाः ।
स्वं स्वं भटाः सिद्धिनृपस्य मद्यपीताः स्खलन्तो न गताः सहायाः ॥

65. असंख्यकं काटमराजसैन्यं ते खड्गतिक्कानुचरा गणेयाः ।
दृप्ता अभिप्लुत्य मिथः पदानि पश्चादकृत्वा ननृतुः समीके ॥

66. चमूद्वये तत्र नियुध्यमाने सिद्धेर्भटौघो विधिदुर्विपाकात् ।
अशेत भूमौ गुरुदीर्घनिद्रावशो विना केवलखड्गतिक्कात् ॥

67. एकोऽपि तिक्कोऽशिथिलात्मसारोऽपराङ्मुखः शात्रवकण्ठवल्लीः ।
बाहुद्वयीकर्तरिकामुखेन कृन्तन् सदर्पं युयुधे चिराय ॥

68. पुरः स्थितः पिन्नमनायकोऽत्र हस्तेन सेनां विनिवार्य युद्धात् ।
मूर्धाञ्जलिस्तिक्कनदण्डनाथमुपेत्य भक्त्या परया बभाषे ॥

69. विप्रो भवान् भो वयमन्यजात्याः कुर्मोऽन्वहं ब्राह्मणपादसेवाम् ।

In Public domain. Digitization Muthulakshmi Research Academy

साष्टाङ्गपातं प्रणिपत्य याचे विरम्यतां घोररणादमुष्मात् ॥

70. वीरा इमे चूर्णयितुं कुलाद्रीन् विवर्तितुं च प्रभवो धरित्रीम् ।
ब्रह्मन्! स्पृशेन्नः परिहार्यविप्रहत्याघ इत्यात्मनि शङ्किताः स्मः ॥

71. अभाषमाणः प्रतिभाषणं तद्विभीषिकाश्चागणयन् स तिक्कः ।
प्रत्युत्तरं च क्रिययैव दातुं परानभिप्रैरिरदुद्धतोऽश्वम् ॥

72. मुहूर्तमात्रेण नुदंस्तुरङ्गमायोधने कल्किरिवारियोधान् ।
छिन्दंश्च भिन्दंश्च रणाङ्गणं तच्छवावकीर्णं कृतवान् स शूरः ॥

73. निर्धूय शत्रून् स तथाभियुज्य स्विन्ने शरीरे, शिथिले स्वमुष्टौ, ।
भ्रष्टे च खड्गे बत! खड्गतिक्कः पपात पल्याणतले हयस्य ॥

74. तथाविधं तिक्कमपारयन्तं योद्धुं तुरङ्गोऽनयदात्मगेहम् ।
पुच्छेन धून्वन्, स्वखुरैर्विनिघ्नन् रदैर्दशंश्चारिभटान् रुरुत्सून् ॥

75. सङ्ग्रामरङ्गादपनीयमानो विमूढ आत्मानमवेन्न तिक्कः ।
प्रबुद्धवानप्ययमर्धमार्गे न्यवर्तयद् ग्लानतनुर्न वाहम् ॥

76. श्रान्तेन कष्टं! भवितव्यमेते नेति क्षमन्ते नहि जातु लोकाः ।
युद्धान्निवृत्तं जितमेवमत्वा तं कातरोऽसाविति गर्हयन्ते ॥

77. पौराः स्वगेहाभिमुखस्य तस्य निस्तेज आस्यं, विजयध्वजेन ।
खड्गेन चापास्तकरं निरीक्ष्य जुगुप्समाना हसितुं प्रवृत्ताः ॥

78. तद्वीथिकापार्श्वयुगे गृहाणां द्वारेषु कान्तास्तमवेक्षमाणाः ।
मुखं परावर्त्य कृतभ्रुकुट्यो यथाङ्गुलिस्फोटमदूदुषंश्च ॥

79. विहाय लीलासमरं नतास्यं बाला जितं वीक्ष्य पलायमानम् ।
कश्चिद्धसन्ति स्म पलायते यो रणात्सयोवेति सहस्ततालाः ॥

80. पराभिभूतो युधि खड्गतिक्को भूत्वाधुना केवलतिक्क एव ।
पलायितोऽभूदिति काऽप्यवद्या वार्ता पुरस्तस्य गृहानधावत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

81. अरुन्तुदां कर्णयुगस्य यां हि श्रुत्वा व्यषीदत्स्वजनो गृहस्थः ।
गृहं प्रविष्टं पतिमीक्षमाणा दारा अदृष्ट्वेव गताः परोक्षम् ॥

82. अन्धश्च वृद्धश्च पिता निषण्णो गृहस्य वेद्यां समरान्निवृत्तम् ।
न युद्धवार्तां सुतमन्वयुङ्क्त न निर्वृतस्तस्य निवर्तनेन ॥

83. काव्यं पठन् कश्चन तस्य शिष्य उद्दीपनं पद्यमगायदित्थम् ।
विमुक्तवीर्यात्पुरुषाद्वरीयान् सहस्रकृत्वो भुवि षण्ड एव ॥

84. जातस्य मृत्यौ नियतेऽत्र लोके यशः कुतस्ते मलिनं करोषि ?
मृत्युर्महीयानिति शस्यते हि वीरप्रकाण्डैरयशः कलङ्कात् ॥

85. माताऽवबुध्यापि तदागमस्य वार्तामबुध्वेव गृहान्तरेव ।
मग्ना क्रियास्वात्मजमागतं न सभाजयन्त्यालपदल्पवाचम् ॥

86. न तत्र कोऽप्यास्त भटो हयाय ग्रासाम्बुदानाय, परिग्रहीतुम् ।
विसृष्टवस्त्राणि मलीमसानि धौतानि वासांसि च दातुमस्मै ॥

87. दूरङ्गतस्तं तनयोऽनुपेत्य प्रियैर्वचोभिर्बहुलालितोऽपि ।
सर्वोऽपि तं न्यक्कुरुते स्म हन्त! परोऽभवत्स्वीयजनस्य चासौ ॥

88. कटे निपात्याङ्गमसौ प्रवीरः प्रारभ्य पौरप्रकरापहासम् ।
पराभवं प्राप्तमिहाद्ययावत् स्मृत्वाऽभवद्गाढविषादमग्नः ॥

89. तदा श्रुता काप्यशरीरवाणी निर्वर्त्यतां स्नानमितिप्रकारा ।
मत्वाऽन्यमेवात्मपतिं न गत्वा परोक्षमेवाटति तत्कलत्रम् ॥

90. स्नातुं गतस्तत्सदनस्य पश्चान्निगूढदेशे वनिताजनार्हे ।
रवट्वावृतेऽभोघटमास्यलेपं हारिद्रचूर्णं च ददर्श तिक्कः ॥

91. नाम्ना स *तिक्कः प्रथमेऽस्य कोपतिक्तस्य तन्नाम बभूव सार्थम् ।
मनः प्रतिष्ठाप्य विशीर्णमेतत्किमित्यपृच्छत्स्ववधूं सरूक्षम् ॥

92. तूष्णीं स्थिताऽद्यावधि याऽब्रवीत्सा विसृज्य धिक् ! पौरुषमागतोऽसि ।

In Public domain. Digitization Muthulakshmi Research Academy

तिस्रो वयं किं बहुना? स्त्रियोऽत्र किं शङ्कते? स्नातु भवान् यथार्हम् ॥

93. अदात्पिता मां पुरुषं भ्रमित्वा तुभ्यं विवाहे पुरुषस्स उक्तः ।
यः पौरुषेणावगणय्य शत्रून् जृम्भेत रूपेण तु पूरुषस्त्वम् ॥

94. इति क्रुधावेशवशा निकृत्य भर्तारमुक्त्वा परिजल्पितेन ।
तथाविधेनात्मनि निष्टपन्ती विहाय तं देशमगाद्गृहान्तः ॥

95. न मानिनी मङ्गलसूत्रहानेर्दुःख्येद्यथा तैजसहानिहेतोः ।
प्रदाय खड्गं पतिमाहवाय प्रेष्य प्रमीतं तमनुप्रयाति ॥

96. पेपीड्यमाने हृदयव्रणेऽभूच्छातेन संविद्ध इवेषुणाऽद्य ।
स किंनु पीडातिशयाप्तमोह आस्ते स्म तूष्णीं हतवाक्प्रवृत्तिः ॥

97. भ्राम्यच्छिरस्कः प्रविलुप्तदृष्टिर्विक्षुब्धचित्तः स्खलदङ्घ्रिरेव ।
स मन्दमन्दं क्षुधितः कथञ्चिन्महानसं प्रास्थित भोक्तुकामः ॥

98. न तत्र पीठे निजधौतवासः आस्ते युवत्यर्हदुकूलवासः ।
अपास्य वामेन पदेन तत्तत्रार्द्राम्बरो भोक्तुमयं न्यषीदत् ॥

99. पराजितस्य स्वसुतस्य भीरोः पङ्क्तौ सजग्धिः खलु पातकाय ।
इति प्रकुप्यन् न गतः स भोक्तुं पिता न हेतुं तनयोऽप्यपृच्छत् ॥

100. स्थितं जनन्या परिवेषयन्त्या मौनेन भुक्तं च विनम्रमूर्ध्ना ।
पुत्रेण किन्त्वेष निषेधतीष्टं पदार्थमङ्गीकुरुते त्वनिष्टम् ॥

101. भोज्यानि सर्वाण्यवमिश्र्य पिण्डानतिप्रमाणान् कुरुते च भोक्तुम् ।
भिन्ते पुनस्तांस्तनुते च भोक्तुं गृह्णन्नभुक्त्वैव बत! व्युदास्ते ॥

102. स्वाद्यं कथं स्याद्विमनायमानस्याऽस्याऽन्नमेवं कृतभोजनस्य ।
पात्रे न्यधात्तज्जननी पयांसि भिन्नानि यानि स्वमनोवदेव ॥

---

* तिक्त शब्द विकृतिस्तिक्क शब्दः

In Public domain. Digitization Muthulakshmi Research Academy

103.स कुत्सयंस्तानि पयांसि धिग्धिगिति ब्रुवाणो हृदि खड्गतिक्कः ।
सभ्रूकुटिः प्राह कुतोऽम्ब! भिन्नान्येवं पयांसीति जनन्यवादीत् ॥

104.अपास्य खड्गं त्वयि युद्धरङ्गात्पलायिते दृप्तपराभिभूते ।
चेतांसि दीर्णानि गवां ततो हि क्षीराणि दीर्णान्यवबोध! तिक्क!

105.दिष्ट्या प्रसूता पुरुषं शिशुं भोस्त्वं वीरमाता भवसीत्यशंसन् ।
सर्वा अभूत्तद्वचनं प्रतीपं दूये कुतोऽहं न कृतेति वन्ध्या ॥

106.इत्युक्तसोल्लुण्ठनवाग्विषाक्तबाणप्रघातैः प्रहृतोऽपि गाढम् ।
प्राणैर्नमुक्तो मनसा तु मुक्तः कृतोत्तरापोशन उत्थितोऽभूत् ॥

107.उत्थाय चैकान्ततटोपविष्टो विमाननामात्मगृहेष्ववाप्ताम् ।
स्मरन् स्मरन् प्रव्यथितान्तरङ्गस्तिक्कश्चिराय व्यचिचिन्तदेवम् ॥

108.जेगीय्यमानं प्रथितप्रतापैर्वीरप्रकाण्डैरवधीरयन्ते ।
मां भीरुरित्यद्य जना नगाग्राद्भ्रष्टो निमग्नोऽस्म्यवगाढगर्ते ॥

109.एकाकिनापि प्रथने मया ह्यः शतं सहस्रं च हतं रिपूणाम् ।
वाह्यालिरङ्गं कृतवान् किलाहं सङ्ग्रामभूमिं रिपुदुर्निरीक्ष्याम् ॥

110.पयांसि भाण्डस्य यथा विषस्य लेशेन दूष्याणि तथा भवन्ति ।
यशांसि मे वीर्यसमार्जितानि स्वल्पेन दोषेण कलङ्कितानि ॥

111.पलायितं नैव रणान्मयाऽश्वः समानयन्मां विमनायमानम् ।
दोषस्तुरङ्गस्य तथापि लोको मां कातरीभूतमवैति धिक्! धिक्!

112.पराभिमर्शं मम शङ्कमानस्तुरङ्गमोऽपानयदाहवान्माम् ।
नाशङ्कतासौ स्वजनाभिमर्शं कथं पशोः प्राज्ञधनं विवेकः ॥

113.मध्येऽध्वमीषत्प्रतिबुध्यमानोऽप्यज्ञासिषं नैव निवर्त्यमानम् ।
अर्धप्रबोधो न खलु प्रबोधो मृतोऽभविष्यं खलु चेत्प्रबुद्धः ॥

114.श्रद्धां न दध्यान्मम वाचि कोऽपि साक्षी च विश्वासयितुं न कश्चित् ।

In Public domain. Digitization Muthulakshmi Research Academy

न मेऽपराधोऽप्यनुमन्य सम्प्रत्युदारकल्पोऽपयशः प्रसृष्टिः ॥

115. ये मेऽपदानानि विदुः कृतानि पिता च माताऽपि च मे कलत्रम् ।
त एव धिङ्गामवधीरयन्ते कथं न वाच्यं गमितोऽहमन्यैः ॥

116. नीराजनं मेऽर्पयति प्रपत्त्या द्वारे स्थिता देवमिवेक्षमाणा ।
अपारयन्ती प्रतिभाषितुं च प्रियाऽद्य धिक् स्त्री त्वमिति व्यनिन्दत् ॥

117. रणक्षताङ्गं रुधिराभिषिक्तं क्रीडाक्षताङ्गं शिशुकं यथाऽम्बा ।
चिकित्सयित्वाऽऽशयति स्वहस्ते नैषाऽच्छिदन्मां क्रकचेन वाचा ॥

118. स्पृशन् शरीरं निजपार्श्वगं मां समिद्रहस्यान्यवबोधयंश्च ।
योऽप्रीणयत्तस्य पितुर्ममाग्निर्यथा दहत्यद्य विमूकभावः ॥

119. गात्रेष्वमीषां पटुवीररक्तमुद्गच्छतीव प्रतिरोमकूपम् ।
वृद्धा अपीमे वयसा, युवानो वीर्येण वृद्धस्तरु राढ्यसारः ॥

120. स्निग्धा इमे वीर्यकलङ्कमेतं न मे सहन्तेऽल्पकमप्यभिज्ञाः ।
दोषोपदर्श्येव सुहृद्गुणैकश्लाघापरो दुर्हृदिति ब्रुवन्ति ॥

121. प्रक्षाल्यतेऽद्यैव रणं गतेन मया कलङ्कः परवीररक्तैः ।
अक्षालयित्वा न गृहान् निवर्त्स्यामीति प्रतिज्ञाय गतो रणं द्राक् ॥

122. हृणाति किं मेरुमयं? ग्रसेत्किं नभो? मथेत्किं जलधींश्च सप्त?
किं कम्पयेद्भूमिमिति प्रतीक्ष्य तमत्रसन् काटमराजयोधाः ॥

123. स विप्रवीरोऽनलकल्प उग्रं पश्योऽपतच्छात्रवतूलराशौ ।
योऽशङ्कि नायं खलु पूर्वतिक्कः किं भार्गवो ब्राह्मणपक्षपाती ॥

124. स मत्कुणव्रातमिवारिचक्रं मृद्नन् स्वपादद्वितयेन निघ्नन् ।
नखैः खरैर्हस्तयुगस्य यूका लिक्षं यथाऽदृष्टचरं जजृम्भे ॥

125. तं भ्रामयन्तं समरे तुरङ्गं गर्जन्तमुच्चैः पटुसिंहनादान् ।
सर्वासु दिक्षु प्रविलोक्य योधाश्चकम्पिरे तिक्कशतं भ्रमित्वा ॥

In Public domain. Digitization Muthulakshmi Research Academy

126.दीर्णैः शिरोभिर्दलिताङ्गकैश्च रक्तप्रवाहैः समराङ्गणं तत् ।
यमस्य सूनापणकल्पमासीद् बीभत्समानं च जुगुप्समानम् ॥

127.ऊहन्ति केचित्खलु तिक्कशब्दस्त्र्यक्षात्पदादुद्भव इत्यभिज्ञाः ।
त्र्यक्षस्वरूपं समरे दधानो यथार्थमेवाकृत तत्स वीरः ॥

128.तं तादृशं तिक्कमवेक्ष्य युद्धरङ्गं च सूनापणसन्निभं तम् ।
सेनापतिः पिन्नमनायकोऽभूत् पश्चात्कृताङ्घ्रिः प्रविदीर्णहृत्कः ॥

129.तं ब्रह्मतेजोबलमुग्रमूर्तिं परापतन्तं न निरोद्धुमीशः ।
स प्रैरिरद्ब्रह्मकुलं समानस्कन्धं प्रवीरं युधि ब्रह्मरुद्रम् ॥

130.वीरस्य तुल्यप्रतिवीरलाभे विवर्धतेऽङ्गं नयनत्रयं च ।
वक्षोद्वयं बाहुचतुष्टयं च प्ररोहतीक्ष्येत स नून्नमूर्तिः ॥

131.प्रघट्टयन्तावचलाविव द्वौ जाज्ज्वल्यमाने इव दिव्यशस्त्रे ।
तौ पार्थकर्णाविव विप्रवीरौ मिथोऽभिहन्तुं समरे प्रवृत्तौ ॥

132.खड्गप्रघातस्य यथा च गम्यौ कुन्तप्रहारस्य न लक्ष्यभूतौ ।
द्वौ भ्रामयन्तौ कुशलं तथाश्वौ विद्युल्लते वाऽचरतां रणाभ्रे ॥

133.तौ यौगपद्येन परस्परस्य तुरङ्गयोर्व्यक्षिपतां स्वखड्गौ ।
तौ मर्मविद्धौ विकृतं रुदन्तावसून् विहायापततां धरायाम् ॥

134.तुरङ्गमाभ्यामवतीर्य तूर्णं वीर्यस्वमस्योः सकलं समर्प्य ।
मिथस्तयोर्विक्षिपतोः क्षणेन च्छिन्नं शिरोद्वन्द्वमधः पपात ॥

135.आकर्ण्य दाराः पितरौ च तस्य मृतस्य वार्तां व्यसृजन् मुदश्रु ।
दुःखाश्रुवार्दक्षिणवामदृग्भ्यां निर्मृष्टदुष्कीर्तय इत्यहर्षन् ॥

136.वृषं महेशो गरुडं रमेशः स्वराजहंसं च सरस्वतीशः ।
त्वां प्रैषिषन् वीरवरेति तैस्तैराहूत एति स्म रविं स भित्वा ॥

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

मधुकोशः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ग्रन्थपरिचयः

लघुकाव्यमिदमान्ध्रभाषायां मयैव विरचितस्य स्मरगीता नामकस्य काव्यस्य सङ्ग्रहः । आन्ध्रकाव्येऽस्ति पद्यानां शतषट्कम् । अत्र तूपशतमेव । केवलमान्ध्रग्रन्थ-परिचयदित्सयैव तस्य संस्कृतीकरणमारब्धम् ।

विदितचरमेव विदुषामेतज्ञातीयानि काव्यान्यमरभाषायां सन्ति बहूनि यथा अमरुकशतकम्, भर्तृहरेः शृङ्गारशतकम्, गोवर्धनाचार्यकृतार्यासप्तशती चौरपञ्चाशिका प्रभृतीनीति । प्राकृतभाषायां गाथासप्तशतीनामकं, हिन्दीभाषायां सत स ई नामकं चापरमस्ति काव्यद्वयम् । सर्वाण्येतानि स्वतन्त्राणि । अनयैव दिशान्ध्रभाषायामपि स्वतन्त्रकाव्यं रचयितव्यमिति कौतुकेनास्मि गृहीतः । सर्वेष्वेतेषु काव्येषु पद्यानि मुक्तकान्येव । ईदृशमुक्तककाव्यमन्तरेण Dr.S.K.De महोदयैः The Treatment of love in Sanskrit Poetry नामकग्रन्थे कथितमित्थम् ।

"In this respect, the Sataka, or centuries of Hala as well as that of Amaru, which we take up presently occupy a unique position in Indian love poetry, they not only demonstrate for the first time that love can very well form the exclusive theme of poetry and hundreds of verses can be written on its manifold phases, but they also start the tradition of the love lyric in the stanza form in which the aim is to depict within the restricted scope of solitary self-standing verse some definite phase of the emotion. Such miniature painting is a task of no small difficulty; for it involves a perfect expression of pregnant idea on an intense emotion, within very restricted limits, a few precise and elegant touches of the brush".

The treatment of love in Sanskrit poetry. page 25-26

नैतादृशानि काव्यान्यर्हन्ति गणयितुं महाकाव्येषु वा खण्डकाव्येषु वा । तत्तद्ग्रन्थकारैः शतकं, सप्तशती, पञ्चाशिकेत्यादिरूपेण कृतानि नामानि तत्तद्ग्रन्थानाम्। परीक्ष्यमाणे काव्यानीदृशानि भाणजातीयानीति मे प्रतिभाति ।

न तु वाच्यं भाणो दशरूपकान्तर्गतः । रूपकं नाम दृश्यकाव्यम् । नेदृशममरुक-शतकादिरूपकाव्यं दृश्यं भवति । किन्तु श्रव्यमिति । अमरुकशतकजातीयमिदं मुक्तककाव्यं श्रव्यमाणो भवितुमर्हति । श्रूयतां भाणलक्षणम् ।

In Public domain. Digitization Muthulakshmi Research Academy

भाणः स्यात् धूर्तचरितो नानावस्थान्तरात्मकः ।
एकोऽङ्क एव भात्यत्र निपुणः पण्डितो विटः ।
रङ्गे प्रकाशयेत्स्वेनानुभूतमितरेण वा ।
सम्बोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः ।
सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यवर्णनैः ।

अस्य भाणस्य कतिचन लक्षणान्यनुयन्ति मुक्तककाव्येऽपीति स्फुटमेव । अत उक्तमीदृशं काव्यं श्रव्यमाणो भवितुमर्हतीत्यस्माभिः । किञ्च, वाच्यं भाणलक्षणे शृङ्गारवीररसद्वयस्य समावेशो दृश्यते । न हि मुक्तककाव्ये वीररसस्पर्श इति । प्रप्रथमरचिता भाणाः शृङ्गारैकरसाश्रया एव । भावप्रकाशकर्ता कोलाहलस्याप्येवमेव अभिप्रैति। चरित्रदृष्ट्या प्राथमिका इति निश्चिताश्चत्वारो भाणा (चतुर्भाणी ग्रथिताः) श्रृङ्गारमया एव। न तत्र वीररसलेशो अपि। दशरूपकसाहित्यदर्पणादिकारैरनन्तरालङ्कारिकैरेव वीररसः प्रवेशितो लक्षणवाक्ये।

यदुक्तं हेमचन्द्रेण भाणः पृथग्जनविनोदार्थ इति तन्नास्मभ्यं रोचते। यतः कैश्चिच्छङ्क्यतां नाम यथा श्रृङ्गारैकाश्रयतया भाणः पृथग्जनविनोदाय भवतीति । किन्तु निश्चप्रचमिदं यत् कलाकौशलदृष्ट्या परीक्ष्यमाणो भाणो विद्वज्जनानामपि प्रमोदाय कल्पते। इदमत्रावधेयम् ।

अयं भाण एकपात्रकः । एकमेवपात्रं रङ्गस्थल आकाशभाषितविधया बहुविधानां नायिकानां नायकानां च भिन्नभिन्नकण्ठस्वराणामनुकुर्वत्, संलपच्च तैः साकं सहजकण्ठस्वरेण न हि केवलं पृथग्जनानामेव विदुषामपि हृदयान्यावर्जयति । इदानीन्तरेऽपि काल एकपात्राभिनेता नटः सममेव पामरान् पणिडतांश्चानन्दयतीति प्रत्यक्षमेव ।

अभिनवगुप्तप्रतिपादितं भाणलक्षणमिदमेवार्थं प्रकटयति । तथाहि - एकेन पात्रेण हरणीयः सामाजिकहृदयं प्रापयितव्योऽर्थः यत्र स भाणः इति । अत्र नोक्तं पृथग्जनविनोदार्थ इति किन्तु सामाजिकपदपण्डितपामरसाधारणं प्रयुक्तम् ।

न च वाच्यमिदं काव्यं शृङ्गारैकाश्रयतया, अगम्यारूपपरकीया, सामान्याश्रितत्वाद्रसाभासमयत्वाच्चानुपादेयमिति । नात्र रसाभासः । किन्तु रस एव । तदिदमत्रावधेयम्।

In Public domain. Digitization Muthulakshmi Research Academy

शृङ्गारस्त्रिविधः धर्मार्थकामभेदात् । कुलनायिकानायकालम्बनः शृङ्गारो धर्मशृङ्गारः । य उत्तमः । अनुरक्तसामान्यनायिकालम्बनोऽर्थ शृङ्गारः । अनुरक्तपरकीयशृङ्गारः कामशृङ्गारः । अर्थकामशृङ्गारौ द्वावपि मध्यमशृङ्गारौ व्यपदेशमर्हतः । धर्मशृङ्गार इव मध्यमशृङ्गारोऽप्युपादेय एव । आलङ्कारिकैर्भाणः परकीया सामान्या शृङ्गारपूर्णः परिगणितो दशविधरूपकेषु । न च तैरनुपादेय इति नादृतम् । विचार्यमाणे नात्र रसाभासः । किन्तु रस एव । यतोऽनुरक्तपरकीया, सामान्यशृङ्गारो रस एव भवितुमर्हति। किन्त्वपरक्तनायिकाशृङ्गार एव रसाभास नाम्न व्यवह्रियताम् । न हि गम्यात्वं, अगम्यात्वं वा रस, रसाभासनिर्णायकमिति वक्तुमुचितं किन्त्वनुरक्तत्वापरक्तत्वमात्रेण तन्निर्णायकेन भवितव्यम् । अनेन नैतज्ज्ञातीयं काव्यमनुपादेयं भवति ।

लघुकाव्यस्यास्य रमणीयार्थप्रतिपादकशब्दरूपलक्षणसमन्वये सहृदयाः प्रमाणम्

बुधविधेयः

सन्निधानं सूर्यनारायणशास्त्री

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

मधुकोशः

1. युवते रतेऽधिकतरो यूनोप्यानन्द इत्याहुः ।
युवतिरहं जाता भुवि को वा मम पुण्यपरिपाकः ॥

2. तरुणि! त्वदङ्गमुज्ज्वलसुवर्णरूपं हि शोभतेऽभ्यधिकम् ।
रत्नेन शिलष्टमिति ब्रुवन् प्रियां रसिकरत्नमशिलक्षत् ॥

3. द्वारं गतो निवृत्तश्चुम्बति युवतीं युवा यातः ।
प्रत्यागतोऽधरसुधां स्वदत्ते गत्वागतः पुनः शिलष्टः ॥

4. प्रतिवेशवधूनिकटे घुटिकाद्वयमस्ति हृदयरोगघ्नम् ।
अधरामृतानुपाने नेदं भुज्येत मे रुजाशान्तिः ॥

5. रमणीरत्नमेवेयं लोभनीयं जनैर्मुहुः ।
मदन्यो मूल्यनिर्णेता क्रेता च नहि दृश्यते ॥

6. अलकास्तव हरिनीला अधरं ते रमणि! शोणमणिः ।
कनकगिरी वक्षोजौ क्रीणाति त्वां रसिकराट् कः ॥

7. प्रदक्षिणानि कुर्वत्या आगतो मेऽप्रदक्षिणम् ।
देवालये पुरः प्रेयान् स्थितः प्रत्यक्षदेववत् ॥

8. करमूलगण्डयुगलस्तननाभ्यूरुस्थलेषु मम ।
पतिता दृशः प्रियस्य *हर्षस्पर्शा इवाप्रीणन् ॥

9. पश्यंस्त्वामालिङ्गन् नन्दन्नपि तव सुरतकेल्याम् ।
तृप्तोऽस्मि नैव बाले ! श्रेयसि सन्तृप्यते केन?

10. रमणीयं तव गात्रं विलासिनि ! मनोहरैरलङ्कारैः ।
अयि! विस्मृताऽसि तिलकं तव तिलकं मुद्रयेति मां ब्रूषे ?

11. पश्यन्ती मां मया दृष्टान्यववर्तद्दृशं पुनः ।
दृक् सा मेऽभिमुखीं दृष्टिं जित्वा मय्यपतद्बलात् ॥

In Public domain. Digitization Muthulakshmi Research Academy

12. गात्रं मम स्पृशन्ती विध्यन्ती मां पयोधराग्राभ्याम् ।
घ्नत्यंशुकेन सङ्कटमार्गे प्रतिवेशिनी चरति ॥

13. पश्यति सोऽपश्यन्निव न निकुच्येवाक्षिकोचनं कुरुते ।
मिश्रयति शनैर्वाचं दुर्ललितं भाति तस्य मुखम् ॥

14. ललिताङ्गी सा पतिताऽवचिनोति सुमानि तरुषु यथा ।
गुच्छौ स्तनौ, किसलयमधरं लतिके भ्रुवौ च घर्षन्ति ॥

15. एकैकशः षोडशभिः कलाभिर्भासते शशी ।
भाति प्रियो ममाश्रान्तं शतकोटिकलान्वितः ॥

16. मम कट्यां रत्नकाञ्ची पुष्पमाला गले मम ।
सौवर्णः कवचो गात्रे बहिः प्राणा मम प्रिया ॥

17. जटां पृष्ठे लम्बमानां दधत्येकावलीं गले ।
मां प्रहर्तुं बन्धितुं च भ्रुकुट्यायाति सुन्दरी ॥

18. ईक्षे मुखं पुरस्थाया विमुख्याः श्रोणिरीक्ष्यते ।
तिर्यङ्मुख्याश्च ते गण्डं शार्कर्येकरुचिः प्रिये !

19. विदधात्येकां वेणीं विश्लेष्य जटाद्वयं धत्ते ।
विग्रथ्य पिञ्छरूपं विश्लथयति कामिनी कचानन्ते ॥

20. क्षौत्येकस्मिन् दिवसे मम व्रतोद्यापनं श्व इति वक्ति ।
पर्व च परश्व इति सा विघ्नं कुरुते मम प्रयाणस्य ॥

21. अस्फुरतां दम्पत्योर्दक्षिणबाहू युगपदेव ।
लाभालाभौ काविति चिन्तयतो रागता स्वसा पत्न्याः ॥

22. फलानि बादराण्यादौ जम्बीराणि ततस्ततः ।
नारङ्गाणि च पक्वानि बाला विक्रेतुमागता ॥

23. द्रष्टव्यं लावण्यं तस्यास्तन्व्यास्तमिस्रायाम् ।

In Public domain. Digitization Muthulakshmi Research Academy

शशिरेखा निस्तेजा भवति दिवाऽत्युज्ज्वला निशीधिन्याम् ॥

24. आगत्य कोऽप्यदृष्टः पश्चात्तन्व्या न्यमीलयन्नयने ।
किं मातुलेय? उत मे पैतृष्वस्त्रीय? इत्यशङ्कितया ॥

25. दविष्ठापि प्रिये! रात्रौ तारेव द्योतसे खलु ।
अगोचरा त्वमन्येषामायाताऽसि कथं तु माम् ॥

26. चुम्बित्वा त्वां सुन्दराङ्गि ! स्वदित्वा च तवाधरम् ।
प्रयातस्य क्षुत्पिपासे न भवेतां ममाध्वनि ॥

27. वातेन प्रबलेन विक्षिप्ते स्तनपटे लतातन्व्याः ।
उत्पत्य पतितमासीन्मम संव्यानं यदृच्छया तत्र ॥

28. मा चर! बाले! सौधे भ्रष्टा तटिदिति हरेज्जलधरस्त्वाम् ।
उपसरतीन्दुस्तारेत्यपि गृह्णीताप्सरा इति च खचरः ॥

29. विश्लिष्टमेकसूत्रं मम कौशेयान्नवान्नभसि धावत् ।
कण्ठे श्लिष्टं मङ्गलसूत्रमिवादूरवर्तिकामिन्याः ॥

30. तरुणी सा प्रत्यब्दं पर्वेति प्रथमकेलिदिनम् ।
स्वसखीर्निमन्त्र्य दिव्यं महोत्सवं विभवतः कुरुते ॥

31. जरत्यपि विचित्रं त्वं युवतीव प्रगल्भसे ।
इति स्तुवद्विटं साह असि त्वं यौवनौषधिः ॥

32. दीयतां शोभनेऽस्मभ्यं तव नेत्रकुचाधरम् ।
ऋणत्वेनेति याचन्ते कान्ताः सेर्ष्यं मम प्रियाम् ॥

33. पुरस्थं विटमुद्वीक्ष्य स्वोद्वाहे विवशा वधूः ।
न्यास्थत्स्त्रजं गले तस्य साश्चर्येषु वरादिषु ॥

34. मनुते परोऽपशकुनं बालां विधवां निरीक्ष्य तां पुरतः ।
वच्मि त्रिर्मम मूर्ता विजयश्रीरेव यात्रासु ॥

In Public domain. Digitization Muthulakshmi Research Academy

35. सरोजिनीति त्वन्नाम तस्य नाम प्रभाकरः।
चन्द्राख्यः किल ते भर्ता औचितीं सखि! चिन्तय !

36. अनिमिषकन्या किं त्वं बाले! मामीक्षसेऽनिमिषदृग्भ्याम् ।
इति वक्तारमवादीदथ किं? स्वस्त्वां वरीतुमायाता ॥

37. किमौषधानुपानार्थमस्ति मध्विति याचिने ।
स्वप्रियायाधरमधु हसन्ती यच्छति प्रिया ॥

38. आगत्येतश्चुम्बत्यागत्य ततस्तनद्वयं स्पृशति ।
रहसि निमन्त्र्यौष्ठसुधां स्वदते श्लिष्यति च सव्याजम् ॥

39. मधुराधरामृतं ते पिबता रचितं मया काव्यम् ।
रसवत्तरमिति लोकः प्रशंसति युवति! कृतज्ञस्ते ॥

40. वलभिस्थिता लताङ्गी विट ऊर्ध्वकरे च तत्रत्ये ।
अवतीर्णा नाकधुनी शिवस्य मूर्ध्नीव हसितमुखी ॥

41. पिनद्धं प्रियया चोले समुत्तुङ्गस्तनद्वयम् ।
मम लग्नेन चित्तेन बहिर्गन्तुं न पार्यते ॥

42. कस्याश्चिदहं वीथ्याः कस्याश्चिद्वीथिकायाः सा ।
यातावेकीभूतौ यथा हि निर्जरझरश्च यमुना च ॥

43. शयनीयं तल्पमिदं केवलमेकेन न द्वयेनेति ।
ब्रुवतीं चेटी साहाऽपरा भवत्येकमत्र युगलमिति ॥

44. स्वकटाक्षजालकैर्मां पश्यन्तं दयितमाशङ्के ।
वसनान्तरं प्रविष्टस्तैः सह मम चुम्बतीव सर्वाङ्गम् ॥

45. सखि! ते स्तनगिरिशिखरे वसन्, पिबन् वदनचन्द्रपीयूषम् ।
रममाणस्तपसि दिवा निशमभिलष्यामि कालमपनेतुम् ॥

46. युवतीपीतं क्षीरं ताम्बूलं चर्वितं तरुण्या मे ।

In Public domain. Digitization Muthulakshmi Research Academy

फलमर्धदष्टमनया स्वादिष्ठं भवति सर्वतोऽपि मम ॥

47. नार्हस्यटितुं बाले! गुरुभारेण कचकुचनितम्बानाम् ।
शिरसा वहामि तिष्ठ ! त्वां शशिरेस्वां महेश्वर इव ॥

48. किं त्वं तरुणि! किराती? यतो क्षिपसि मां विषप्रदिग्धशरान् ।
भ्रान्तोऽस्यहमद्यावधि यथाऽप्सरास्त्वं सुधाब्धिसम्भूता ॥

49. उपविशति मय्युपविशति उत्तिष्ठत्युत्थिता भवति ।
चलति मयि चलति किं मे प्रतिवेशवधूर्भवेच्छाया ॥

50. तिथिवारवर्ज्यकालान् परीक्ष्य परिधाय धौतानि ।
सुतयज्ञमारभेते श्रोत्रियजायापती त्रिराचम्य ॥

51. का कञ्चुलिका धार्या? कीदृक् श्लक्ष्णाम्बरं मयाहार्यम् ?।
भूषाः का वा? द्येति प्रियाऽह सन्दर्श्य तान् प्रियाय निशि ॥

52. पश्यन्तीं ते मुखं दृष्टिं कुचावाकर्षतामधः ।
प्रिये! ततः कटी चोरू तन्मध्ये सा प्रपीड्यते ॥

53. अब्दादौ क्रियमाणं यत् तदाब्दमनुवर्तते ।
निर्विघ्नमिति साऽकर्ण्य प्रसन्नाऽकृत वेणिकाम् ॥

54. पत्न्या अपत्ययोगोऽस्ति पत्युर्नत्विति जातकात् ।
आकर्ण्य प्राहसन् सर्वे पश्यन्तस्तत्पतेर्मुखम् ॥

55. अपास्य प्राक्तनीं देव प्रतिमां नूत्नवधूर्गृहात् ।
पीठे तस्याः स्थापयित्वा रतिकामौ समर्चति ॥

56. त्रिदिनं प्रतिमासं त्वं शेषेऽस्वस्थेव भर्तारम् ।
यच्छौषधमितिपृच्छेत्याह सखीं चेटिका हसद्वदना ॥

57. धूपवर्तिवदब्जाक्षी दिक्ष्वर्पयति सौरभम् ।
मदनानलसन्तप्ता कियद्गन्धं समर्पयेत् ? ॥

In Public domain. Digitization Muthulakshmi Research Academy

58. सन्ध्यासु वेदिकासीना शिक्षयत्यङ्गना शुकम् ।
स्वागतं स्वागतं तुभ्यमिति वीथ्यां विटेऽटति ॥

59. चलितेषु पत्रकेषु प्रसवस्तबकं तदन्तरस्थमिव ।
धूते स्तनांशुके मे वध्वाः पीनस्तनद्वयं दृष्टम् ॥

60. चर्व्याणि नागवल्लीदलानि यद्यस्ति दीयतां बाले!
मह्यं सुधेऽति वदने रसिका स्वाधरसुधामदात्पत्ये ॥

61. अणिमार्थे त्वां वेष्टुं महिमार्थे युवति! ते नितम्बाप्त्यै ।
आरोढुं लघिमार्थे वोढुं गरिमार्थमाचरामि तपः ॥

62. स्तनांशुकेनाहतोऽहं पदेनात्मपदं हतम् ।
स्पृष्टो हस्तेन मे हस्तस्तया पथि जनाकुले ॥

63. यतमाने सन्धिकृते मयि, धावति कुर्वती प्लुतं बाला ।
प्लुतकतिपयेषु कथमपि सन्धिः प्राप्तो मया निविष्टेन ॥

64. स्वाभिधानं यतो लक्ष्मीः पतिर्भवितुमर्हति ।
नारायणः सखा भर्तुरिति चिन्तयते वधूः ॥

65. मकरो यथा युवत्याः सरसि स्नान्त्या गृहीतवांश्चरणम् ।
निर्मग्नः प्लवमानः शनैः शनैरागतः प्रियस्तस्याः ॥

66. स्नातार्द्रांशुकसंश्लिष्टगात्रा स्फूर्जद्रसाऽबला ।
वीक्षमाणान् मोहयन्ती दर्शयन्त्यङ्गकान्यगात् ॥

67. आसीः पुरा लताङ्गी कथमसि पीनेति पृच्छति स्निग्धे ।
स्मितमुख्याह तवाधरसुधारसेनास्मि पीवरेति वधूः ॥

68. कृतं जागरणं रात्रावरत्योपोषितं प्रिये! ।
ओष्ठामृतमपीत्वा ते पारणा न समाप्यते ॥

69. स्थित्वा पुरः प्रियस्य समाप्ततपसः स्मिताननसरोजा ।

In Public domain. Digitization Muthulakshmi Research Academy

प्राह प्रिया परा देवी तव प्रसन्ना वरं वृणीहीति ॥

70. नतमूर्धाभिमुख्येन द्वन्द्वमागतमन्तिकम् ।
दिश्येकस्यां स्स्वलन्न्यास्थत्पदं वक्त्रे यथाहते ॥

71. सुभग उपसृत्य सखि! मां तवाङ्गकाञ्चनमहं परीक्षेऽद्य ।
एवं ब्रुवन्नघर्षत् स्वगात्रनिकषेण गात्रं मे ॥

72. अनुयान्तं रथ्यायां मुखं परावृत्य मां बहून् वारान् ।
स्वकटाक्षैरिव बध्वा पश्चादनयत्प्रिया दूरम् ॥

73. तरुणीमुखकस्तूरी रेखा भ्रूचापसक्तबाणा इव ।
भित्त्वा मम हृल्लक्ष्यमरुन्तुदा पीडयत्युच्चैः ॥

74. उपविशति मामकाङ्के शेते च निशासु वक्षसि मदीये ।
अवलम्ब्यैव करं मे चरतीत्थं सा मदङ्गशाखाभूत् ॥

75. नव्यानि क्रीणाति दिने दिने वस्त्रभूषणादीनि ।
न पतिं धनाय याचति सुवर्णमूर्तिर्हि चन्द्रमुखी ॥

76. देहलीस्थाङ्गना भाति देहलीदत्तदीपवत् ।
चित्रं दीप्तिस्तदास्यस्य वीथ्यामेव प्रसर्पति ॥

77. तव तरुणी कनकाङ्गी तनया चानर्घरत्नं हि ।
याचसि धनं परान् जड! सति नवनीते घृताय कोऽर्थयते?॥

78. कुसुमाङ्कमुत्तरीयं परिधानं चोलकं सुमसरांश्च ।
धृत्वा नितरां बाला दृष्टा कुसुमास्त्रशरनिमग्नेव ॥

79. काञ्चनपुत्तलियुगलं तरुणः स्पर्शयति चुम्बयति बहुधा ।
संश्लेषयति परस्परमधरं पाययति मे पुरो विहसन् ॥

80. पुष्पं वेणीस्रस्तं पदेन विक्षिप्य मयि यथा पतति ।
तेन व्रणितेन हृदा व्यथा मानं मां निरीक्ष्य हसति वधूः ॥

In Public domain. Digitization Muthulakshmi Research Academy

81. आपृच्छते चुम्बनैर्मामाश्लेषैः स्वागतं दिशेत् ।
श्रमं नुदेद्वीजयन्ती दत्वाऽधरसुधां वधूः ॥

82. दृग्जालं द्वारस्था वीथ्यां नद्यामिव प्रसार्य मुहुः ।
शफरानिव रसिकविटान् ग्रहीतुमालोकते युवती ॥

83. बाले! त्वं सुभगाऽसीत्युक्ता सामुद्रिकेण हृष्टा सा ।
फलति कदा मम सौभगमिति तं पप्रच्छ कौतुकायत्ता ॥

84. स्रस्तं स्तनांशुकं नो यथावदर्पयति कञ्चुलिकाम् ।
त्रुटितां नहि बध्नाति सव्याजं सर्पति प्रियं तरुणी ॥

85. उपसर्पति प्रियतमे प्रवृद्धमासीत्कुचद्वयं युवतेः ।
त्रुटितं श्लक्ष्णं चोलं करावमर्दार्थमुत्सहेते नु? ॥

86. दत्तानि ते चुम्बनानि प्रिये! प्रत्यर्पयाद्य मे ।
ऋणशेषो न युक्तो हि कुसीदस्तस्य वर्धते ॥

87. पतगारवेषु कुशलः कश्चिदुपवनं प्रविश्य रौति विटः ।
भ्राम्यन्ती कीरं तं ग्रहीतुमेत्याबला गृहीतैव ॥

88. वस्तुध्वनिरालापे तदङ्गचेष्टास्वलङ्कृतेर्ध्वननम् ।
अधरेऽस्ति रसस्फूर्तिर्ध्वनिकाव्यं भवति युवती सा ॥

89. अधरेण केवलेन ममाङ्गकेषु रचितं महत्पुण्यम् ।
मम वीथिकोणभागे योऽचुम्बत् सोमपीथिनः कन्याम् ॥

90. बिम्बफले पीयूषं कमले चन्द्रे सुवर्णलतिकायाम् ।
कमनीयशैलयुगलं चित्रं चित्रं हि पञ्चशरसृष्टिः ॥

91. बाला निजाङ्कपीठे प्रियं प्रतिष्ठाप्य मन्दहाससुमैः ।
दृङ्माल्यैश्चाभ्यर्च्य न्यवेदयस्तनफलाधरसुधाश्च ॥

92. हरिणीव किं बिभेषि? नाहं भिल्लो न चापि हर्यक्षः ।

In Public domain. Digitization Muthulakshmi Research Academy

देवीमिव सेवे त्वां सुन्दरि! मम मन्दिरे प्रतिष्ठाप्य ॥

93. मम चित्तापहर्ताऽसि प्राप्तं त्वां नोत्सृजाम्यहम् ।
इति काञ्च्या करौ बध्वा वेण्याऽहन्मां मुहुः प्रिया ॥

94. गोपायस्याच्छाद्य पटेन कस्मै त्वमङ्गलावण्यम् ।
कुचकुम्भौ मृदुवाचः स्मितान्यपाङ्गांश्च बिम्बोष्ठि?

95. तरुणास्तरुणीसदनं जगाम सा प्रस्थिता च तरुणगृहम् ।
मार्गेणान्येनोभावाटाठ्येतां मिथोऽमिलितौ ॥

96. मम साध्वीत्वमहिम्ना मृतः पुनर्जीवितोऽद्य भर्तेति ।
ब्रुवती युवती पत्युः प्रतिरूपं मां समर्चयामास ॥

97. किं पूर्णपात्रिकाऽसि? बाले ! तेऽधरसुधां कपोलतलम् ।
कुचयुगलीमहमहमिति हर्तुं मेऽङ्गान्यभिलषन्ति ॥

98. स्नुषया पुत्रः क्वापि जामाता तनयया क्वचिद्दुहिणौ ।
कुत्रापि गृहे युक्तौ मदनव्यायाममन्दिरं किल तत् ॥

99. पणं कृत्वा गायतः स्म कोकिला कामिनी च मे ।
प्रगाय कोकिलाऽचैत्रं जिता मूकीकृता तया ॥

100. लिख्यतां लेख इत्युक्ता स्मरलेखं लिखत्यसौ ।
प्रधानं पुरुषार्थानां काममाह वधूर्गुरुम् ॥

101. सुगूढः सुप्रकाशश्च इति दत्ता प्रहेलिका ।
यूना तं युवती हासिन्याश्लेषेण समादधौ ॥

102. सहनाववतु सुमास्त्रो महितः सहनौ भुनक्तु चुम्बशतम् ।
अयि! सहवीर्यं करवावहै स्मरणाङ्गणेषु चन्द्रमुखि !

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

1.पुण्यकालः

1. जयलक्ष्मीः कुसुमेषोरिव सा वश्यौषधी करौ कण्ठे ।
प्रालम्ब्य चुम्बति यदा तदैव मे पर्वकाल इति मन्ये ॥

2. असिधेनुका स्मरस्य मोहलता मोहिनीमूर्तिः ।
मामाश्लिष्यति च हठाद्यदा तदा पुण्यकाल इति मन्ये ॥

3. मूर्त इव मदनमन्त्रो वशीकरणयन्त्र इन्दुमुखी ।
यदि मां यौवनदर्पेणाक्राम्येन्मे महोदयः कालः ॥

2.प्रियागमः

1. सुचिरेणागतायां मे सुन्दर्यां स्वपितुगृहात् ।
अभूवमिव मूर्छाया दीर्घाया लब्धचेतनः ॥

2. वनादिव बहिर्यातो नष्टान्ध्य इव नेत्रयोः ।
मुक्तशाप इवानन्द तुन्दिलस्तन्मुहूर्तके ॥

3. शरच्चन्द्रसहस्राणि व्यद्युतन्निव मे गृहे ।
अपप्तदिव मे मूर्ध्नि पुष्पवृष्टिः स्मराहिता ॥

3. विस्मृतिः

1. प्रयाति शकटं चिन्ता सञ्जाता हृदये हठात् ।
आभान्मे विस्मृतं किञ्चित्कर्तव्यं कार्यमात्मना ॥

2. अयते बहुधा स्मर्तुं विस्मृते नास्मरं प्रिये !
स्मर्यमाणमिवाभासीत् किन्तु नैव स्मृतं बत !

3. कालेन तदा कियता तथा तथा क्षुब्धचित्तस्य ।
भाति स्म पुरो मे तव वदनं शतचन्द्रसुन्दरं बाले !

4. कार्यवेगतमोमूढस्त्वमनामन्त्र्य सुन्दरि !
अश्लिष्यन् धिगजिघ्रंश्च रभसेन गतोऽस्म्यहम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

5. निर्दशन्नङ्गुलीं शून्यचित्तोऽस्थां प्रत्यभान्मम ।
बुद्धिर्धिग्जर्जरीभूता नष्टाऽभूद्धारणेति च ।।

6. कृतमिव मयाह्यपुण्यकमजानता कर्म मे हृदयम् ।
व्यथते स्म विद्धमिव च शाताभिः सूचिकाभिरिन्दुमुखि!

7. शकटं पुरोऽभियात्यपि पश्चाद्धावति तु मे हृदयम् ।
यात्रा च भारभूता तुभ्यं कथयामि किं युवति?

8. अपराधः प्रथम इति क्षमस्व! शिरसैव याचेऽहम् ।
यच्छामि ते कुसीदो मृदान मां तरुणि! निर्दयाश्लैषैः ।।

* * * * *

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Brahmasri Sannidhanam Suryanarayana Sastri Garu

Sanskrit Academy
Adarsha Shodha Sansthan
(Recognised by Central Sanskrit University, New Delhi)
Osmania University Campus, Hyderabad – 500 007

ISBN 978-93-80171-65-4